श्रीमदीशदत्तविरचित-

प्रतापविजयः

सम्पादकद्वय

शिवकुमार त्रिपाठी

विशुद्धानन्द त्रिवेदी

शारदा संस्कृत संस्थान

वाराणसी - २२१००२

मूल्य -

।। श्रीमदीशदत्तविरचितः ।।

प्रतापविजयः

सम्पादकः
शिवकुमार त्रिपाठी
विशुद्धानन्द त्रिवेदी
प्राध्यापकः
श्रीराधाकृष्ण संस्कृत महाविद्यालयः
डमलऊ, रायबरेली

शारदा संस्कृत संस्थान
जगतगंज, वाराणसी-२२१००२, (उ०प्र०)

प्रकाशक:

शारदा संस्कृत संस्थान

सी0 27/59, जगतगंज, वाराणसी-221002

दूरभाष : (0542) 2204168

कम्प्यूटर संयोजन :

विश्वनाथ कम्प्यूटर्स

बी 30/1 आर0 एन0, अस्सी पुल के पास,

जानकी बाग कॉलोनी, लंका, वाराणसी, उ0 प्र0

फोन : 2366183, मो0 9415814800, पिन : 221005

महाकवि-श्रीशदत्तस्य जीवनपरिचयः

काशीपण्डितसभाप्रदत्तेन 'सुकविशिरोरत्न'मित्युपाधिना विभूषितस्य श्रीशदत्तस्य जन्म उत्तरप्रदेशस्य आजमगढ़जनपदान्तर्गते 'मूंगमास'- ग्रामे १९७२ वैक्रमाब्दस्य मार्गशीर्षस्याष्टम्यां तिथौ तदनुसारं खीष्टाब्दस्य १९१५ ईशवीये वर्षे अभूत्। तस्य तातपादः श्रीपण्डित-अम्बिकादत्तपाण्डेयो व्याकरणाचार्योपाधिमण्डितः सनातनधर्ममहाविद्यालये लखीमपुरखीरीस्थे प्रधानाध्यापकः आसीत्। कविवरस्यास्य तत्रैव प्रारम्भिकी शिक्षा पितुः संरक्षणे सम्पन्ना। वाराणसीस्थात् राजकीयसंस्कृतमहाविद्यालयात् साम्प्रतिकात् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयात् साहित्यचार्योपाधिं लब्ध्वा असौ कविवरः काव्यतीर्थ-साहित्यरत्नप्रभृत्युपाधीनपि अलभत। कविरयं ३० तमवर्षस्य स्वल्पे वयसि एव स्वकीयं पार्थिवशरीरं विहाय परमात्मनि विलीनोऽभूत्।

स्वस्वल्पवयसि कविवरोऽयं कुशललेखकः, समर्थसम्पादकः सिद्धसमालोचकः अप्रतिमाभिभाषकश्चासीत्। हिन्दी-संस्कृतोमयविधाभ्यां काव्यप्रणयनेऽयमप्रतिमदक्षः। सुप्रभातस्य सहसम्पादकत्वेन भारतश्रियः सम्पादकत्वेन च एतस्य सम्पादनकलायाः प्रौढवैदग्ध्यम्प्राप्यते। अस्य कृतयः सन्ति-'विद्रोही झांसी की रानी' हिन्दीकाव्यम्, 'कालिदास तथा सम्राट् विक्रमादित्य और उनके नवरत्न' हिन्दीशोधकृतिः, प्रतापविजयम् संस्कृतखण्डकाव्यञ्च।

प्रतापविजयस्य काव्यस्य सारांशः

यवनसम्राडर्कवरशासिते राष्ट्रे भारते राजस्थानस्य मेवाड़राज्ये महाराणाप्रतासिंहः शासक आसीत्। अस्य राजधानी चित्तौड़नगरे आसीत्। असौ महाराणा महाबली, पीनवक्षाः, दीनजनतापविनाशकः, शत्रुसन्तापकः, गोद्विजपरिपालकः, महाकलेश्वरैकलिङ्गस्योपासकः सनातनधर्मरक्षकश्चासीत्। तदानीं भारते मुद्‌गलैः गोद्विजदेवविनाशः क्रियते स्म। ललनाजनानामपहरणं बलात्कारश्च क्रियते स्म। सर्वत्रैव कलिकालमहिमा मुद्‌गलैः वितन्यते स्म। भारतस्येत्यंभूतां विपन्नामवस्थां दृष्ट्वा सनातनधर्मरक्षकोऽयम्महाराणाप्रतापसिंहः सदैव चिन्तयति स्म-'कदा पवित्रोऽयमस्माकं भारतराष्ट्रः स्वाधीनताः भविता।' अतः अनेन प्रतिज्ञातम्-यावत् मम प्रियदेशो भारतं स्वाधीनतां नाधिगच्छति तावदहं पत्रपुटकेषु एवांत्स्यामि न च स्वर्णिमपात्रेषु, विविक्ते गहने कानने वत्स्यामि, न च राजप्रसादेषु, भूमौ तृणासनेष्वेव स्थास्यामि, न तु राजसिंहासनादिषु स्वर्णनिर्मितपीठेषु।

एकदा हिन्दुधर्मच्युतः क्षत्रियोऽपि अर्कवराय भगिनीदानने लब्धसेना-ध्यक्षोपाधिकः महाभिमानी मानसिंहः शोलापुरगं महायुद्धं विजित्य दिल्लीम्प्रति प्रस्थितो मार्गे प्रतापसिंहस्य भवनेऽतिथिः बभूव। महाराणा स्वीयेन पुत्रेण अमरसिंहेन तस्मै स्वागतमकारयत्। स्वयन्तस्य समक्षं न गतः भोजनकाले मानसिंहः प्रतापसिंह न दृष्ट्वा तदनागमनकारणमपृच्छत्। अमरसिंहः "मे पिता शिरोव्यथया पीडितोऽस्ति" इति उत्तरमददात्। मानसिंहस्तं स्वकीयमपमानं मत्वा दिल्लीमगच्छत्। पुनः स स्वसैन्येन संयुक्तः प्रतापसिंहे आक्रमणकरोत्।

प्रतापसिंहोऽपि स्वकीयै: स्वल्पैरेव वीरसैनिकै: अनुगम्यमान: तुमुलं युद्धम् अकरोत्। हल्दीघाटी मुगलसैनिकशोणितेन रक्तवर्णा सञ्जाता। अपूर्वं पराक्रमं महाराणाप्रताप: प्रादर्शयत्। चेतकस्य रणप्रियतुरङ्गमस्य आक्रमणं युद्धस्थलस्य प्रत्येकस्मिन् भागे अदृश्यत्। चेतक: अर्कवरपुत्रस्य सलीमस्य महागजस्य मस्तकमारुरोह। महाराणाकुन्तस्य लक्ष्यभूत: सलीमो गजपलायनात् भारतदौर्भाग्याच्चावशिष्ट:। अनन्तरं महाराणाप्रतापो यवनसैनिकैराबिद्धो बभूव। एनं प्राणसङ्कटापन्नं प्रतापं वीक्ष्य ''झालमाना'' नामधेयो वीर: एतस्य मुकुटं स्वशिरसि आरोपितवान्। इत्थं स्वतन्त्रतासूर्ये महाराणा तेन देशभक्तेन स्वबलिदानेन रक्षित:।

यद्यपि साम्प्रतम् एते वीरा न दृश्यन्ते। परन्तु अद्यापि एतेषां वीराणां यशोगाने राष्ट्रप्रियजनानामनुरागोऽस्त्येव।

"मान-मानहानिः" इति शीर्षकस्य सारांशः

एकदा शोलापुरगं तुमुलं युद्धं विजित्य जयश्रिया समन्वितो मानसिंहो दिल्लीनगरं व्रजन् मार्गे महाराणाप्रतापस्य हर्म्ये अतिथिः बभूव। महाराणाप्रतापः स्वपुत्रेणामरसिंहेन तदातिथ्यं कारितवान्। भोजनकालेऽपि महाराणाप्रतापेनैव भोजनं सम्प्रेष्य स्वयमनुपस्थितो बभूव। अनागतं प्रतापसिंहं वीक्ष्य मानसिंहस्तदनुपस्थितिकारणमपृच्छत्। अमरसिंहोऽवदत्-"मे पिता शिरोव्यथया पीडितोऽस्ति।" मानसिंहः स्वकीयमपमानं विदित्वाऽकथयत्-"अहन्तदौषधमानेष्यामि येन पुनरस्मिन् जन्मनि तव पितुः शिरोव्यथा भूयात्।

तदानीमेव भवनात् निः सृत्य शत्रुमर्दनो महाराणा मानसिंहमाक्षिपत्-"तव पितामहेन अर्कबराय यवनाय ते भगिनी दत्ता, अतः जातिधर्मच्युतेन त्वया सह भोजनं मम कथम्? अतस्तव मानप्रदर्शनं व्यर्थम्। कथमस्माकं वर्णाश्रमधर्ममर्मज्ञानां कुलधर्मच्युतेभ्यः कृमितुल्यजन्तुभिः युष्माभिः सह मित्रता? किं त्वया गजशशकयोः सिंहजम्बुकयोः मैत्र्यं कुत्रापि श्रुतम्?"

इत्थं महाराणावचनं कटुसत्यञ्च श्रुत्वा मानसिंहो जगाद-"तर्हि भवान् रणोद्यतस्तिष्ठतु। नूनमहमत्र भूय आगमिष्यामि। आवयोः एकजनः संग्रामे यशोऽवशेषो नूनं भविता। यतो हि त्वया प्रतापेन मानसिंहो न तिरस्कृतः, अपितु प्रसुप्तो सिंहो जागरितः, पादाहतः फणधारी महाव्यालः पुन पादहतेन उद्बोधितः।"

अनन्तरं मानसिंहमाक्षिपन् सरोषं पुनः महाराणाऽवदत्-"वीरा कुक्कुरवत् जल्पन्ति न, अपि तु शौर्यप्रदर्शनं कुर्वन्ति। अतः इदानीं व्रज, पुनः मदर्थमातुरः सन् युद्धस्थले आगच्छ। तत्राहं कृपाणपाणिना तव स्वागतं करिष्यामि।" इत्थं प्रतापवाक्यकथनेन मानी मानसिंहः व्यथितो दिल्लीम्प्रति गमनोत्सुको बभूव। तदानीमेव महाराणापक्षीयः कोऽपि कटुप्रलापी वीर

उपाहसत्- "मम भूयो भूयः अनुरोधो यत् युद्धे त्वया त्वद्भगिनीपतिः ते आहूतः, अर्कबरोऽपि आनेतव्यः, यतः रणे तव पराक्रमं दृष्ट्वा स जामाता प्रसन्नो भविता।" इत्थं प्रतापसिंहः दीर्घमुच्छ्वसन् दिल्लीम्प्रति ससर्प।

प्रतापविजयस्थस्य "प्रतापविजय" इति शीर्षकस्य सारांशः

उत्तरम्-हल्दीघाट्यां मानसिंहापमानजनितसमुपस्थिते मुगलक्षत्रिययुद्धे स्वमेव महाराणाप्रतापः स्वसैनिकान् "शत्रून् छिन्धि, भिन्धि, परिदारय, ताडय, खण्डय, ज्वलय, कर्त्तय, पातय" इत्यादिना उद्बोधयन् अपूर्वदाढ्र्येन सैन्यसञ्चालनमकरोत्। अतोऽस्य परिमाणस्वरूपं युद्धे क्षत्रियसैनिकाः अश्वान्, गजान्, शत्रून् चापि पशुमारममारयन्। कोऽपि क्षत्रियः शत्रुषु खड्गेन प्रहरति स्म, कोऽपि कुटिलच्छुरिकाया, कोऽपि सिंहनखेन, कश्चित् कृणाफलकेन च। इत्थं जायमाने भीषणे युद्धे सलीममर्कबरपुत्रं दृष्ट्वा महाराणा सिंहनादमकरोत्- "रे मुगलवंशकलङ्किसूनो! अद्य ते वधं विधाय स्वदेशस्य स्वाधीनतां ग्रहिष्यामि।" इत्थमुक्त्वा स्वकीयमश्वं चेतकं सलीमम्प्रति प्रैरयत्। चेतकः सलीमस्य गजमस्तकमारुरोह। स्वकीयं भीषणं कुन्तं सलीममस्तके प्राहरत्। परन्तु दौर्भाग्यात् सलीमगजश्चेतकखुरप्रहारेण विचलितः सन् अपासरत्। अतः महाराणाप्रतापः लक्ष्यभ्रष्टः सञ्जातः। सर्वत्र मुगलसेनायां हा सलीम! हा सलीम! इति घोषः समजायत। परन्तु सलीमः स्वसौभाग्येन संरक्षितः।

इदानीमेव महाराणाप्रतापमभिलक्ष्य यवनसेना एनं परितः समागतवती। एनं महाराणाप्रतापं यवनैराक्रान्तं दृष्ट्वा तं त्रातुं झालामानित्यभिधेयः क्षत्रियसामन्तः तद्मुकुटं स्वशिरसि संस्थाप्य यवनहनने उद्यतो बभूव। झालामानित्यभिधेयं वीरं महाराणेति मन्यमानाः यवनसेनाः भीषणरुषा एनं रुरुधुः। परिणामस्वरूपं चतुर्दशसहस्त्रं चतुर्दशसहस्त्रं रघुवंशीयाः क्षत्रियवीराः स्वमातृभूमिरक्षणाय दिव्यलोकान् अवापुः। महाराणा स्वदेशरक्षणाय सुरक्षितो बभूव।

प्रतापविजयमवलम्ब्य हल्दीघाटी इत्यस्य शीर्षकस्य सारांशः

राजस्थानस्यारावलीपर्वतेकदेश अस्ति हल्दीघाटीति नामधेयं स्थलम्। इयं हल्दीघाटी महाराणायुद्धसम्बद्धाऽद्यापि प्रख्याताऽस्ति। अत्रैव स्वदेशभारतस्य स्वाधीनतायै महाराणाप्रतापसिंहस्य यवनाधीशार्कबरपुसलीमस्य सेनयोर्मध्ये तुमुलं युद्धमभूत्। चतुर्दशसहस्त्रपरिमितैः क्षत्रियवीरैः महाराणासैन्यसञ्चालने यच्छौर्य प्रदर्शितन्तत् कुत्रापि न प्राप्यते, इयं हल्दीघाटी अस्मान् हिन्दुजनान् स्वतन्त्रतायाः पाठं पाठयति। अद्यापि इयं स्वकीयं पुत्रं महाप्रतापिनं प्रतापसिंहं विचिन्तयन्ती स्मरन्ती एतादृशं कमपि हिन्दुं न विलोक्य पवनचालितपल्लवकरैः प्रियपारतन्त्र्यान् हिन्दून् स्वस्पर्शम्प्रति वर्जयतीव स्वकीयं प्रतापिपुत्रं प्रतापं ध्यायन्तीयं कुररीस्वनैः पिकशुककलरवेश्च प्रतिदिनं रोदितीव। एषा प्रतिदिनमेव षट्पदालिगुञ्जारवैः मयूरखञ्जनपक्षिनृत्यैः शुकशावककूकजनैश्च चतुर्वाद्यविशेषैः महाराणायशोगानं करोति। अत्र प्रकृति-वधूटी कदापि सौभाग्यालङ्करणानि नैव विभर्तीव। अत्र प्रतापवल्लभा प्रकृतिसाम्राज्ञी प्रतिदिनमेव प्रत्यग्रैः पुष्पैः फलैः सुगन्धिभिः पवनैः अद्योतपंक्तिभिः कोकिलगीतिभिः महाराणासम्बद्धाया हल्दीघाट्याः पञ्चोपचारपूजनं विदधातीव।

अत्रैव झालामानित्यभिधेयः क्षत्रियसामन्तः प्राणरक्षणाय स्वदेशभूमिसम्मानाय च स्वशरीरमाजुहाव। अत्र चतुर्दशसहस्त्रक्षत्रियवीराः रघुवंशीयाः स्वप्राणान् मातृभूमिरक्षायै उत्सर्जयामासुः। अत्रैव रक्तस्य गङ्गा प्रवाहिता। अस्याः हल्दीघाट्याः प्रतापसिंहसम्बद्धकथाश्रवणेन ऋषयः पितरश्च देवैः सह सन्तुष्टा भवन्ति। इयमेव सा स्थली यत्र चेतकस्य चङ्क्रमणानि प्रसिद्धानि सन्ति। इयमेव सा स्थली यत्र महाराणाकुन्तः स्वशौर्यं प्रदर्शयामास। देवानामपि प्राणप्रियेयं हल्दीघाटी वर्तते।

श्लोकानुक्रमणिका

॥ श्री:॥

प्रतापविजय:

(कवेरात्मनिवेदनम्)

पूर्णेन्दुसुन्दर-मुखि! प्रतिभाऽभिरामे! वामे विधे:,
सुवचसां वचसां विरामे।
गीर्वाणवाणि! भुवनाऽऽभरणं भवत्या: वन्दे
दयाऽऽर्द्रचरणं, शरणं जगत्या:॥१॥

अन्वय:—पूर्णेन्दुसुन्दर-मुखि! प्रतिभाऽभिरामे! विधे: वामे! सुवचसां वचसां विरामे! गीर्वाणवाणि! भुवनाऽऽभरणं, जगत्या: शरणं, भवत्या: दयाऽऽर्द्रचरणं वन्दे।

व्याख्या—पूर्णेन्दुसुन्दमुखि। पूर्णश्चासाविन्दुश्च पूर्णेन्दु: स इव सुन्दरं मुखं यस्या: सा पूर्णेन्दुसुन्दरमुखी तत्सम्बुद्धौ परिपूर्णविधुमनोज्ञानने। प्रतिभाभिरामे प्रतिभया अभिरामा प्रतिभाभिरामा तत्सम्बुद्धौ-नवनवोन्मेषशालिज्ञानमनोहरे। विधे:धातु:। वामे पत्नि! सुवचसां शोभनानि वचांसि येषां ते सुबचसस्तेषां शोभनवाणी तासां वाणीनाम्। विरामे विश्रामभूते। गीर्वाणवाणि! गीर्वाणानां देवानां वाणी तत्सम्बुद्धौ देवभारति! भुवनाभरणं भुवनस्याभरणं तत्। जगदलङ्कारम् जगत्या लोकत्रयस्य शरणम् आश्रयस्थानम्। भवत्या: श्रीमत्या:। दयार्द्रचरणम्-आर्द्रश्चासौ चरणश्च आर्द्रचरण:, दयया आर्द्रचरण: दयार्द्रचरणस्तम् कृपाप्लावितपादम् अहम्-इति शेष: वन्दे नमस्करोमि। वसन्ततिलकावृत्तम्-तल्लक्षणम्-उक्ता वसन्ततिलका तभजाजगौग: इति।

भावार्थ:—पौर्णमासी के चन्द्रमा की भांति सुन्दर मुखवाली क्षण-क्षण में स्फुरित होने वाल बुद्धि से मनोहर, ब्रह्मा की स्त्री हे सुकविजनों की वाणी का आश्रय, हे देवताओं की वाणी, लोकों के आभरण का पद और संसार के शरण, कृपा से आर्द्र आपके चरणों को मैं प्रणाम करता हूँ।

नाऽऽलोक्यते क्वचन सत्प्रतिभाप्रकाशो,
भासोऽथवाऽमरमणिः कविकालिदासः।
तन्मे पुनर्जननि! सर्जनमर्जयन्ती,
किम्मन्यसे न भविता कविता-विकास।।२।।

प्रसंगः—कविः भासकालिदासौ स्मरन् वाग्देवतायाः कृपामभिलषति।

अन्वयः—सत्प्रतिभाप्रकाशः भासः अथवा अमरमणिः कविकालिदासः (इदानीं) क्वचन न आलोक्यते, तत् हे जननि! सर्जनं अर्जयन्ती (त्वं) किं न मन्यसे (यत्) पुनः कविताविलासः भविता।

व्याख्याः—हे जननि हे मातः। सत्प्रतिभाप्रकाशः सती चासौ प्रतिभा च सत्प्रतिभा तस्याः प्रकाशः। शोभनसद्बुद्धिप्रकाशः-भासः भासनामा महाकविः। अथवा या अमरमणिः अमराणां मणिः। देवरत्नम्। कविकालिदासः-कविश्चासौ कालिदासश्च, महाकविः कालिदासः क्वचन क्वापि न आलोक्यते दृश्यते। तत् मे मम। सर्जनम् सृष्टिम्। अर्जयन्तो कुर्वन्ती किं वितर्के मन्यसे अनुभवसि। यत् हि पुनः भूयः। कविताविलासः कवितायाः विलासः। कवि कर्म्मप्रसरः न भविता न भविष्यति।

भावार्थः—हे माता! अच्छी प्रतिभा के पुञ्जभास अथवा देवरत्न महाकवि कालिदास तो आजकल दिखायी नहीं देते। तो तुम मेरा आविर्भाव करती हुई क्या समझती हो कि फिर कविता का प्रसार न होगा।।२।।

केषाञ्चिदस्तु कमला कमलाऽऽयताक्षी,
केषाञ्च शम्भुसुमुखी सुमुखीषु मान्या।
अस्मत्कृते तु जननी जननि ! त्वमेका,
यत्पाययेः शमकरं मकरन्दबिन्दुम्।।३।।

प्रसंगः—कविः सरस्वत्याम्पुत्रभावमंगीकरोति।

अन्वयः—केषाञ्चिद् कमलाऽऽयताक्षी कमला, केषां च सुमुखीषु मान्या शम्भुसुमुखी अस्तु। हे जननि! तु अस्मत्कृते त्वं एका जननी (असि) यत् शमकरं मकरन्दबिन्दुं पाययेः।

व्याख्या—केषाञ्चित् बहूनां जनानां कमलायताक्षी, कमले इव आयते अक्षिणी यस्याः सा, पद्मदीर्घलोचना। कमला लक्ष्मीः। केषाञ्च जनानाम्। सुमुखीषु शोभनं मुखं यासां ताः सुमुख्यस्तासु शोभनाननासु। मान्या अग्रगण्या। शम्भुमुखी शम्भोः सुमुखी तथा पार्वती अस्तु भवेत्। हे जननि हे मातः। अस्मत् कृते मदर्थम्। तु परम् त्वम् भवसि। एका प्रधाना, जननी माता 'असीति' शेषः यत्-यस्माद्धेतोः। शमकरं शमं करोतोति शमकरस्तम्। शान्तिदम्। मकरन्दबिन्दुं मकरन्दस्य बिन्दुर्मकरन्दबिन्दुस्तम्। परागकणम्। पाये पायय। अत्र यमकमलङ्कारः। तल्लक्षणन्तु साहित्यदर्पणे-सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः। क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते इति।

भावार्थः—बहुतेरे लोगों के लिए कमल के समान दीर्घ आंखोंवाली लक्ष्मी और बहुत से लोगों के लिए 'सुन्दर मुखवाली स्त्रियो में श्रेष्ठ' पार्वती माता हों। किन्तु हे माता मेरे लिए तो एक आप सरस्वती ही हो। जो मुझे शान्तिदायक मकरन्द का बूंद पिलाया करती हो।।३।।

तान् कल्पना-गत-कला सकला व्रजन्ति,
भावा गुणेन सहिता अपि तान्नु यन्ति।
दासोपमा नव-रसा अपि तान् भवन्ति,
सर्वं विहाय भवतीं भुवि ये यजन्ति।।४।।

प्रसंगः—कविः सरस्वतीकृपाफलं दर्शयति।

अन्वयः—ये भुवि सर्वं विहाय भवतीं यजन्ति, सकलाः कल्पनागतकला तान् व्रजन्ति, गुणेन सहिता भावः अपि तान् यन्ति, दासोपमाः, नवरसाः अपि तान् भजन्ति नु।

व्याख्या—ये जनाः। भुवि पृथिव्याम्। सर्वं सकलं विहाय परित्यज्य भवतीं त्वां यजन्ति सेवन्ते। सकलाः सम्पूर्णाः। कल्पनया आगताः कलाः कल्पनागतकलाः विचारप्राप्तविद्या अपि तान् पूर्वोक्तान् व्रजन्ति गच्छन्ति। न निश्चये गुणेन दयादिना सहिता मुक्ता भावाः पदार्था अपि तान् भक्तान् यन्ति गच्छन्ति। दासाः उपमा येषान्ते दासोपमाः सेवकसदृशा नव च ते रसाश्च नवरसाः श्रृंगारादयः अपि तान् भक्तजनान् भजन्ति सेवन्ते। नु निश्चयेन।

भावार्थः—जो मुनष्य इस धरती पर सब कुछ छोड़कर आपका ही सेवन करते हैं। उन्हें विचार से प्राप्त सभी विद्यायें और दया आदि गुणों से युक्त वस्तुएं तथा दास तुल्य हो श्रृंगार आदि नवों रस स्वयम् ही उपस्थित हो जाते हैं।।४।।

द्वेधा कथं कथय ते कृपया कृपा यत्
मेधाविनामनुपमो विहितः सवेधाः।
प्रातःस्तवम्प्रकुरुतेऽनुदिनानि मातः!
जातः कथं न शिशुरेष तवाङ्क तातः।।५।।

प्रसंगः—अत्र पद्ये कविः सरस्वत्याः कृपां वाञ्छति।

अन्वयः—हे मातः! ते कृपा कथं द्वेधा, (भवितुं शक्नोति) यत् ते कृपया सः वेधः मेधाविनाम् अनुपमः विहितः। एषः शिशुः (अपि) अनुदिनानि प्रातः स्तवम् प्रकुरुते। (अतः एषः शिशुः) तव अङ्क-तातः कथं न जातः।

व्याख्याः—हे मातः जननि ते भवत्याः कृपा द्विप्रकारा कथं केन प्रकारेण भवेदिति शेषः। इति कथय वर्णय। यत् यस्मात् ते भवत्याः कृपया अनुकम्पया सः प्रसिद्धः वेधा ब्रह्मा मेधाविनां सुधियाम् अविद्यमानं उपमा यस्य सः अनुपमा अप्रतिमो विहितः कृतः। एषः वर्तमानः शिशुः बालकः अनुदिनानि प्रतिदिनम् प्रातः विरामे स्तवं स्तोत्रं प्रकुरुते अनुतिष्ठति। किन्तु तथापि तव भवत्या अङ्कतातः अनुकम्प्यः कथं कस्मात् न ज़ातः न सञ्जातः।

भावार्थः—हे माता कहिये आपकी कृपा दो तरह की कैसे है। क्योंकि आपकी कृपा से एक ओर ब्रह्माजी मेधावियो में सर्वोत्तम हो गये। और यह शिशु प्रातः काल प्रतिदिन ही आपकी स्तुति कर रहा फिर भी आपका कृपा पात्र न हो सका।।५।।

यद्यप्यहं कृत-परश्शत-पाप-पीनः,
मातस्तथापि शिशुरस्मि नु तावकीनः।
तन्मे कृपां कुरु कृपामयि! यद् लसद्भा,
मद्भारती भवतु भारत-भूमि-भूषा।।६।।

प्रसंगः—अनेन पद्येन कविः मातुः कृपामभिलषति।

अन्वयः—हे मातः! यद्यप्यहं कृतपरश्शत-पापपीनः (अस्मि) तथापि तावकीनः शिशुः नु अस्मि। तत् हे कृपामयि! मे कृपां कुरु, यत् लसद्भा मद्-भारती भारतभूमिभूषा भवतु।

व्याख्याः—हे मातः, हे अम्ब यद्यपि चेत् अहं कविरीशदत्तः शतात् पराणि परश्शतानि कृतानि कृतपरःशतानि पापानि तैः पीनः कृतपरश्शतपापपीनो विहितानेकदुष्कृतस्थूलः 'अस्मि'। तथापि तेन प्रकारेणापि तावकीनस्त्वदीयः शिशुः बालकः अस्मि भवामि नु निश्चये। तत् तस्मात् हे कृपामयि दयामूर्त्ते मे मयि कृपामनुकम्पां कुरु विधेहि। यद् यथा लसन्ती दीप्यमाना भा कान्तिर्यस्याः सा लसद्भा नितरां दीप्तकान्तिः मद्भारती मम भारती इति मद्वाणि-भारतस्य-भूमेर्भूषा भारतभूमिभूषा भारतदेशालङ्कारणी भवतु अस्तु। ब्राह्मी तु भारती भाषागीर्वाग्वाणीसरस्वती। कृपा दयानुकम्पा च इत्यमरः।

भावार्थः—हे माता! यद्यपि मैं सैकड़ो पापों से मोटा हूँ फिर भी तुम्हारा पुत्र ही हूँ इससे हे दयामूर्ति मेरे ऊपर कृपा करो। जिससे मेरी कविता भारत देश का अलंकार हो जाये।।६।।

स्मृत्वा स्थलाम्बुरुह-कोरक-कोमलान्त्वां,
तेजोमयीं कनकचम्पकगुच्छगौरीम्।
यातोऽस्मि कामपि दशां विषमां ययाऽहं,
संमोहितोऽस्मि जडितोऽस्म्यपरीकृतोऽस्मि।।७।।

प्रसंगः—कविः सरस्वत्यां भक्तिं दर्शयति।

अन्वयः—(अहं) स्थलाम्बुरुहकोरककोमलां कनकचम्प- कगुच्छगौरीं, तेजोमयीं त्वां स्मृत्वा कामपि विषमां दशां यातः (अस्मि) यया अहं सम्मोहितः अस्मि, जडितः अस्मि, अपरीकृतः अस्मि।

व्याख्याः—अहम् स्थलाम्बुरुहं तस्य कोरकम् इव कोमला ताम्। स्थलकमलकलिकाकोमलाम्। कनकचम्पकगुच्छगौरीम्-कनकस्य चम्पकं कनकचम्पकं

तस्य गुच्छ इव गौरी ताम्। स्वर्णचम्पकस्तवकगौरीवर्णा तेजोमयीं तेजः अस्त्यस्यामिति तेजोमयी तां तेजः स्वरूपाम् स्मृत्वा ध्यात्वा काम् अनिर्वचनीयाम् अपि विषमां विलक्षणां दशां-स्थितिं यातःगतः अस्मि इति शेषः। यया तेजोमया अहम् ईशदत्तः सम्मोहितोऽस्मि सम्मोहं प्रयातोऽस्मि। जडितोऽचेतनतां गतोऽस्मि न परः अपरः अपरः परः सम्पन्नः कृत इत्यपरीकृतो नपरीकृत इत्यपरीकृतः अन्यत्वं गतोऽस्मि।

भावार्थः—मैं गुलाब की कली के समान कोमल सुनहरे चम्पा के गुच्छे की भांति गौरवर्ण वाली तेजस्विनी तुम्हें स्मरण कर एक अनोखी दशा को पहुँच गया हूँ। जिससे मुझे मोह हो गया है। इतना ही नहीं मैं जड़ सा अपने को अन्य ही समझता हूँ।।७।।

पीयूषिणां विषवताञ्च मदाऽञ्चितानां,
श्यामारुणोज्जवलतया समलङ्कृतानाम्।
लीलावतामलसपक्ष्मललोचनानां,
मातः ! भविष्यति कदा मयि पक्षपातः।।८।।

प्रसंगः—कविः सरस्वत्या देव्याः कृपाकटाक्षं स्वस्मिन् आधातुमिच्छति।

अन्वयः—हे मातः! पीयूषिणां विषवतां मदाञ्चितानां च श्यामारुणोर्ज्ज्वलतया समलङ्कृतानां लीलावतां अलसपक्ष्मलोचनानां पक्षपातः मयि कदा भविष्यति।

व्याख्या—हे मातः हे जननि। पीयूषिणां पीयूषं विद्यते येषु तानि पीयूषीणि तेषाममृतयुक्तानां विषवतां विषमस्ति येषु तानि विषवन्ति तेषां गरलवताम्। मदेनाञ्चितानि मदाञ्चितानि तेषां मद्यविकारमुक्तानां श्यामानि च अरुणानि च उज्ज्वलानि च श्यामारुणोज्ज्वलानि तेषां भावः श्यामारुणेज्ज्वलता तया श्यामारुणोज्ज्वलतया समलंकृतानाम् भूषितानाम्। लीलावतां लीलाः सन्ति येषु तानि लीलावन्ति तेषां, क्रीडालीला च नर्म 'चे' त्यमरः क्रीडावताम्। अलसानि पक्ष्मलानि च तानि लोचनानि अलसपक्ष्मललोचनानि तेषामालस्य-मुक्तरोमराजिसंयुक्तनेत्राणाम् पक्षपातः प्रेमावलोकः मयि-ईशदत्ते कदा कस्मिन् काले भविष्यति-सम्पत्स्यते।

भावार्थः—हे माता! अमृतमयी, तथा विषैले, मदयुक्त, श्यामता अरुणिमा और सफेदी वाले लीलामय आलस्य से भरे पलक वाले नेत्रों को मेरे ऊपर कब दृष्टि होगी।।८।।

नीहार-सार-शिशिरं श्वसितं त्वदीयं,
तन्मन्द-मन्द-मधुरं हसितं त्वदीयम्।
तद्दुग्ध-मुग्ध-वदनं सदनं सुखानां
लब्धा स्तनन्धयशिशुर्नु कदा वदाऽम्ब!।।९।।

प्रसंगः—कविः स्तनपायी शिशुरिव मातुः कृपामभिलषति।

अन्वयः—हे अम्ब! वद (अयं) स्तनन्धयशिशुः नीहार-सारशिशिरं त्वदीयं श्वसितं, तत्-मन्द-मधुरं त्वदीयं हसितं सुखानां सदनं तद् दुग्ध-मुध-वदनं कदा लब्धा।

व्याख्या—हे अम्ब हे मातः वद कथय, अयम्-अहमीशदत्तः स्तनन्ध यशिशुः स्तन्धयतीति स्तनन्धयः स चासौ शिशुश्च स्तनन्धयशिशुः पयःपायी बालकः, नीहारसारशिशिरं नीहारः। अहमम् तस्य सारस्तत्वं नीहारसार इव-शिशिरं तद्, हिमकणशीतलम् त्वदीयं तावकीनं श्वसितं श्वसनम्। तत् प्रसिद्धम् मन्दमन्दमधुरं मन्दं मन्दं यथा स्यात् तथा मधुरं मन्दमन्दं मधुरं तत् त्वदीयं भवदीयं हसितं हसनम्। सुखानां शर्मणाम्। 'शर्मशातसुखानि च' इत्यमरः। सदनम् भवनम् तत् प्रसिद्धम्। दुग्धमुग्धवदनं दुग्धम् इव मुग्धं दुग्धमुग्धं तथोक्तं वदनं दुग्धमुग्धवदनं क्षीरस्निग्धमुखम् कदा कस्मिन्काले लब्धा आप्ता। 'पयःक्षीरं' पयोऽम्बु च', वक्रास्ये वदनं तुण्डमाननं लपनं मुखम् इत्यमरः।

भावार्थः—हे माता मैं दूध पीने वाला बालक, कहिये कब बर्फ से शीतल तुम्हारे श्वास को और धीरे-धीरे होने से मधुर तुम्हारे हंसने को और सुखस्वरूप दूध के समान शुभ्र मुखको देख सकूंगा।।९।।

मातर्निसर्गशशिशीतल-शुक्ति-शुक्ले।
मन्मुग्ध-मानस-मनोहर-राजहंसि।।

लावण्य-लालसित-लोचनलोक-लक्ष्मीं।
द्रक्ष्यामि भारति! कदा तव मञ्जुमूर्तिम्।।१०।।

प्रसंगः—कविः मातुदर्शनमीहते।

अन्वयः—हे मातः! निसर्गशशि-शीतल-शुक्ति-शुक्ले ! मन्मुग्धमानस-मनोहर-राजहंसि! तव लावण्य-लालसितलोचनलोकलक्ष्मीं मञ्जुमूर्ति कदा द्रक्ष्यामि?।।१०।।

व्याख्या—हे मातः। हे जननि। निसर्गशशितलशुक्तिशुक्ले निसर्गेण शशी इव शीतलाया शुक्तिः, निसर्गशशिशीतलशुक्तिस्तद्वत् शुक्ला तथोक्ता तत्सम्बुद्धौ स्वभावचन्द्रशिशिरशुक्तिसिते। मन्मुग्धमानसमनोहरराजहंसि। मम मुग्धं च तत्मानसे मन्मुग्धमानसम् तस्मिन् मनोहरा राजहंसी मन्मुग्धमानसमनोहर-राजहंसी तत्सम्बुद्धौ मन्मुग्धमानसमनोहरराजहंसि। मत्स्निग्धचित्तह्लादकराजहंसि। भारति वाणि तव भवत्त्याः। लावण्यलालसितलोचनलोकलक्ष्मीं। लावण्येन लालसिते लोचने एव लोका लावण्यलालसितलोचनलोकास्तेषां लक्ष्मीः लावण्यलालसितलोचनलोकलक्ष्मीस्तां तथोक्ताम् सौन्दर्यविलसितनेत्रभुवनशोभाम् मञ्जुश्चासौ मूर्त्तिश्च मञ्जुमूर्तिस्तां मञ्जुमूर्त्तिम् मनोज्ञामाकृतिं कदा कस्मिन् काले द्रक्ष्यामि अवलोकयिष्यामि।

भावार्थः—हे माता! मैं स्वभाव से ही चन्द्रमा की भांति शीतल शुक्ति की तरह सफेद मेरे मोहित मन की राजहंसी देवी सरस्वती। सुन्दरता से भरी नेत्रस्वरूप लक्ष्मी देवी की तरह आकर्षक तुम्हारी आकृति को कब देखूंगा।।१०।।

सञ्चार-चारु-चिकुराऽञ्चितमाननन्ते,
विस्मारितेऽपि न हि विस्मृतिमेति मातः!।
संवीक्ष्य यद्रुचिरतां गगनेऽपि चन्द्रो,
मन्दोऽभवत्सकलया कलयाऽन्वितोऽपि।।११।।

प्रसंगः—कविः मातुरविस्मरणीयतां दर्शयति।

अन्वयः—हे मातः! ते सञ्चारचारुचिकुराञ्चितम् आननं विस्मारितेऽपि विस्मृतिं न एति हि यद्रुचिरतां संवीक्ष्य गगने अपि सकलया कलयान्वितोऽपि चन्द्रः मन्दः अभवत्।११।।

व्याख्या—हे मातः। हे जननि! ते तव सञ्चारचारुचिरकुराञ्चितम्। सञ्चारेण चारवो ये चिकुरास्तैरञ्चितं तथोक्तभ्रमणतोहरकेशव्याप्तम् आननम् मुखम् विस्मारिते विस्मृतिं प्रातितेऽपि न नहि विस्मृतिं स्मृतिलोपम् एति गच्छति। यद्रुचिरतमा यस्य रूचिरता यद्रुचिरता ताम् यद्रुचिरताम्। यन्मनोज्ञताम्, संवीक्ष्य विलोक्य गगने नभसि सकलया सम्पूर्णया कलया षोडशात्मकेन भागेन अन्वितोऽपि चन्द्रो विधुः मन्दः प्रभाहीनः अभवत् जातः।

भावार्थः- हे माता! हिलते हुये सुन्दर बालों से व्याप्त आपका मुख भुलाने पर भा नहीं भूलता। जिसकी मनोहर शोभा को देख आकाश में पूर्ण चन्द्रमा भी धूमिल हो जाता है।११।।

मन्ये न ते प्रभविताऽस्मि निबद्धवेणी-
श्रेणीभरे विकच-कोकनदः कदापि।
किन्तेन मञ्जुतम-मञ्जिमनूपुरेऽपि,
प्राप्स्यामि किन्नहि पदं कलशिञ्चितानाम्।१२।।

प्रसंगः—कविरात्मनि हीनतां दर्शयन् विशेषं भक्तिमार्गं दर्शयति।

अन्वयः—(अहं) विकचकोकनदः ते निबद्धवेणी-श्रेणीभरे कदापि प्रभविता न अस्मि (इति) मन्ये। तेन किम् मञ्जुतम-मञ्जिमनूपुरेऽपि (अहं) कलशिञ्जितानां पदं किं प्राप्स्यामि हि?

व्याख्या—'अहम्' विकचकोकनदः, विकचानि कोकनदानि यस्मात् सविकचकोकनदः प्रफुल्लरक्तकमलः मन्ये अंगीकरोमि निबद्धवेणीश्रेणीभरे- निबद्धा चासौ वेणी च निबद्धवेणी तया श्रेणीभरे निबद्धश्रेणीभरे, सम्बद्धकेश-बन्धपङ्क्तिभारे कदापि कर्हिचिदपि न प्रभाविताऽस्मि न स्थातुं योग्योऽस्मि। तेन किम् नातः किमपि हीयते। मञ्जुतममञ्जिमनूपुरे। अतिशयेन मञ्जुमञ्जुतमम्

तथाविधं मञ्जितं च तत् नूपुरञ्च मञ्जुतममञ्जितनुपुरं यस्मिन्तथोक्ते सुन्दररसिता-भूषणविशेष-(नूपुर) वति त्वदीये चरणेऽपि कलशिञ्जितानां कलानि शिञ्जितानि कलशिञ्जितानि तेषां कलशिञ्जितानां शोभनध्वनीनां पदं स्थानं न प्राप्स्यामि न लास्ये हि।

भावार्थः—हे देवि! मैं यह मानता हूँ कि तुम्हारे विकसित लालकमल जिसमें गुथे, हैं ऐसे केशभार में कमल का स्थान अपाल होने से नहीं पा सकता। किन्तु इससे कुछ नहीं बिगड़ा। मैं सुन्दर झंकारों से युक्त नूपुर की ध्वनियों में तो अवश्य ही आश्रय पालूँगा।।१२।।

भाषा स्वभाव-सरसा त्वमहं प्रसङ्गः,
मन्दाकिनी मधुमयी त्वमहं तरङ्गः।
मन्दारबालकलिका त्वमहं तवङ्गः,
ज्योतिर्मयी विजयसे त्वमहं पतङ्गः।।१३।।

अन्वयः—हे मातः! त्वं स्वभावसरसा भाषा अहं प्रसङ्गः। त्वं मधुमयी मन्दाकिनी अहं तरङ्गः। त्वं मन्दारबालकलिका अहं तदङ्गः। त्वं-ज्योतिर्मयी विजयसे अहं पतङ्गः।

व्याख्या—हे मातः त्वं स्वभावेन सरसा स्वभावसरसा प्रकृतिरसमयी भाषा वाणी। अहं प्रसङ्गः भाषाप्रयोगहेतुः। त्वं मधुमयी क्षौद्रवती मन्दाकिनी विशेषा गङ्गा। अहं तरङ्गः वीचिः। त्वं मन्दारस्य बालकलिका मन्दारबालकलिका देवपुष्पकोरकम् अहं तरङ्गः शरीररूपः, त्वं ज्योतिर्मयी प्रकाशरूपा विजयसे, अहं पतङ्गः शलभः अस्मि।

भावार्थः—हे माता! तुम स्वभाव से ही सरस भाषा रूप हो। हम प्रसंग हैं। तुम मधुमयी मन्दाकिनी हो मैं लहर हूँ। तुम मन्दार वृक्ष की कली हो मैं अंग हूँ। तुम प्रखर प्रकाश रूप हो मैं प्रकाश का प्रेमी कीट हूँ।।१३।।

पूर्णाऽसि वाणि! रजनी त्वमहं शशाङ्कः
विद्युच्छटाऽसितदहं सजलो धनाङ्कः।
कस्तूरिका त्वमसि चेत्तदहं मृगाङ्कः
त्वं याऽसि साऽसि परमेष शिशुस्तवाङ्कः।।१४।।

प्रसंग:—कविः सरस्वत्या सह स्वकीयमनन्यसम्बन्धं प्रस्तौति।

अन्वयः—हे वाणि! त्वं पूर्णा रजनी असि अहं शशाङ्कः (अस्मि) (त्वं) विद्युच्छटा असि तत् अहं सजलः धनाङ्कः (अस्मि)। चेत् त्वं कस्तूरिका असि तत् अहं मृगाङ्कः (अस्मि)। त्वं या असि या असि परं एषः शिशुः तव अङ्कः (अस्ति)।

व्याख्या—हे वाणि हे सरस्वति। त्वं पूर्णा सकला रजनी रात्रिः असि। अहं शशांकः चन्द्रः अस्मि। त्वं विद्युच्छटा विद्युतो छटा विद्युच्छटा सोदामिनी शोभा असि तदहं सजलः सलेन सहितः धनाङ्कः पयोदस्वरूपः अस्म्। चेत् यदि त्वं कस्तूरिका मृगमदः असि तद् अहं मृगाङ्गः कस्तूरिकाश्रयः मृगविशेषः अस्मि। एवं स्थिते त्वं या यादृशी असि सा तथाविधा असि परं किन्तु एष शिशुः अयं बालकः तव भवत्या अङ्क क्रोडे अस्ति।

भावार्थ—हे देवि तुम पौर्णमासि की रात्रि हो तो मैं तुम्हारा आश्रित चन्द्रमा हूँ। तुम बिजली हो तो मैं सजल बादल हूँ। यदि तुम कस्तूरी हो तो मैं मृग विशेष हूँ। तुम चाहे जो हो मैं तुम्हारी गोद में ही हूँ।१४।।

चेच्चन्द्रिकाऽसि तदहं चटुलश्चकोरः,
चेत्वं नवाम्बुदघटा तदहं मयूरः।
कल्याणि! कल्पलतिकाऽसि तदाऽस्मि रेणो-
रन्वेषणातुर-तरो रस-रञ्जनोऽहम्।।१५।।

प्रसंग:—कविः सरस्वत्या स्वकीयमन्योन्यसम्बन्धं प्रस्तौतिः।

अन्वयः—(त्वं) चन्द्रिका असि चेत् तत् अहं चटुलः चकोरः (अस्मि)। त्वं नवाम्बुदघटा (असि), चेत् तत् अहं मयूरः (अस्मि)। हे कल्याणि! (यदि त्वं) कल्पलतिका असि तदा अहं रेणोः अन्वेषणातुरतरः रसरञ्जनः (अस्मि)।

व्याख्या—त्वं भवती चेत् यदि चन्द्रिका चन्द्रप्रकाशः असि तत् तदा अहं चटुलः, चञ्चलः चकोरश्चक्रवाकः अस्मि। त्वं चेत् यदि नवाम्बुदघटा

नवानाम् अम्बुदानां घटा नवाम्बुदघटा नूतनमेघसमूहः असि। तत् अहं मयूरा मोर इति लोके प्रसिद्धः पक्षिविशेषः अस्मि। हे कल्याणि, हे शोभने त्वं भवती कल्पलतिका कल्पवल्ली असि। तदा तर्हि अहं रेणोः रजसः, अन्वेषणे 'अतिश्रमेनआतुरः' आतुरतरः, अन्वेषकातुरतरः गवेषणेनितरां संलग्नः रसज्ञः अस्मि। 'वल्ली तु व्रततिर्लता' इत्यमरः।

भावार्थः—यदि तुम चन्द्र-प्रभा हो तो मैं तुम पर आसक्त चकवा हूँ। और यदि तुम सजल मेघों का समूह हो तो मैं मोर हूँ। हे कल्याणमुदे। तुम यदि कल्पलता हो तो मैं तुम्हारी धूलि ढूंढ़नेवाला रसिक हूँ।।१५।।

भूयो निनादय, निनादय वाणि! वीणां,
चञ्चच्चराचरविमोहविधौ प्रवीणम्।
यन्निस्सरत्स्वरसुधा-रसपान-मत्तः,
भूयात्तवायमजरः शिशुरीशदत्तः।।१६।।

प्रसंगः—अत्र पद्ये कविः, मातुः सरस्वत्याः कृपाम् प्रार्थयते।

अन्वयः—हे वाणि! चञ्चच्चराचरविमोह-विधौ प्रवीणां वीणां भूयः निनादय निनादय! यन्निस्सरत्स्वरसुधा-रसपान-मत्तः अयं तव शिशुः ईशदत्तः अजरः भूयात्।

व्याख्या—हे वाणि! सरस्वति चञ्चच्चराचरविमोहविधौ, चञ्चतां चराचराणां विमोहनं विमोहः, चञ्चच्चराचरविमोहस्तस्य विधिसरणिस्तस्मिन् चञ्चच्चराचरवि-मोहविधौ प्रवीणां निपुणां वीणां वाद्यविशेषं भूयः अत्यर्थं निनादय मुहुः वादय यत् यस्मात् निःसरन् यःस्वराणां सुधाया रसः निस्सरत्स्वरसुधारसस्तस्य पानेन मत्तः निस्सरत्वस्वरसुधारसपानमत्तः, निर्गच्छत् षड्जादिस्वरामृतास्वादक्षीणः तव तावकीनः अयं शिशुरेष बाल ईशदत्त इति ग्रन्थकर्तृनाम्कथनम् अजरः जरारहितः भूयात् स्यात्। कवयो हि चिरस्थायिनियिनायासा निर्जरतां प्रयान्ति।

भावार्थः—हे देवि! उस पर इस गतिमान् चराचर स्वरूप संहार को मोहनेवाली वीणा को बारम्बार बजाती रहें। जिससे निकल रहे स्वरामृत के यत्न करने से मतवाला यह तुम्हार शिशु 'ईशदत्त अजर हो जावे।।१६।।

लेखनीं प्रति

अयि लेखनि! लिख्यतां तथा, वरवीरस्य यथा यथा कथा।
क्रियतां च तथा विचारणा, प्रभवेदद्य यया सुधारणा।।१७।।

अन्वयः—अयि लेखनी! यथा यथा वरवीरस्य कथा (अस्ति) तथा लिख्यताम् तथा विचारणा क्रियतां, यया अद्य सुधारणा प्रभवेत्।

व्याख्या—अयि हे, लेखनि यथा येन येन प्रकारेण वरवीरस्य-वरश्चासौ वीरश्च वरवीरस्तस्य श्रेष्ठशूरस्य कथावाक्यप्रबन्धः भवेत्। तथा तेन प्रकारेण लिख्यताम् अङ्कनं क्रियताम्। च अपरं तथा तादृशी विचारणा अव-धारणम् क्रियताम् अनुष्ठीयताम्। यया विचारणया अद्य, इदानीम्, सुधारणा शोभना धारण सुधारणा शोभनः संस्कारः प्रभवेत् स्यात्।

भावार्थः—हे लेखनि, वीर राणा प्रताप की वीरता की जैसी कथा हो वैसी ही लिखो। और ऐसी विचार शक्ति करो, जिससे मुझे अच्छा संस्कार प्राप्त हो।।१७।।

प्रभवेर्न मृषा विलेखने क्वचनाऽपि प्रबले! मम प्रिये।
न च हिन्दुमताभिघातिनी, यवनानां न च पक्षपातिनी।।१८।।

प्रसंगः—कविः महाराणाप्रतापस्य कथां यथार्थां लिखितुं लेखनीम्प्रार्थयते।

अन्वयः—हे प्रबले! मम प्रिये! (लेखनि) क्वचना अपि मृषां विलेखने न हिन्दुमताभिघातिनी च न (प्रभवेः)। यवनानां पक्षपातिनी च न (प्रभवेः)।

व्याख्या—हे प्रबले। उत्कृष्टसामर्थ्यवति मम ईशदत्तस्य प्रिये प्रेमास्पदे त्वं भवती अपि क्वापि मृषा मृषा विलेखनेऽङ्कने न प्रभवेः न समर्था भवेः। च अपरं हिन्दुमताभिघातिनी हिन्दूनां मतमभिहन्ति तच्छीला हिन्दुमताभिघातिनी हिन्द्वभीष्टविनाशिनी न प्रभवेः। च अपरं यवनानां म्लेच्छानां पक्षपातिनी पक्षपाताश्रया न नहि प्रभवेः।

भावार्थः—हे मेरी प्रेमपात्र लेखनी तू कभी भी असत्य न लिखना। और तुझमें हिन्दुओं के अभीष्ट को नष्ट करने का या यवनों के विषय में पक्षपात का भाव न हो।१८।।

कथमेदलम्प्रभा-रतं, भुवनेऽभूदधूना प्रभा-हतम्।
कवि-कल्पलते! विलिख्यता-मिति सर्व सुविविच्य निर्भयम्।१९।।

प्रसंगः—अत्र कविः वीरस्य महाराणाप्रतापस्य कथां भीतिशून्यां लिखितुं कथयति।

अन्वयः—हे कविकल्पलते! अलं प्रभारतं एतद् (भारतवर्षम्) अधुना भुवने कथम् प्रभाहतम् अभूत् इति सर्वं निर्भयं सुविविच्य विलिख्यताम्।

व्याख्या—हे कविकल्पलते, कवीनां कल्पलता कविकल्पलता तत्सम्बुद्धौ हे कविकल्पलते कविकल्पवल्लि अलम् अत्यर्थम् प्रभारतम् प्रभया रतम् प्रभारतम् कान्तिमद् एतद् इदम् भारताख्यं वर्षम् अधुना अद्यत्वे भुवने जगत्यां कथं केन प्रकारेण प्रभाहतम् प्रभया हतम् प्रभाहतम्, कान्तिरहितम् अभूत् जातम् इति एतत् सर्वं सकलम् निर्भयं भयरहितं यथा स्यात् सुविविच्य सुविचार्य विलिख्यताम् अङ्कनेन प्रदर्श्यताम्।

भावार्थः—हे कवियों की विचारशक्ति रूपा लेखनी, यह अत्यन्त चमकीला भारत आजकल कैसे कान्तिहीन हो गया। इस सब अर्थ को निर्भीक हो ही कर विचार कर कृपया लिखें।१९।।

क्षणं समीक्षणम्

न या स्वकीयं विजहाति भारतं, मदानने नृत्यति चाऽप्यनारतम्।
सरस्वती सा जननीव मद्वचः, कथं न कुर्यात् प्रतिभा-प्रभारतम्।।२०।।

प्रसंगः—अत्र कविः यथार्थतां लिखितुं लेखनीम्प्रार्थयते।

अन्वयः—या स्वकीयं भारतं न विजहाति (या) मदाननेऽपि अनारतं नृत्वति न जननी इव सा सरस्वती मद्वचः प्रतिभा-प्रभा-रतं कथं न कुर्यात्।

प्रसंग:—अत्र कवि: सरस्वत्यां मातर्यात्मीयमादरं दर्शयति।

व्याख्या—या वाणी स्वकीयं स्वकस्येदं स्वकीयमात्मीयं भारतं भारतवर्षं न नहि जहाति परित्यजति। या देवी सरस्वती मदानने मम आननं मदाननं तस्मिन् मदानने मदीयमुखे अपि अनारतम् अजस्त्रं नृत्यति नर्तनं करोति सा सरस्वती जननी माता इव मद्वच: मम च: मद्वचस्तत् प्रतिभाया: प्रभया रतम् प्रतिभाप्रभारतम् तत् बुद्धिविशेषकान्तिमत् कथं केन प्रकारेण न कुर्यात् न विदध्यात्। किन्तु कुर्यादेव। अत्र भारतम्-प्रभारतम् इत्यत्र यमकमलंकार: तल्लक्षणं च साहित्यदर्पणे-सत्यर्थे पृथगर्थाया: स्वरव्यञ्जनसंहते: क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते इति। वंशस्थवृत्तम्- जतौ तु वंशस्थमुदीरितं जरौ; इति लक्षणात्।

भावार्थ:-जो देवी सरस्वती भारत को कभी नहीं छोड़ती। और मेरे मुख में भी निवास किया करती है। वह माता की भाँति मेरी वाणी को प्रतिभाशालिनी अवश्य ही कर देगी।।२०।।

भणच्चलच्चित्रपटप्रिये जने, वृथा यथा शास्त्र-पुराण-जल्पना।
तथाऽद्य यूनां निवहे प्रभा-हते, वृथाऽस्मदीया रण-कीर्ति-कल्पना।।२१।।

प्रसंग:—कवि: कथां कथयितुमुद्यतते।

अन्वय:—यथा भणच्चलच्चित्रपटप्रिये जने शास्त्रपुराणजल्पना वृथा, तथा अद्य प्रभाहते यूनां निवहे अस्मदीया रणकीर्ति-कल्पना वृथा।

व्याख्या—यथा येन प्रकारेण भणच्चलच्चित्रपटप्रिये-भणन्तश्चलन्तश्च ये चित्रपटा भणच्चलचित्रपटास्ते प्रिया यस्य स: भणच्चलच्चित्रपटप्रियस्तस्मिन् भणच्चलच्चित्रपटप्रिये- वदद्भ्रमच्चित्रफलकासक्तवतिजने पुंसि शास्त्रपुराणजल्पना-शास्त्राणि च पुराणानि च शास्त्रपुराणानि तेषां जल्पना शास्त्रपुराणजल्पना शास्त्रपुराणवर्णनम् वृथा मुधा। तथा तेन प्रकारेण अद्य इदानीम् यूनां तारुण्यवतां निवहे समूहे प्रभाहते प्रभया कान्त्या हते रहिते तथा अस्मदीया मामकीना रणकीर्तिजल्पना-रणस्य कीर्तेर्जल्पना रणकीर्तिजल्पना युद्धकीर्तिवर्णनम् वृथा निष्प्रयोजना।

भावार्थः—जैसे आजकल 'चलचित्र' आदि देखने में लगे हुये लोगों के लिये शास्त्र पुराणों का वर्णन मिथ्या होता है। ठीक उसी तरह जवान लोगों के तेज रहित हो जाने से मेरी यह युद्ध की कीर्ति कथा निष्फल है।।२१।।

प्रतापसिंहस्य तथाऽपि वर्णनं, मया यथाशक्ति स-भक्ति चित्रिता।
पवित्रिता भारतभूरियं यया पवित्रयिष्यत्यथ किन्न साऽद्य नाम्।।२२।।

प्रसंगः—प्रतापसिंहस्य कथावर्णनाय कविः प्रयतते।

अन्वयः—तथाऽपि मया यथाशक्ति सभक्ति प्रतापसिंहस्य वर्णना चित्रिता। यथा इयं भारतभूः पवित्रिता अथ अद्य सा (वर्णना) किं माम् न पवित्रयिष्यति।

व्याख्या—तथापि एवं सत्यपि मया कविनेशदत्तेन यथाशक्ति शक्तिमनतिक्रम्य आत्मशक्तिमनुसृत्य सभक्ति भक्त्या सहेति सभक्ति श्रद्धानुसारं प्रतापसिंहस्य एतन्नामकस्य वीरस्य वर्णना चरित्रलेखनम् चित्रिता अङ्किता। यया वीरवरकथया इयमेषा भारतभूः भारतस्य भूः भारतभूः भारतभूमिः पवित्रिता शुचिता प्रापिता। अथ अनन्तरम् अद्य इदानीं सा तस्य वीरस्य कथा माम् ईशदत्तम् किं कस्मान्न पवित्रयिष्यति शुद्धं करिष्यति। अवश्यमेव शुचिं विधास्यतीति भावः।

भावार्थ—इतना होने पर भी मैंने अपनी शक्ति और भक्ति के अनुसार प्रताप सिंह की कथा का वर्णन किया है। जिस वीरवर की कथा से यह भारतीय भूमि पवित्र हो गयी है। अब यह कथा क्या मुझे न पवित्र करेगी। अवश्य ही पवित्र कर देगी।।२२।।

न यस्य देशे, रतिरस्त्यनुत्तमा, न वा स्वधर्मव्यथयाऽऽकुलम्मनः।
न तत्कृतेऽसौ सफलो मम श्रमः, किमस्ति मिष्टं कपये पयः क्वचित्।।२३।।

प्रसंगः—कविः देशप्रेमशून्यान् नरांस्तिरस्करोति।

अन्वयः—यस्य रतिः देशे अनुत्तमा नास्ति (यस्य) मनः स्वधर्म-

व्यथया आकुलं न वा। तत्कृते मम असौ श्रमः सफलः न। किं क्वचित् कपये पयः मिष्टम् अस्ति।

व्याख्या—यस्य पुंसः देशे राष्ट्रे जन्मभूमावित्यर्थः अनुत्तमा न विद्यते उत्तमो यस्याः अनुत्तमा सर्वश्रेष्ठा रतिः प्रियता न अस्ति विद्यते। वा अथवा यस्य जनस्य मनश्चेतः सधर्मव्यथा-स्वस्य धर्मस्य व्यथा स्वधर्मव्यथा तया निजसुकृतक्लेशेन आकुलं पूर्ण न अस्ति भवति। तत्कृते तदर्थम् असौ अयं मम मदीयः श्रमः परिश्रमः सफलः सप्रयोजनः न नह्येवास्ति। किं क्वचित् कर्हिचित् कपये वानराय पयः दुग्धम् मिष्टम् मधुरम् अस्ति भवति।

भावार्थः—जिस पुरुष का अपनी जन्मभूमि में प्रेम नहीं है। या जिसका चित्त अपने धर्मानुष्ठान में लगा नहीं है। उसके लिए यह मेरा वीर चरित्र वर्णनरूप श्रम, हो सकता है व्यर्थ हो जाय। क्या कभी वानर को दूध मीठा लगता है।।२३।।

अलङ्कृतिर्नैव रसो, गुणोऽथवा न रीतिरत्रास्ति तथाप्यसौ कृतिः।
न कस्य मोदं वितनोत्यदूषणं विभूषणाऽप्यङ्क-गता वधूरिव।।२४।।

प्रसंगः—कविः स्वकाव्यरोचनं दर्शयति।

अन्वयः—अत्र अलङ्कृतिः नैव (अस्ति) रसः गुणः अथवा रीतिः (अपि) नास्ति। तथापि विभूषणापि अङ्कगता वधूरिव असौ अदूषणा कृतिः कस्य मोदं न वितनोति?

व्याख्या—अत्र अस्मिन् मद्रचिते काव्ये अलंकृतिरुपमादिरलंकारः न एव न नह्यस्ति। रसः श्रृंगारादिः, गुणः प्रसिद्धः ओज आदिः अथवा रीतिः, वैदर्भ्यादिः न अस्ति नैव विद्यते। तथापि-एवं सत्यपि अदूषणा-नास्ति। दूषणं यस्यां सा तथोक्तादोषरहिता असौ इयं कृतिः कविर्नाम विभूषणा विगतानि भूषणानि यस्याः सा अपि अङ्के गता अङ्कगता क्रोडप्राप्ता विभूषणा अलङ्कारभूषणानि यस्याः सा अपि अङ्के गता अङ्कगता क्रोडप्राप्ता विभूषणा अलङ्कारहीना वधू-नाम् इव कस्य जनसामान्यस्य मोदमानन्दं न तनोति न विस्तारयति। अपि तु

सर्वेभ्य आनन्ददा भविष्यति, इति भावः। पद्येस्मिन्नुपमालंकारः तल्लक्षणन्तु साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमाद्वयोः इति।

भावार्थः—यद्यपि मेरे इस काव्य में अलंकार, रस, गुण, अथवा रीति ये आवश्यक काव्यगुण नहीं है। फिर भी दोषो से रहित यह काव्य अलंकार से रहित गोद में उपस्थित स्त्री की भांति किसके आनन्द को न फैलायेगा-किन्तु सभी के लिए आनन्दवर्धक होगा।।२४।।

मनोजमूर्च्छन्मदिरामदालसाः, मनोज्ञ-'हाला'-रसपानलालसाः।
पठन्तु वा नैव पठन्तु का क्षतिः वृथैव तैषां न विधीयते नतिः।।२५।।

प्रसंगः—कामिनः मद्यपानासक्तः काव्यमिदं पठन्तु वा न पठन्तु एवं सत्यपि न मदीया कपि क्षतिः इति दर्शयति।

अन्वयः—मनोजमूर्च्छन्मदिरामदालसाः मनोज्ञ-'हाला' रसपानलालसाः (जानाः) (इमां कृतिं) पठन्तु वा नैव पठन्तु का क्षतिः वृथैव तेषां नतिः न विधीयते।

व्याख्या—मनोजमूर्च्छन्मदिरामदालसाः, मनसि जायते इति मनोजः स इव मूर्च्छन्ती या मदिरा तस्या मदेनालसास्तथोक्ताः मनोज्ञहालरसपानलालसाः। मनोज्ञा चासौ हाला च मनोज्ञहाला तस्या रसस्य पाने लालसा येषान्ते तथा-विधाः, मनोहरसुराद्रवसेवनाभिलाषां जनां पठन्तु अधीयताम्। वा अथवा न एव नह्येव पठन्तु अधीयताम् का क्षतिः हानिः वृथा मुधा एव तेषां जनानां नतिः प्रणामः न नर्हि विधीयते क्रियते मयेतिशेषः।

भावार्थः—कामदेव की भाँति विचलित करने वाली मदिरा के मद से आलसी और सुरम्य सुरा के पीने के इच्छुक व्यक्ति मेरी कविता को पढें या न पढें। इसमें मेरी कोई हानि नहीं है। इसलिए व्यर्थ ही उन्हे मैं प्रणाम नहीं करता।।२५।।

उपक्रमक्रमः

व्यनक्ति लोके महिमाऽऽलयः सदा, यदीयलोकोत्तरतां हिमालयः।
स राजते भारत-भूतलाञ्चले, विराजते भारतवर्षनामभाक्।।२६।।

प्रसंगः—कविः भारतस्य स्थितिं दर्शयति।

अन्वयः—महिमालयः हिमालयः यदीयलोकोत्तरतां लोके सदा व्यक्ति सा भारभूतलाञ्चले राजते (हिमालयेन युक्तः) भारतवर्षनामभाक् (असौ देशः) विराजते।

व्याख्या—महिमालयः! महिम्नः आलयो महिमालयः गुरुत्वधाम हिमालयो हिमस्य आलयो हिमालयः तुषारगृहम् 'हिमालय' इति प्रसिद्धः पर्वतविशेषः। यदीयलोकोत्तरताम् लोकेभ्य उत्तरोलोकोत्तरस्तस्य भावो लोकोत्तरता। यस्येयं यदीया तथोक्ता लोकोत्तरता यदीयलोकोत्तरतां तथातथोक्तां यत्सम्बन्धिभुवनश्रेष्ठतां व्यक्तिं प्रदर्शयति। सा पूर्वोक्ता भारतभूतलाञ्चले। भारतस्य भूतलं भारतभूतलम्। तस्य अञ्चले तथोक्ते। भारतभूम्येकभागे राजते शोभते। 'तदुक्तः।' भारतवर्षनामभाक्-भारतवर्षम् इति नाम भारतवर्षनाम तद्भजत इति भारतवर्षनामभाक्। 'भारतवर्ष' इति नामा 'देशः' विराजते, विशेषेण शोभते।

भावार्थ—महिमाशील हिमालय जिसकी भुवनमण्डल में श्रेष्ठता प्रदर्शित करता है ऐसा हिमालय जिसके एक भाग में विराजता है। उसीसे युक्त यह भारतवर्ष नामक देश विख्यात है।।२६।।

सदैव गङ्गा-यमुना-सरस्वती नदी-तरङ्गाऽऽलुलितो महामहाः।
जगत्त्रयेश-प्रिय-वेषवान् हि यः स एष देशः किल कस्य न प्रियः।।२७।।

प्रसंगः—पवित्रतमगंगादिनदीसंयुक्तस्य भारतस्य मनोहरत्वं प्रस्तौति।

अन्वयः—यः हि सदैव गङ्गा-यमुना-सरस्वतीनदी तरङ्गालुलितः, महामहाः जगत्त्रयेशप्रियवेषवान् (अस्ति) सः एषः देशः कस्य न प्रियः किल?

व्याख्या—यः प्रस्तुतः हि निश्चयेन सदैव निरन्तरं गंगायमुनासरस्वती नदी-तरंगालुलितः-गंगा च यमुना च सरस्वती-च इति गङ्गायमुनासरस्वत्याद्यः नद्यः, तासां तरंगैः आलुलितः, तथोक्तो गंगायमुनासरस्वतीसरिदूर्मिप्रक्षालितः। महामहा महत् महोदस्य स महामहाः प्रभूतैश्वर्यः। जगत्त्रयेशप्रियवेशवान्-जगतां त्रयम् जगत्रयन्तस्य योऽधीशः तस्य प्रियः वेषोऽस्मास्तीतिजगत्रयेश

प्रियवेशवान् भुवनत्रयाधीशेष्टस्वरूपः विष्णुवेषधारक इति यावत् 'अस्ति'। सः प्रागभिहितः एषः अयं देशः राष्ट्रं भारतम् कस्य जनविशेषस्य न न ह्येव प्रियः प्रेमपात्रं किल इति निश्चये।

भावार्थ—जो यह भारत देश गंगा-यमुना सरस्वती जैसी नदियों के तरंगों से निरन्तर व्याप्त है। और अधिक ऐश्वर्ययुक्त विष्णु तुल्य प्रिय स्वरूप वाला है ऐसा देश किसे प्रिय नहीं है किन्तु सभी का प्यारा है।।२७।।

कृपाण-कुन्तादिकशस्त्र-झङ्कृता, सदैव वीरोचितहुङ्कृताऽङ्किता।
प्रताडिताऽराति-ततिस्तदङ्कगा विभाति मेवाड़ मही महीयसी।।२८।।

प्रसंगः—सम्प्रति कविर्भारतमध्यगामेवाड़भूमिम्प्रस्तौति।

अन्वयः—कृपाणकुन्तादिकशस्त्रझङ्कृता, सदैव वीरोचितहुङ्कुताङ्किता, प्रताडिताऽराततितिः महीयसी तदङ्कगा मेवाड़मही विभाति।

व्याख्या—तदङ्कगा-तस्याङ्कं गच्छतीति तदङ्कगा भरतक्रोडस्थिता कृपाणकृन्तादिकशस्त्रझङ्कताः-कृपाणश्च कुन्तश्च आदौ येषान्तानि कृपाणकुन्तादिकानि तानि-शस्त्राणि च तैः झङ्कृता तथोक्ता करनालप्रासादिविविधप्रहरणशब्दिता सदा सर्वदा एव वीरोचितहुङ्कृताङ्किताविराणामुचितानिहुङ्कृतानिवीरोचितहुङ्कृतानि तैरङ्किता शूरयोग्यहुंकारख्याता। प्रताडितारातिततिः। प्रताडिताअरातीनां ततयो यस्यां सा तथोक्ता प्रपीडितशत्रुसमूहामहीयसी अतिशयेन महती इति महीयसी पूजनीया मेवाड़मही मेवाड़धरित्रीर्विभाति नितरा द्यौतते।

भावार्थ—उसी भारत के अन्दर स्थित तलवार, आला आदि हथियारों की झंकार से पूर्ण वीरों की हुंकार वाली जिसमें अनेकों बार शत्रु समूह दलित हुए है ऐसी मेवाड़भूमि प्रकाशित हो रही है।।२८।।

दुरन्त 'मोहम्मद' मोहमर्दनं, पुरा पुरारातिमयी चकार या।
चितौड़नाम्नी किल तत्र वर्तते, पुरी सुधीरोरुण-वृन्द-वन्दिता।।२९।।

प्रसंगः—मेवाड़स्थितां चित्तौडभूमिं वर्णयति।

अन्वय—तत्र सुधीरोरुज-वृन्द-वन्दिता 'चित्तौड़' नाम्नी पुरी वर्तते किल। पुरारातिमयी या पुरा दुरन्तमोहम्मदमोहमर्दनं चकार।

व्याख्या—तत्र मेवाड़भागे, सुधीरोरुजवृन्दवन्दिता-सुधीराणां, ऊरुजास्तेषां वृन्दे वन्दिता-धृतिमद्वैश्यसमूहसंस्तुता चित्तौड़नाम्नी चित्तौड़ इत्याख्याता पुरी नगरी वर्तते, अस्ति किल इति निश्चये। पुरातिमयी-पुरस्य-अरातिः पुरारातिः सः प्रकृतोऽस्त्यक्त इति पुरारातिमयी पुरदैत्यशत्रुशिवाधिष्ठिता या पूः पुरा अतीतेऽनेहसि मोहम्मदमोहमर्दनम्-मोहम्मदस्य मोहस्य मर्दनम् मोहम्मदमोहमर्दनम्-मोहम्मदनामकयवनाभिमानभङ्गं चकार कृतवती।

भावार्थ—उसी मेवाड़भूमि के अन्तर्गत धैर्य सम्पन्न वैश्य समूहों से संस्तुत चित्तौड़ नाम की नगरी है। भगवान् शिवजी से व्याप्त जिस पुरी ने प्राचीन समय में मोहम्मद के घमण्ड को चूर्ण कर दिया था।।२९।।

इहैव बध्वो युगपत्सहस्रशः, सुकोमला हा कलिकाऽङ्कुरादपि।
स्वधर्म-संरक्षण-हेतवे तनुं, विदग्धवत्यो ज्वलने तृणोपमाः।।३०।।

प्रसंगः—कविनाचित्तौड़नगरी, एव वर्णपते।

अन्वय—हा, इहैव कलिकाङ्कुरादपि सुकोमलाः तृणोपमाः सहस्रशः वध्वः स्वधर्मसंरक्षणहेतवे ज्वलने तनुं विदग्धवत्यः।

व्याख्या—हा इति शोके 'हाविवादशुगर्तिषु इत्यमरः' इह अस्याम् एव चित्तौड़नगर्यां कलिकाङ्कुरात्-कलिकायाः अङ्कुरः कलिकाङ्कुरस्तस्मात् करकाप्ररोहात् अपि सुकोमलाः सुकुमाराः तृणोपमास्तृण उपमा यासान्तादेहं तृणवद्गणयन्त्यः सहस्तशः असंख्या वध्यः स्त्रियः स्वधर्मसंरक्षणहेतवेस्वस्य धर्मस्य संरक्षणम् एव हेतुः स्वधर्मसंरक्षपदहेतुस्तस्मै आत्मधर्मपरित्राणर्थम् ज्वलनेवह्नौ तनुदेहं विदग्धवत्यः भस्मसाच्चक्रुः।

भवार्थ—अत्यन्त शोक की बात है। यहीं चित्तौड़ नगरी में कलियों के अंकुर से भी अधिक कोमल हजारों कुलवधुओं ने तृण की भाँति अपने को समझकर धर्म बचाने के लिए शरीर को अग्नि में जला दिया।।३०।।

'सिसौदिया' वंशवतां नृणामियं, महा-महाभारत-रङ्गभूरभूत्।
विबोधयन्ती च विपक्षिणं क्षयं, खमुच्छिता-वैजय-वैजयन्तिका।।३१।।

प्रसंगः—कविः चित्तौड़नगरीमेव वर्णयति।

अन्वय—इयं 'सिसौदिया' वंशवतां नृणां महामहाभारतरङ्गभूः अभूत् (अस्यां) विपक्षिणां क्षयं विबोधयन्ती वैजयवैजयन्तिका खम् उच्छिता च।

व्याख्या—इयं चित्तौड़नगरी-सिसौदिया इति नामकः वंशो विद्ययेषां ते वंशवन्तस्तेषाम् सिसौदिया इति प्रसिद्धकुलजानाम् नृणां जनानां महामहाभारतरंगम्-महच्च तद्महाभारतं महामहाभारतन्तस्य रङ्गभूः महामहाभारम्-विस्तृत-महाभारतयुद्धक्रीड़ास्थलम् अभूत् जाता। 'अपि' च इयम् विप विरुद्धानां क्षत्रूणां क्षयं नाथं विबोधयन्ती इदम् वियत् उच्छिता उन्नतावैजयवैजयन्तिका-विजय एव वैजयस्तस्य वैजयन्त्येव वैजयन्तिका, तथोक्ता विजयपताका तत् स्थिता वर्तते इति दोषः। पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम् इति कोशः।

भावार्थ—यह चित्तौड़ नगरी सिसौदिया वशं में उत्पन्न राजाओं की महाभारत युद्ध की भूमि हो गयी। इतना ही नहीं यह शत्रुओं के विनाश को प्रदर्शित कर रही आकाश की ओर उठ हुई विजय पताका की भाँति स्थित है।।३१।।

समेहि वीरोऽसि यदि त्वमन्यथा, विधेहि नूनं सहसा पलायनम्।
सदा वदन्तीव जनान्समागतान्, अहर्दिवं या गगनङ्गताऽभवत्।।३२।।

प्रसंगः—कविश्चित्तौड़नगरीं प्रशंसति।

अन्वय—या सदा समागतान्-जनान्'यदि त्वं वीरः असि समेहि अन्यथा नूनं सहसा पलायनं विधेहि' इति वदन्ती इव अहर्दिवं गगनङ्गता अभवत्।

व्याख्या—या विजयपताका सदा सर्वदा समागताम् समायातान् जनाम् नृन् यदि त्वम् वीरः शूरः असि विद्यसे तर्हि समेहि आगच्छ समरार्थमितिशेषः। अन्यथा विपक्षे नूनं निश्चयेन सहसा झटिति पलायनम् अपसरणं विधेहि कुरु। इति वदन्ती कथयन्ती इव अहर्दिवम् अहश्च दिवा च इत्यहर्दिवम्-तत्तन्दिवम् गगनङ्गता आकाशमाश्रित्य स्थिता अभवत्-अभूतं

भावार्थ—जो विजयपताका सदा ही आये हुए लोगों को, 'यदि तुम वीर हो तो आओ-नहीं तो सचमुच ही शीघ्र भाग जाओं'। यह कहती हुई सदैव आकाश में विराजमान रहती है।।३२।।

गता न या सप्तशताब्दकाऽवधि, प्रतापिनीत्वात् परिपन्थि वश्यताम्।
इयं पुरी सैव महामनस्विनी, ध्वजावती, तच्छिरसा नमस्यताम्।।३३।।

प्रसंगः—चित्तौड़नगरीं कविः नमस्करोति।

अन्वय—या प्रतापिनीत्वात् सप्तशताब्दकावधि परिपन्थि वश्यताम् न गता। तत् सा एव महामनास्विनी ध्वजावती इयं पुरी शिरसा नमस्यताम्।

व्याख्याः—या-चित्तौड़नगरी प्रतापिनीत्वात् प्रतापः अस्त्यस्या इति प्रतापिनी तस्या भावः प्रतापिनीत्वं तस्मात्-ऐश्वर्यमुक्तत्वात् सप्तशताब्दकावधि अब्दान्येवाब्दकानि शतम् अब्दकानि सप्त च तानि शताब्दिकानि सप्तशताब्दकानि। सप्तशताब्दकानि अवधिर्यस्य तत् पूर्वोक्तं सप्तशतवर्षकालसीमानं यावत् परिपन्थि वश्यताम्। वशं गतो वश्यः परिपन्थिनां वश्यः परिपन्थिवश्यस्तस्यस्वभावः परिपन्थिवश्यता ताम् तथोक्तां शत्रुजनाधीनतां न गता न याता। सा पूर्वोक्ता एव इयम् एषा महामनस्विनी महती याप्तौ मनस्विनी च महानस्विनी अधिकमहिमसंयुक्ता पुरी नगरी शिरसाशीर्ष्णा नमस्यताम् प्रणम्यतां जनैरिति शेषः।

भावार्थ—जो चितौड़ नगरी अपने प्रताप के कारण सात सौ वर्षो तक शत्रुओं के अधीन न हो सकी। ऐसी इस महिमाशालिनी नगरी को लोगों को शिर से प्रणाम करना चाहिए।।३३।।

प्रतापी-प्रतापः

अभूत्पुरा भारत-भा-विभासकः, स एकलिङ्गस्य सदङ्घ्र्युपासकः।
महाबली दुर्गचित्तोड़-शासकः, प्रतापसिंहः परताप-नाशकः।।३४।।

प्रसंगः—कविः चित्तौड़रशास्तारं प्रतापसिहं वर्णयति।

अन्वयः—पुरा महाबली प्रतापसिंहः दुर्गचित्तौड़शासकः अभूत् सः भारतभाविभासकः एकलिङ्गस्य सदङ्घ्र्युपासकः प्रतापनाशकः (च आसीत्)।

व्याख्याः—पुरा पुरोवर्त्तिनिकाले महाबली महद्बलमस्यास्तीतिमहाबली बलिष्ठः दुर्गचित्तौड़शासकः। दुर्गश्चासौ चित्तौड़श्च तस्य शासकः। दुर्गचित्तौड़स्याधीश्वरः प्रतापसिंहः एतन्नामकः क्षत्रियः अभूत्। सः पूर्वोक्तः भारतभाविभासकः। भारतस्य भावभासयति इति भारतभाविभासकः भारतवर्षकान्तिविस्तारकः। एकलिंगस्य-एकलिंगनाम्नो भगवतो महाकालस्य सदङ्घ्युपासकः सतोरङ्घ्र्योरुपासकः शोभनचरणसेवकः परतापनाशकः परेषां तापं नाशयति इति परतापनाशकः अत्यपीडानिवारकः आसीत् पदङ्घ्रिश्चरणोऽस्त्रियान् इति कोशः।

भावार्थ—प्राचीन काल में अत्यन्त बलशाली प्रतापसिंह राजा हुए जो चित्तौड़ का शासन करते थे। ये भारतीय गरिमा को फैलाने वाले भगवान् महाकाल के सेवक दूसरों की पीड़ा को दूर करने में तत्पर थे।।३४।।

अटाट्यमानो ह्यटवीषु सन्ततं, स्वतन्त्रतार्थी, सकलत्रपुत्रकः।
अवाप दुखं न हि किं व्यथाऽऽकुलः स वीरतायास्तनयो वरान्वितः।।३५।।

प्रसंगः—कविः प्रतापसिंहं वर्णयति।

अन्वयः—वरान्वितः वीरतायास्तनयः सकलत्र-पुत्रकः स्वतन्त्रतार्थी व्यथाकुलः सः अटवीषु सन्ततम् अटाट्यमानः किं दुखं न हि अवाप।

व्याख्याः—वरान्वितः वरेण अन्वितः। प्राप्ताशीर्वादः। वीरतायाः वीरस्य भावो वीरता तस्याः शूरतायास्तनयः पुत्रः। परमशूरः। सकलत्रपुत्रः कलत्रेण पुत्रेण च सहितः सकलत्रपुत्रका स्वतन्त्रतार्थी-स्वतन्त्रता एव अर्थः अस्य अस्तीति स्वतन्त्रतार्थी स्वातन्त्र्याभिलाषी व्यथाकुलः व्यथया दुःखेन आकुलः व्यथाकुलः पीडितः सः प्रतापसिंहः अटवीषु वनेषु अटाट्यमानः कुटिलं परिभ्रमम् किं कतिविधं दुःखं कष्टं न अवाप न हि लेभे किन्तु बहु-विधं कष्टं सिषेवे।

भावार्थ—वरदान पाये हुए वीरता के पुत्र यह प्रताप सिंह स्त्री पुत्र

सहित स्वतन्त्रता की इच्छा रखकर बहुत पीड़ा से आकुल थे। और जंगलों मे इधर उधर बहुत प्रकार के कष्टों को सहते रहे।।३५।।

अनाथ-नारीजन-शोक-शोचनः, गवां द्विजानां गलदश्रुमोचनः।
स एक एवाऽभवदार्थ-रोचनः, समुल्लसल्लोहित-लोल-लोचनः।।३६।।

प्रसंग:—कविः महाराणाप्रतापं वर्णयति।

अन्वयः—समुल्लसल्लोहितलोललोचनः गवां द्विजानां गलदश्रुमोचनः, अनाथनारीजनशोकशोचनः स एकः एव आर्य-रोचनः अभवत्।

व्याख्या—समुल्लसल्लोहितलोललोचनः। समुल्लसन्ती लोहिते लोले च लोचने यस्य स तथोक्तः सुशोभितसक्तचञ्चलनेलः। गवां धेनूनां द्विजानाम्ब्राह्मणानां गलदश्रुमोचनः गलन्ति अश्रूणि तेषां मोचनः पतन्नेत्रजलप्रमार्जकः। अनाथनारीजनशोकशोचनः अनाथा ये नारीजना अनाथनारीजनास्तेषां शोकं शोचतीति तथा निराश्रयस्त्रीजनः शोकक्षुब्धः सः शूरः एक एव एकल एव आर्यरोचनः, आर्येभ्यो रोचत इत्यार्यरोचन आर्यालंकारः, अभवत्-सञ्जातः।

भावार्थ—देदीप्यमान चञ्चल रक्तनेत्रों बाले महाराणा प्रताप, निराश्रित स्त्रियों के शोक से चिन्तित गायों और ब्राह्मणों के गिर रहे आंसुओं को पोछने वाले (उनके कष्टों के हर्ता) अकेले आर्य जाति के भूषण थे।।३६।।

मुमोच कोपात्तरुणाऽरुणाऽधरः कच-प्रबन्धान् यवनीजनस्य यः।
स हिन्दुना केन स-रक्त बिन्दुना, न लालनीयो जगदेकरत्नवत्।।३७।।

प्रसंग:—कविरस्मिन् पद्ये प्रतापसिंहस्य पराकमं वर्णयति।

अन्वयः—तरुणाऽरुणाधरः यः कोपात् यवनीजनस्य कचप्रबन्धान् मुमोच। सरक्तबिन्दुना केन हिन्दुना सः जगदेकरत्नवत् लालनीयः न।

व्याख्या—तरुणः अरुणः अधरो यस्य सः तरूणारूणाधरः पुष्टरक्ताधरोष्ठः यः प्रतापसिंहः क्रोधात् अमर्षात् यवनीजनस्य यवनी च । सौजनश्च यवनीजनस्तस्य यवनस्त्रीवर्णस्य कचप्रबन्धान् कचानां प्रबन्धाः कचप्रबन्धा-

स्तान् तथोक्तान् केशपाशग्रन्थीन् मुमोच शैथिल्यं निनाय। सः सरक्तविन्दुना रक्तविन्दुना सह वर्तते इति सरक्तविन्दुस्तेन सरक्तविन्दुना शोणितयुक्त-विन्दुनाकेनिविशिष्टेन पुंसा-जगदेकरत्नवत् जगतएकेन रत्नेन तुल्यम् इति जगदेकरत्नवत् भुवनविशिष्टमविखिनलालनीयः न आदरणीयः।

भावार्थ—पुष्ट और लाल अधरोष्ट वाले महाराणाप्रताप ने क्रोध से यवन ललनाओं के केशपाशदी लेकर दिये। ऐसे यह वीर किस शूर द्वारा संसार के प्रधान रत्न की भाँति शरीर में अन्तिम रक्तकण रहते-रहते आदरणीय नहीं है। अर्थात् सभी के आदरपात्र हैं।।३७।।

विशालवक्षा अधिपाणि भासयन्, महाकरालं करवाल-कालकम्।
इवेन्द्रवज्रः स महीध्रमण्डलान् जघान लोकेषु शठान् हठान्वितान्।।३८।।

प्रसंगः—अत्र पद्ये कविः प्रतापसिंहस्य पराक्रमं दर्शयति।

अन्वयः—इन्द्रवज्रः महीध्रमण्डलान् इव विशालवक्षः सः अधिपाणि महाकरालं करवालकालकम् भासयन् लोकेषु हठान्वितान् शठान् जघान।

व्याख्या—विशालवक्षा विशालं वक्षः यस्य सः विशालवक्षाः विस्तीर्णवक्षस्थलः सः प्रतापसिंहः महाकरालं भयङ्करं करवालकालकम् करवाल एव कालः करवालकालकस्तम् तथोक्तम् कालतुल्यं खड्गमधिपाणिपाणौ इत्य-धिपाणिहस्ते भासयन् दधानः। हठान्वितान् हठेन अन्विता हठान्वितास्तान् हठोपेतान् शठान् दुष्टान्। इन्द्रस्य वज्रः इन्द्रवज्रः इन्द्रायुधोऽशनिरिव महीध्राणां मण्डलान् महीध्रमण्डलान् पर्वतसमूहान् इव जघान पातयामास।

भावार्थ—विस्तीर्ण सीने वाले प्रतापी प्रताप ने भयंकर तलवार हाथ में लेकर 'हठी दुष्टों को जैसे इन्द्र ने वज्र से पर्वतों का विनाश किया था' मार डाला।।३८।।

प्रसन्नचेता बलिनां धुरन्धरः, लसल्लाटः परिणद्ध-कन्धरः।
नवाब्ज-नेत्रः शरदिन्दुसुन्दरः स वेषतोऽभूद् भुवने पुरन्दरः।।३९।।

प्रसंगः—अत्र पद्ये कविः प्रतापस्य सौन्दर्यं वर्णयति।

अन्वयः—नवाब्जनेत्रः, शरदिन्दुसुन्दरः, लसल्ललाटः परिणद्धकन्धरः, प्रसन्नचेताः बलिनां धुरन्धरः सः भुवने वेषतः पुरन्दरः अभूत्।

व्याख्या—प्रसन्नचेताः प्रसन्नं चेतो यस्य सः प्रसन्नचेताः प्रमुदितान्तः करणः बलिनां बलं विद्यते येषां ते बलिनस्तेषां सत्ववतां धुरन्धरः अग्रणीः लसल्ललाटः लसद्ललाटोयस्य सः लसल्लाटः शोभनमस्तकः। परिणद्ध-कन्धरः परिणद्धा कन्धरा यस्य सः परिणद्धकन्धरः परिपुष्टग्रीवा। नवाब्जनेत्रः। नवे अब्जे इव नेत्रेयस्य सः नवाजनेक्तः। नूतनजलनाक्षः। शरदिन्दुसुन्दरः शरदः इन्दुरिवसुन्दरः। तथा। शरदर्तुचन्द्रमनोज्ञः। सः प्रसिद्धः भुवने लोके वेषत आकृतितः अपि पुरन्दरइन्द्रः अभूत् आसीत्।

भावार्थ—प्रसन्नचित्त बलवानों में श्रेष्ठ उन्नत मस्तक वाले जिनकी आंखे कमल की भाँति थी। गला पुष्ट था। यह शरदऋतु के चन्द्रमा की तरह सुन्दर, लोक में इन्द्र से थे।

अकिञ्चनैः कल्पतरुप्रभीकृतः,
स्वयं विडौजा इति वीरवन्दितः।
धृतोऽरिभिः काल इव स्व-मानसे
स कल्कि-कल्पः कलित कलौ जनैः।।४०।।

प्रसंगः—कविः प्रतापसिंहं प्रशंसति।

अन्वयः—सः (महाराणाप्रतापः) अकिञ्चनैः कल्पतरुप्रभीकृतः स्वयं विडौजा इति वीरवन्दितः स्वमानसे काल इव धृतः जनैः कलौ कल्किकल्पः कलितः।

व्याख्या—सः प्रसिद्धः प्रतापसिंहः। अकिञ्चनैः धनरहितैः, कल्पतरुप्रभीकृतः कल्पतरोः प्रभाकल्पतरुप्रभा सा इव कृतः। कल्पवृक्षसंज्ञकदेवद्रुमकान्तिभिः कृतः स्वयम् आत्मना विडौजा इन्द्रः, इन्द्रो मरुत्वान् मघवा विडौजाः पाकशासनः, इत्यमरः इति वीरैर्वन्दितोवीरवन्दितः' शूरनमस्कृतः। अरिभिः। स्वमानसे स्वस्य मानसे स्वमानसे निजचित्ते कालो मृत्युः इव धृतः स्थापितः।

जनैः लोकैः कलौ कलिनाम्नियुगे कल्किकल्पः कल्केरीषूदनः कल्किकल्पः कल्किभगवत् तुल्यः कलितः स्वीकृतः आसीत् इति शेषः।

भावार्थ-निर्धन जनकल्प वृख के समान देखते थे और वीरजन इन्द्र के समान समझकर प्रणाम करते थे। शत्रु इन्हें काल की भांति और बहुत से लोग युग में कल्कि भगवान् की तरह मानते थे।।४०।।

क्षणे क्षणे यस्य रणे रतिर्भवेत्, पदे पदे यो विनिपातयेदरीन्।
तदद्य किं विस्मय-कारणं बुधाः!, गृहे-गृहे सम्प्रति चेत्स पूज्यते।।४१।।

प्रसंगः—कविः महाराणाप्रतापस्य पूजार्हर्तादर्शयति।

अन्वयः—हे बुधाः! यस्य रतिः क्षणे-क्षणे रणे (एव) भवेत्, यः अरीन् पदे-पदे विनिपातयेत्। चेत् सः सम्प्रति गृहे-गृहे पूज्यते, तदद्य विस्मयकारणं किमस्ति।

व्याख्या—हे बुधा! हे सुधियः। यस्य पुंसः क्षणेक्षणे प्रतिक्षणं सदेति यावत् रणे संग्रामे रतिरनुरागः भवेत् स्यात्। 'तथा' यः शूरः पदे पदे प्रत्येकस्मिन् आक्रमणे अरीन् शत्रून् विनिपातयेत् विनाशं नयेत्। स ईदृशः सम्प्रति, इदानीम् चेत् यदि गृहे गृहे प्रतिभवने पूज्यते सत्क्रियते। तत् तर्हि अद्य अद्यत्वे किम् इति प्रश्ने विस्मयस्य कारणम्, विस्मयकारणम् आश्चर्यहेतुः- न कोऽपीत्यर्थः। विस्मयोऽद्भुतमाश्चर्यम् इत्यमरः।

भावार्थ—हे सुधीजनों! जो पुरुष हर समय युद्ध में उत्कण्ठा रखे। और जो हर आक्रमण में शत्रुओं को नष्ट कर दें। ऐसे जन की यदि घर घर में पूजा हो तो कोई आश्चर्य नहीं है।।४१।।

स्व-वैरि-सैन्ये सहसा प्रवेशतः, स्ववेशतो भीमतमं तमो नयन्।
प्रतापसिंहो निजसिंहनादतः, प्रकम्पयामास न कस्य मानसम्।।४२।।

प्रसंगः—कविः प्रतापसिंहं वर्णयति।

अन्वयः—स्ववैरिसैन्ये सहसा प्रवेशतः स्ववेशतः भीमतमं तमः नयन् प्रतापसिंहः निजसिंहनादतः कस्य (शत्रोः) मानसम् न प्रकम्पयामास?

व्याख्या—स्ववैरिसैन्ये-स्ववैरिणां सैन्ये स्ववैरिसैन्ये-निजशत्रुसेनायां सहसा झटिति प्रवेशतः अगमनात् स्वस्य वेशात् इति स्ववेशतः निजाकृतितः। भीमतमम् अतिशयेन भीमम्, नितरां भयानकम् दारुणं भीषणं भीष्मं घोरं भीष्मं भयानकम् इत्यमरः, तमः अन्धकारं नयन् जनयन्। प्रतापसिंहः प्रतापसिंहनामा वीरः। निजसिंहनादः निजस्य सिंह इव नादो निजसिंहनादस्तमात् आत्मकेसरिगर्जनात् कस्य-शत्रुसामान्यस्य मानसे मनः न प्रकम्पयामास वेपयाञ्चकार।

भावार्थ—शत्रुओं के सैन्यबल में सहसा घुसकर और अपनी विशेष आकृति से भय उत्पन्न कर रहे प्रतापसिंह ने किसके मन को कम्पित नहीं कर दिया। अर्थात् सभी कांप उठते थे।

देश-दशा

बभूव लोकोत्तरभव्यभाग्यवान्, महामहीपो मुगलान्वये महान्।
न राजराजैर्विहितप्रणामको जगत्प्रसिद्धोऽर्कवरेति-नामकः।।४३।।

प्रसंगः—कविः प्रतापसिंहस्य काले वर्तमानां देशदशां वर्णयति।

अन्वयः—मुगलान्वये अर्कवरेति नामकः महान् जगत्प्रसिद्धः लोकोत्तरभव्यभाग्यवान् महामहीपः बभूव। राजराजैः सः विहितप्रणामकः (आसीत्)।

व्याख्या—मुगलान्वये, मुगलानाम् अन्वयो मुगलान्वयस्तस्मिन्। 'मुगल' इति नाम्ना प्रसिद्धे वंशे। संततिगोत्रजननकुलान्यभिजनान्वयो वंशोऽन्ववायः सन्तानः इत्यमरः। महान्-नितरांश्रेष्ठः। जगत्प्रसिद्धः। जगति प्रसिद्धः, लोके विदितः लोकोत्तरभव्यभाग्यवान्। लोकेभ्य उत्तरं भव्यञ्च भाग्यमस्यास्तीति लोकोत्तरभव्यभाग्यवान्। जनाधिकश्रेष्ठनियतिकः। दैवं दिष्टं भागधेयं भाग्यं स्त्रीनियतिर्विधिः'इत्यमरः। अर्कवर इति नामकः। अर्कबर' इत्यभिधेयवान् महामहीपः-महांश्चासौ महीपश्च महामहीपः महाराजः बभूव अभूत्। सः प्रसिद्धः। राजराजैः। राज्ञां राजानो राजराजास्तैः राजराजैः महीशस्वामिभिः विहित-प्रणामकः विहितः प्रणामो यस्मै सः विहितप्रणामकः। कृतप्रणतिकः

'आसीत् बभूव। अत्र वंशस्थवृत्तम्। तल्लक्षणन्तु-जतौ तु वंशस्थमुदीरितं जरौ-इति।

पितामहो यस्य महापराक्रमी, गुणेन नाम्ना च बभूव 'बर्बर:'।
विजित्य'पानीपत'-युद्धमत्र यः प्रसिद्धतामाप धराप-मण्डले।।४४।।

प्रसंग:—कविः अर्कबरपूर्वजं पराक्रमिणं बर्बरं वर्णयति।

अन्वय:—यस्य महापराक्रमी पितामहः नाम्ना गुणेन च 'बर्बर:' बभूव। यः अत्र पानीपतयुद्धं विजित्य धरापमण्डले प्रसिद्धताम् आप।

व्याख्या—यस्य अर्कवरस्य। महापराक्रमी महान् पराक्रमः अस्यास्तीति महापराक्रमी, अधिकबली। पितामहः पितुः पिता इति विग्रहः पितृजनकः गुणेन नाम्ना नामधेयेन च वर्वरः क्रूरः बभूव-अभवत्। यः वर्वरः, अत्र भारते देशे पानीपतयुद्धम्-पानीपतस्य युद्धम् पानीपतयुद्धन्तत्। पानीपतस्थानसंग्रामं विजित्य-धारायमण्डले-धराम्पान्ति इति धरायाः आतोऽनुपसर्गे कः इति पातेः कः। तेषां मण्डले धराप- मण्डले क्षितिपसमूहे प्रसिद्धतां ख्यातिम् प्राप अलभत्।

भावार्थ—जिसका महाबली बाबा 'बाबर' नाम और गुण से बर्बर क्रूर था। और जो इस भारत में पानीपत की लड़ाई को जीतकर राजाओं के मध्य में विख्यात हो गया।।४४।।

पिता च यस्य क्षिति-राजरञ्जनः, 'हुमायुँ नामा रिपुरोष-भञ्जनः।
प्रभञ्जस्तस्य सुतो भवेन्न किं, विपक्षि-सेन्यङ्गत-गर्व-गञ्जनः।।४५।।

प्रसंग:—अत्र कविः अर्कवरपितरं हुमायुँ नामानं वर्णयति।

अन्वय:—यस्य 'हुमायूँ' नामा पिता क्षितिराज-रञ्जनः रिपु-रोष-भञ्जनः च (आसीत्) किं तस्य सुतः विपक्षि-सैन्यङ्गत-गर्व-गञ्जनः प्रभञ्जनः न भवेत्।

व्याख्या—यस्य अर्कवरस्य पिता जनकः हुमायुँ नामा हुमायुँ इत्यभिधेयकः क्षितिराजरञ्जनः राजानस्तेषां रञ्जनः क्षितिराजरञ्जनः। महीशतुष्टिदः। रिपुरोषभञ्जनः रिपूणां रोषं भनक्ति इति रिपुरोषभञ्जनः। शत्रुक्रोधविनाशकः च

आसीत् तस्य-हुमायुँ नाम्नः मुगलस्य सुतः सूनुः विपक्षिसैन्यङ्गतगर्वभञ्जनः, विपक्षिणां सैन्यङ्गतः यो गर्वः विपक्षिसैन्यङ्गतगर्वस्तस्यगञ्जनस्तथा शत्रुसेनागताभिमाननिवारकः प्रभञ्जनः वायुः इव किं न कस्मान्न भवेत् स्यात्।

भावार्थ—जिस अकबर का पिता हुमायुँ पृथ्वी में राजाओं को प्रसन्न करने वाला हो। उसका पुत्र अकबर शत्रुओं की सेना में वर्तमान घमण्ड को दूर करने वाला वायु के तुल्य कैसे न हो।।४५।।

छली रिपुर्भारतवर्षभू-भुवां स कूटनीतौ प्रथितो भुवस्तले।
यम-प्रतिस्पर्धि-विशुद्ध हैन्दवं, निनाय नाशं क्रमशः पराक्रमम्।।४६।।

प्रसंगः—कविरर्कवरमहत्त्वं वर्णयति।

अन्वयः—भारतवर्षभूभुवां रिपुः, भुवस्तले कूटनीतौ प्रथितः सः छली यमप्रतिस्पर्धिविशुद्धहैन्दवं पराक्रमम् क्रमशः नाशं निनाय।

व्याख्या—छली छलमस्यास्तीति छली कपटी- भारतवर्षभूभूवाम्-भारतवर्षस्यभूः भारवर्षभूः। तस्याम्भवन्ति इति भारतवर्षभूभुवस्तेषान्तथोक्तानां भारतवर्षमहीजन्मनाम्, रिपुः शत्रुः भुवस्तले क्षितिपृष्ठे कूटनीतौ छलव्यवहारे प्रथितः प्रसिद्धः सः अर्कबरः। यमप्रतिस्पर्धिविशुद्धहैन्दवं यमप्रतिस्पर्धत इति यमप्रतिस्पर्धी तादृशंविशुद्धं हैन्दवं यमप्रतिस्पर्धिविशुद्धहैन्दवं शमनतुल्यविशुद्ध-हिन्दुसम्बन्धितम् पराक्रमं बलं क्रमशः शनैः शनैः नाशं क्षयं निनाय अगमयत्।

भावार्थ—छली, भारतीयों के शत्रु, पुथ्वी पर कूटनीति में प्रसिद्ध अकबर ने विनाशक होने के कारण यमराज सदृश हिन्दुओं के बल को धीरे-धीरे नष्ट कर दिया।।४६।।

स हिन्दुहा हिन्दुभिरेव सन्ततं, विधाय सङ्गं बलतश्च लोभतः।
तदीयकन्याजन-सङ्गमाऽऽकुलः, चकार तांस्तानखिलान् पदाश्रितान्।।४७।।

प्रसंगः—कविः, सम्राट् अर्कवरः हिन्दुभ्यः-पदानि प्रदत्तवान् इति वर्णयति।

अन्वयः—बलतः लोभतश्च हिन्दुभिः एव सन्ततं सङ्गं विधाय तदीयकन्याजन-सङ्गमाकुलः सः हिन्दुहा अखिलान् तांस्तान् पदाश्रितान् चकार।

व्याख्या—हिन्दुहा आर्यविनाशकः सः अर्कवरः बलतः पराक्रमतः लोभतः वित्तादिप्रदानतः च हिन्दुभिः आर्यों एव सन्ततं निरन्तरं सङ्गं सम्बन्धं विधाय कृत्वातदीयकन्याजनसङ्गमाकुलः, तेषामिमास्तदीयाः, तदीयाः कन्याजनास्तदीयकन्याजनास्तासुसङ्गमायाकुलः, तथोक्तः। हिन्दुकन्यारमणाभिलाषी सन् अखिलान् समग्रान् तास्तान्सम्बन्धिनो जनान् पदाश्रितान् पदमाश्रिताः पदाश्रिताः तान्पदाश्रितान् पदभाजः चकारकृतवान्।

भावार्थ—हिन्दुओं के विनाशक उस अकबर ने बलपूर्वक और लोभ से हिन्दुओं से मेल-जोल बढ़ाया। और उनकी कन्याओं में सम्भोग की इच्छा से उन्हें 'ओहदे' अनेक पद दे दिया।

अथेत्थमेव प्रविधाय दुष्कृतिं, महादयालोर्दयया वशीकृतः।
तदीय-सैन्याऽधिपतिस्तदाऽभवत्, स मानसिंहो महितो महीतले।।४८।।

प्रसंगः—कविः अर्कवरः सम्बन्धिने मानसिंहाय सेनाधीशतां प्रायच्छत् इति वर्णयति।

अन्वयः—अथ तदा महादयालोः दयया वशीकृतः महींतले महितः सः मानसिंहः इत्थम् एव दुष्कृतिं प्रविधाय तदीयसैन्याधिपतिः अभवत्।

व्याख्या—अथ अनन्तरं तदा तस्मिन् काले महादयालोः महांश्चा सौदयालुश्च महादयालुस्तस्य महादयालोः परमकृपावतः, दयया अनुकम्पया वशीकृतः वंशगतः महीतले क्षितितले महितः आहतः सः प्रसिद्धः मानसिंहः-तन्नामा क्षत्रियः इत्थम् एव एवमेव दुष्कृतिं निन्दितं कर्म प्रविधाय कृत्वा तदीयसैन्याधिपतिः तस्य इदं तदीयं-तदीयं सैन्यं तदीयसैन्यं तस्य अधिपतिस्तदीयसैन्याधिपतिः अर्कवरसेनाधिपः अभवत् जातः।

भावार्थ—फिर कुछ समय बाद अधिक दयालु अकबर की कृपा से मानसिंह आकृष्ट हो गये। इस प्रकार का अकबर से सम्बन्ध रूप निन्दित कार्य करके मानसिंह उसकी सेना के पति हो गये।।४८।।

प्रतापप्रतिज्ञा

सिंहासने स हि 'महेन्द्र' पदेऽभिषिक्तो
लोके बभावतितरां जगदेकवीरः।
नैसर्गिको भवति हेम-घट प्रभावान्
मार्तण्डरश्मि-रुचिरस्य पुनः कथा का।।४९।।

प्रसंगः—कविरीशदत्तः प्रतापसिंहस्य महिमानं वर्णयति।

अन्वयः—जगदेकवीरः सः सिंहासने महेन्द्रपदेऽभिषिक्तः लोकेऽतितरां बभौ। हि हेमघटः नैसर्गिकः प्रभावान् भवति। पुनः मार्तण्डरश्मिरुचिरस्य (प्रतापस्य) का कथा।

व्याख्या—जगदेकवीरः जगति, एकश्चासौवीरश्चजगदेकवीरः भुवनप्रधानशूरः। त्रिष्वथो जगती लोको विष्टपं भुवनं जगत् इत्यमरः। सः प्रतापसिंहः सिंहासने-आस्यतेऽस्मिन्नित्यासनं सिंहचिह्नाङ्कितासने महेन्द्रपदे- महेन्द्रस्यपदमहेन्द्र-पदन्तस्मिन् महेन्द्रपदे-इन्द्रस्थाने अभिषिक्तः कृताभिषेकः लोके भुवनेऽतितरां नितरां बभौ शुशुभे। हि यतः हेमघटः हेम्नः घटः हेमघटः सुवर्णकुम्भः नैसर्गिकः प्राकृतिकः प्रभावान् प्रभा अस्यास्तीतिप्रभावान् कान्तियुक्तः 'भवति जायते'। पुनः भूयः मार्तण्डरश्मिरुचिरस्य-मार्तण्डस्य रश्मिभिः हेतुभिः रुचिरः मार्तण्डरश्मिरुचिरस्तस्यमार्तण्डरश्मिरुचिरस्य सूर्यकान्तिप्रकाशितस्य का अवर्णनीया-कथा-वर्णनीयता-अस्तीतिशेषः। पद्येऽस्मिन्नार्थान्तरन्यासोऽलंकारः।

भावार्थ—संसार में अद्वितीय वीर महाराणाप्रताप सिंहासन में बैठकर इन्द्र समान शोभित होते थे। क्योंकि सोने का घड़ा प्रकृति से ही चमकीला होता है। फिर उस पर सूर्य की किरणें भी पड़ें तो क्या कहना।।४९।।

'मेवाड़-मण्डलः-मणिः स महाप्रतापी,
दृष्ट्वा दशां विमल-भारतवर्ष-मध्ये।
इत्थं चकार जगतां प्रथितां प्रतिज्ञां,
प्रज्ञां नियोज्य निपुणश्च विचार्य विज्ञान्।।५०।।

प्रसंगः—कविः प्रतापकृताम्प्रतिज्ञां वक्तुमुपक्रमते।

अन्वय—मेवाड़-मण्डलमणिः-महाप्रतापी सः विमलभारतवर्षमध्ये (दयनीया) दशां दृष्ट्वा प्रज्ञां नियोज्य विज्ञान् निपुणं विचार्य च, जगतां प्रथिताम् इत्थं प्रतिज्ञां चकार।

व्याख्या—मेवाड़मण्डलमणिः-मेवाड़स्य मण्डलस्य मणिः मेवाड़मण्डल-मणिः, मेवाड़भूभागरत्नमिव महाप्रतापी-महान्प्रतापः सः अस्यास्तीति महाप्रतापी विशिष्टतेजस्कः सः प्रसिद्धः प्रतापसिंहः विमलभारतवर्षमध्ये-विमलम्भारतवर्षं त्रिमलभारतवर्षं तस्य मध्येविमलभारतवर्षमध्ये पवित्रभारतखण्डान्तराले 'दयनीयां दशामवस्थां दृष्ट्वा विलोक्य प्रज्ञां बुद्धिं नियोज्य संयोज्य विज्ञान्-सुधियः'निपुणं सावधानतया विचार्य सम्मन्य च जगतां लोकानां प्रथितामम्प्रख्याम् प्रतिज्ञां संकल्पम् इतं वक्ष्यमाणप्रकारेण चकार कृतवान्।

भावार्थ—मेवाड़रत्न महाप्रतापी प्रतापसिंह ने इस भारत की दयनीय दशा को देखकर एकाग्र बुद्धि हो विद्धानों से परामर्श किया। अनन्तर संसार में प्रसिद्ध यह प्रतिज्ञा की।।५०।।

यावत्प्रभाहतमदो मम भारतं मा,
भूयः प्रभा-रतमलं भुवने भवेद्वै।
तावत्कदापि कथमप्यति नैव नूनं,
यास्यामि जन्मनगरं नगरं गरीयः।।५१।।

प्रसंगः—प्रतापविहितं प्रतिज्ञां कविराह।

अन्वयः—यावत् मम अदः प्रभाहतम् भारतं भुवने भूयः वै अलम् प्रभारतम् मा भवेत् तावत् नूनं (अहं) कथयपि (स्वकीयं) गरीयः नगरं जन्मनगरम् अपि कदापि नैव यास्यामि।

व्याख्या—यावत् यावत् समयपर्यन्तम् अदः एतत् प्रभाहतं प्रभया हतं प्रभाहतं कान्तिक्षीणं मम प्रतापसिंहस्य भारम् भारतभूमिः। भुवने लोके भूयः पुनः अलम् अत्यर्थं यथा स्यात्तथा प्रभारतं प्रभारतं-कान्तिसम्पन्नम्-'स्युः

प्रभारूक्रुचिस्त्विड्भाभाश्चविद्युत्दीप्त्यः इत्यमरः। न भवेत् नैव स्यात्। तावत् तावत्कालपर्यन्तं कदापि कस्मिन्नपि कथमपि केनापि प्रकारेण गरीयः श्रेष्ठं नगरं पुरं जन्मनगरं जन्मनोनगरं जन्मनगरं तत् तथोक्तमात्मनो जन्मभूमिं नूनं निश्चयेन न एव न ह्येव यास्यामि गमिष्यामि। अत्र प्रभाहतम्-प्रभारतम् इत्यत्र अनुप्रासोऽलंकारः। तल्लक्षणं यथा दर्पणे-अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् इति।

भावार्थ—जबतक मेरा यह भारत जो कान्तिरहित है फिर से कान्तिमान् नहीं हो जाता तबतक मैं अपनी श्रेष्ठ जन्मभूमि में निश्चित ही कभी पैर न रखूंगा।५१।।

अत्स्यामि पत्रपुटके न पुनर्न हैमे,
वत्स्यामि वर्ण-भवने विजने न हर्म्ये।
स्थास्याम्यहं भुवि तृणासनकेषु तेषु,
न त्वच्छ-रत्न-रचितेषु नृपासनेषु।।५२।।

प्रसंगः—कविः प्रतापकृतां प्रतिज्ञां वर्णयति।

अन्वयः—अहं पत्रपुटके अत्स्यामि, न पुनर्न हैमे (पात्रे) विजने पर्णभवने वत्स्यामि हर्म्ये न भुवि तृणासनकेषु स्थास्यामि अच्छरत्नरचितेषु तेषु नृपासनेषु तु न।

व्याख्या—अहम् प्रतापसिंहः, भारतस्य पराधीनताकालं यावत् पत्रपुटके पत्राणाम्पुटकं पत्रपुटकं तस्मिन् पत्रपुटके पत्रनिर्मितेपात्रे 'दोना इति प्रसिद्धे' क्षत्सयामिभो क्षये। न नहि पुनः भूयः, हैमे हेम्नो विकारो हैमन्तस्मिन् सुवर्णमयेपात्रे। विजने जनरहिते वने पर्णभवने पर्णानाम्भवनम्पर्णभवनन्तस्मिन् पर्णभवने तृणादिनिर्मिते गृहे वत्स्यामि निवासं करिष्यामि। हर्म्ये धनिनां वासेन। भुवि पृथिव्यां तेषु प्रागभिहितेषु तृणासनकेषु-तृणनिर्मितविष्टरेषु स्थास्यामि स्थितिं विधास्यामि। अच्छरत्नरचितेषु-अच्छै रत्नैः रचितेषु-अच्छरत्नरचितेषु निर्मलमणिखचितेषु नृपासनेषु नृपस्य आसनानि नृपासना नृपासनेषु नृपोपवेशानार्हसिंहासनादिषु तु न, कदाचिदपि न स्थास्यामि।

भावार्थ—मैं प्रतापसिंह भारत की पराधीनता पर्यन्त निर्जन जंगल में रहूँगा उत्तम घरों में नही। सुनहरे बर्तनों को त्याग कर पत्तों से बने दोनों में भोजन करूँगा। और राजाओं के बैठने के लिए उपयुक्त मणिजटित सिंहासन आदि छोड़कर पृथ्वी पर घासफुस से बने आसनो पर ही बैठूँगा।

जाज्वल्यमानकिरणोऽस्तु दिनेषु चन्द्रः,
सूर्यः, समुल्लसतु पश्चिमदिक्प्रदेशात्।
शुष्कः स्वतो भवतु कल्पतरुः परन्तु,
व्यर्था भविष्यति न मद्विहिता प्रतिज्ञा।।५३।।

प्रसंगः—कविः प्रतापस्य प्रतिज्ञायाः तद्व्यवहार्यं सत्यत्वं दर्शयति।

अन्वयः—चन्द्रः दिनेषु जाज्वल्यमानकिरणः अस्तु सूर्यः पश्चिमदिक्प्रदेशात् समुल्लसतु कल्पतरुः स्वतः शुष्कः भवतु परन्तु मद्विहिता प्रतिज्ञा व्यर्था न भविष्यति।

व्याख्या—चन्द्रःशशी दिनेषु दिवसेषु जाज्वल्यमानकिरणः-जाज्वल्यमानाः किरणा यस्य सः जाज्वल्यमानकिरणः प्रदीप्तमयूखः किरणोस्रमयूखा-शुगभस्तिघृणिरस्मयः इत्यमरः अस्तुभवतु। सूर्यः सवितापश्चिमदिक्प्रदोषात् पश्चिमादिक्पश्चिमदिक्तस्याः प्रदेशः पश्चिमदिक् प्रदेशस्तस्मात् पश्चिमदिक् प्रदेशात् प्रतीचीकाष्ठाभागात् 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः इत्यमरः समुल्लासतु द्योतताम्। कल्पतरुः कल्पवृक्षः स्वतः स्वयं शुष्को नीरसः भवतु अस्तु। परन्तु किन्तु मद्विहिता मयाविहिता मद्विहिता-प्रतापसिंहकृता प्रतिज्ञासङ्कल्पनम् व्यर्था निष्फला न भविष्यति न यास्यति।

भावार्थ—चन्द्रमा दिन में ही प्रकाश देने लगे। सूर्य पश्चिम में उगने लगे । कल्पवृक्ष स्वयं ही सूख जाय किन्तु मेरी यह बनी हुई प्रतिज्ञा असत्य न होगी।।५३।।

या मञ्जुनूपुररवैः रमणी-मणीनां,
पीयूषतोऽपि मधुरैर्मधुरा पुराऽऽसीत्।

श्रेयं ''चित्तौड़' नगरी नगरीष्वनन्या,
कस्याऽद्य नैव हृदयं हठतो दुनोति।।५४।।

प्रसंग:—कविः चित्तौड़नगर्याः प्रतापसिंहाधिष्ठितायाः दुर्दशां वर्णयति।

अन्वयः—पुरा नगरीष्वनन्या या चित्तौड़ नगरी रमणीमणीनां मधुरैः मञ्जूनूपुररवैः पीयूषतः अपि मधुरा आसीत्। सा इयं (चित्तौड़ नगरी) अद्य कस्य हृदयं हठतः नैव दुनोति।

व्याख्या—या-प्रसिद्धा इयम् पुरा पूर्वकाले नगरीषु पुरीषु अनन्या नास्ति अन्या यस्याः सा अनन्या अद्वितीया चित्तौरनगरी चित्तौड़-इति कथ्यमाना पुरी रमणीमणीनां रमण्यो मणय इव रमणीमणपस्तासां स्त्रीरत्नानां मधुरैः प्रियैः मञ्जुनूपुररवैः नूपूराणां रवानू पुररवाः मञ्जवो नूपूररवाः भञ्जुनूपूरः सूलास्तैस्तथोक्तः मनोहरचरणालंकृतिशब्दैः पीयूषतः सुधातः पीयूषममृतं सुधा इत्यमरः। मधुरा हृत्प्रिया आसीत्। सा तादृशी इयं दुर्दशां गता चित्तौड़नगरी अद्य-इदानीं कस्य देशवासिनः हृदयं मानसे न दुनोति-नोपतापयति। किन्तु सर्वस्य देशवासिनश्चित्तं व्यक्तं।

भावार्थ—प्राचीन काल में जो चित्तौड़नगरी श्रेष्ठ स्त्रियों के अमृत से भी अधिक आनन्दप्रद नूपूरों की झंकार से मधुर रहा करती थी। वही आज सभी के मानस को हठतः दुःखित बना देती है।।५४।।

याऽऽसीत् पुरा हरितशस्यदलाऽभिरामा,
स्निग्धाभ्रनील-वसना कृत-सर्वकामा।
सा जन्म-भूः प्रतिपदं नररक्तरक्ताऽ-
भक्ताऽद्य जीवति कथञ्चिदहोऽत्यशक्ता।।५५।।

प्रसंग:—कविर्मातुर्भूमेः दुर्दशां वर्णयति।

अन्वयः—अहो! पुरा या हरितशस्यदलाभिरामा स्निग्धाभ्रनीलवसना कृतसर्वकामा (च) आसीत् अभक्ता अत्यशक्ता, प्रतिपदं नररक्तरक्ता सा जन्मभूः अद्य कथञ्चित् जीवति।

व्याख्या—अहो-इत्याश्चर्ये या जन्मभूमिः पुरा पूर्वम् हरितशस्यदलाभिरामा शस्यानां दलानि शस्यदलानि हरितानि शस्यदलानि हरितशस्यदलानि तैः अभिरामा हरितशस्यदलाभिरामाश्रमधान्यकाण्डमनोहरा, स्निग्धाभ्रनीलवसना स्निग्धम् अभ्रं स्निग्धाभ्रमं तदेव नीलं वसनं यस्याः साः स्निग्धाभ्रमनीलवसना निविडमेघकृष्णवस्त्राः, अभ्रं मेघो वारिवाहः स्तनयित्नुर्वलाहकः इत्यमरः कृतसर्वकामा कृतः सर्वः कामो यस्याः सा कृतसर्व कामा सञ्जातसम्पूर्णाभिलाषा आसीत्। सा पूर्वोक्ता जन्म भूः जन्मभूमिः अद्य इदानीम् अभक्ता न भक्ताः सन्ति यस्यां सा अभक्ता सेवकजनरहिता-अत्यशक्ता अतिशयेन अशक्ता अत्यशक्ता सामर्थ्यरहिता प्रतिपदं स्थाने-स्थाने नररक्तरक्ता नराणां रक्ते रक्ता नररक्तरक्ता जनशोणितशेणिता कथञ्चित् येन केनापि प्रकारेण जीवतिश्वसिति।

भावार्थः—यह आश्चर्य ही है कि जो जन्मभूमि पहिले हरे सस्यदलों से सुन्दर ओर घने मेघरूप वस्त्र वाल सभी इच्छाओं से भरपूर थी। वहीं आज सेवकों से हीन, असमर्थ, लोगो के रक्त से रंजित किसी प्रकार से जी रही है।।५५।।

क्वापि प्रतारणमलं ललनाजनानां,
दृष्ट्वा क्वचित् सुरजनप्रतिमाऽपमानम्।
हिन्दून्विलोक्य च पशूनिव हन्यमानान्,
हा!! हृत्तलं भवति मे शतधा विदीर्णम्।।५६।।

प्रसंगः—कविः देशस्य दुर्दशां वर्णयति।

अन्वयः—हा क्वापि ललनाजनानाम् अलं प्रतारणम् क्वचित् सुरजनप्रतिमापमानं दृष्टा, पशूनिव हन्यमानान् हिन्दून् च विलोक्य मे हृत्तलं शतधा विदीर्णं भवति।

व्याख्या—हा-इति विषादे हाविषादशुगर्तिषु इत्यमरः क्वापि कुत्रचित् ललनाजनानां ललनाचासौ जनश्च ललनाजनस्तेषां ललनाजनानां कुलस्त्रीलोकानाम् अलम् अत्यर्थ प्रतारणम् पीडनम् क्वचित् कस्मिंश्चित् स्थाने सुरजनप्रतिमापमानम् सुराश्चते जनाश्च सुरजनास्तेषाम् प्रतिमानामपमानस्तम् सुरजनप्रतिमापमानम्

देवजनमूर्तितिरस्कारम् दृष्ट्वा विलोक्य पशून् इव हन्यमानान् हिन्स्यमानान् हिन्दून्-हिन्दून् जनांश्च विलोक्य दृष्ट्वा मे मम प्रतापस्य हृत्तलं मानसपटलं शतधा अनेकधा विदीर्ण भिन्नम् भवति सञ्जायते।

भावार्थ—खेद है कहीं स्त्रियां सतायी जा रही हैं। कहीं देव प्रतिमाओं का तिरस्कार हो रहा है। कहीं हिन्दू पशुओं की भांति मारे जा रहे हैं यह सब देख कर मेरा हृदय टुकड़े टुकड़े हो जाता है।।५६।।

चिन्तां कलत्रसुतयोर्न तयोर्विधाय,
याचेऽभिलाषणमदो जगदीश्वराय।
'मेवाड़' मण्डल बलोन्नयनं, वनं वा,
म्लेच्छौघसैन्य-शरणं मरणं रणं वा।।५७।।

प्रसंग:—कवि: मेवाड़प्रदेशोन्नत्यै वनभ्रमणं रणं मरणं वा ईश्वरं याचते।

अन्वय:—(अहं) तयो: कलत्रसुतयो: चिन्तां न विधाय जगदीश्वराय अद: अभिलाषणं याचे (यत्) मेवाड़मण्डलोन्नयनं (करवाणि) वनं वा (गच्छानि) म्लेच्छौघसैन्यशरणं (प्राप्नवानि) मरणं रणं वा (करवाणि)।

व्याख्या—अहमिति शेष: तयो: निजयो: कलत्रसुतयो: कलत्रं च सुतश्चकलत्रसुतौ तयो: स्त्रीपुत्रयो: चिन्तां स्मृतिं न विधाय-अकृत्वा जगदीश्वराय जगत: ईश्वरो जगदीश्वरस्तस्मै जगदीश्वराय भुवनैकस्वामिने अद: इदानीमभिलाषणम् एषणाम् याचे प्रार्थये। यत् मेवाड़मण्डलबलोन्नयनं मेवाड़मण्डलस्य बलम् मेवाड़मण्डलबलम् तस्य उन्नयनम् तत् मेवाड़भागसैन्यवृद्धिम् करवाणि इति शेष: वा वनम् अरण्यं व्रजामि। म्लेच्छौघसैन्यशरणम्-म्लेच्छानामोघो म्लेच्छौघस्तस्य सैन्यशरणम् म्लेच्छौघसैन्यशरणम् तव यवनसमूहो नाभजम् गच्छामि। मरणं प्राणत्यागं रणं संग्रामं वा आश्रयामि।

भावार्थ—मैं प्रताप सिंह अपने स्त्री पुत्र की चिन्ता को छोड़कर ईश्वर से यही इच्छापूर्ति चाहता हूँ कि मेवाड़ प्रान्त की सेना उन्नति को प्राप्त

हो या मुझे वन का ही आश्रय लेना पड़े। अथवा मै म्लेच्छों की सेना में प्रविष्ट हो जाऊँ या मृत्यु और संग्राम इनमें से एक का सहारा लूँ।।५७।।

क्रोधानलो दहति हा हृदयं मदीयं,
हस्तश्च संस्फुरति वैरि-वधे स-सङ्गः।
भूयश्च लौहकवचाऽऽकुलमस्ति वक्षो
यद्देश एष मम वैरि-जनेन विद्धः।।५८।।

प्रसंगः—स्वाधीनताप्राप्त्यर्थमुद्यमपरं प्रतापसिंहम् वर्णयति कविः।

अन्वयः- हा क्रोधानलो मदीयं हृदयं दहति सखङ्गः हस्तश्च वैरिवधे संस्फुरति वक्षः भूयः लौहकवाचकुलं च अस्ति। यत् मम एषः देशः वैरिजनेन विद्धः अस्ति।

व्याख्या—हा इति विषादे क्रोधानलः क्रोध एव अनलः क्रोधानलः कोपाग्निः 'कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौस्त्रियौ' इत्ययरः। मदीयम्-मम इदं मदीयंतत् आत्मीयं हृदयम् मानसं दहति प्रज्वालयति। सखङ्गः खड्गेन सह वर्तते इति सखङ्गः कृपाणोपेतः हस्तः करः संस्फुरति स्पन्दते। भूयः पुनः च वक्ष उरः-पुत्रो वत्सं च वक्षश्च-इत्यमरः। लोहकवचकुलम् लौहस्य कवचं लौहकवचम् तेन आकुलं लौहकवचाकुलं लौहमयदेहप्रावरणौद्विग्नम् अस्ति यत्-यस्मात् एषः सन्निधौ वर्तमानः, मम-आत्मीयः देशः भारतम् वैरिजनेन वैरी चासौ जनश्च, तेन वैरिजनेन शत्रुदलेन विद्धः व्यथितः।

भावार्थः—खेद है क्रोधाग्नि से हृदय जल रहा है। तलवार से युक्त हाथ फड़क उठता है छाती लोहे के कवच को धारण करने के लिए आतुर है। क्योंकि यह मेरा देश शत्रुओं से अत्यन्त पीड़ित हो रहा है।।५८।।

'वाप्पाकुलेऽमलतमे' न गृहीतजन्मा,
नाहम्प्रताप इति विश्रुतभीमकर्मा।
वीराङ्गना न जननी मम नास्मि शूरः
चेन्म्लेच्छ-मण्डलमलं निखिलं न हन्मि।।५९।।

प्रसंगः—कविः म्लेच्छान्नायामि इति प्रतापसिंहस्य संकल्पं दर्शयति।

अन्वयः-चेदहं निखिलं म्लेच्छमण्डलम् अलम् न हन्मि अमलतमे वाप्पाकुले गृहीतजन्मा न, विश्रुतभीमकर्मा प्रताप इति न, मम जननी वीराङ्गना न, न शूरः (च) अस्मि।

व्याख्या—चेत् यदि अहं प्रतापसिंहः। निखिलं समग्रम्लेच्छमण्डलं म्लेच्छानां मण्डलं म्लेच्छमण्डलं तत् यवनसमूहमलं सर्वथा न हन्मि नाशयामि। तर्हि-अमलतमेऽतिशयेनामलममलतमम् तस्मिन् अमलतमे नितरां शुद्धे वाप्याकुले वाप्या इति कुलं वाप्याकुलं कुलन्तस्मिन् वाप्याकुले वाप्यां इति नाम्नाप्रसिद्धदेशे गृहीजन्मा गृहीतं जन्म येन सः गृहीतजन्माप्राप्तजनिः न नह्येवास्मि। विश्रुतभीमकर्मा विश्रुतानि भीमानि कर्माणि यस्य स विश्रुतभीमकर्मा प्रसिद्धदारुणकार्यः 'प्रतापं' इति स्वनामकथनम् इति इत्थं न अस्तीतिशेषः। मम मदीया जननी अम्बा वीराङ्गना वीरा चासावङ्गना च वीराङ्गना शूरनारी न। शूरः वीरः च न-अस्मि नैव भवामि।

भावार्थः—यदि मैं प्रताप सिंह सम्पूर्ण यवन समूहों का नाश न कर दूँ तो निर्मल वाप्पा वंश में मेरा जन्म ही नहीं। और विदित क्रूर कर्म वाला प्रताप नहीं। मेरी मां वीरांगना क्षत्राणी नहीं और मैं वीर भी नहीं हूँ।।५९।।

रे रे मदीयकरमुग्ध! कठोरकुन्त!
प्रक्रान्तधार! कुटिलाऽऽक्रमणेन किन्ते।
यच्छासति त्वयि सदा रिपुशोणितार्द्रे,
जीवन्ति दुष्टहतका यवना जगत्याम्।।६०।।

प्रसंगः—प्रतापसिहो नैजं कुन्तम् निन्दति।

अन्वयः—रे रे प्रक्रान्तधार! मदीयकरमुग्ध! कठोरकुन्त! ते कुटिलाक्रमेण किम् (प्रयोजनम्)? यत् सदा **रिपुशोणितार्द्रे त्वयि** शासति दुष्टहतकाः **यवनाः** जगत्यां जीवन्ति।

व्याख्या—रे रे हे प्रकान्तधार- प्रकान्तो धारो यस्य सः प्रकान्त-धारस्तसम्बुद्धौ हे प्रक्रान्तधार तीक्ष्णाग्रभाग! मदीयकरमुग्ध ममायं मदीयः,

मदीयः करो, मदीयकरस्तेनमुग्धो मदीमकरमुग्धस्तत्सम्बुद्धौ मदीयकरमुग्ध-प्रतापसिंहहस्तधृत। कठोरः कुन्तः कठोरकुन्तः सम्बुद्धौ हे कठोरकुन्त कठिनप्राण 'कुन्तः प्रासः' इत्यमरः। ते तव कुटिलाक्रमणेन कुटिलमाक्रमक्षणम् कुटिलाक्रमणन्तेन कुटिलाक्रमणेन भीषणघातेन किं न किमपि प्रयोजनं सिद्धम्। यत् यस्मात् सदा सर्वदा रिपुशोणिताद्रे रिपूणां शोणितं रिपुशोणितन्तेनार्द्रो रिपुशोणितार्द्रस्तस्मिन् शत्रुरक्तव्याप्ते त्वयि शासति विलसति सति दुष्टहतकाः दुष्टाश्च ते हतकाश्च दुष्टहतकाः क्रूरनीचा यवना म्लेच्छा जगत्यां लोके जीवन्ति प्राणान् धारयन्ति।

भावार्थः—हे तीव्र धार हमारे हाथ में विराजमान कठोर भाले तेरे भयंकर हमले से कोई लाभ न हुआ। क्योंकि हमेशा शत्रुओं के खून से लथपथ तुम्हारे शासन में भी ये नीच यवन पृथ्वी पर जीवित हैं।।६०।।

भ्रातुः सहोदर-वरस्य वधाय पूर्वं,
वोऽभ्युद्यतोऽभवदहो समरेऽप्रधर्षः।
तस्याऽस्ति ते करुणया किमु नाम कार्यं,
शीघ्रं कृता न जनता न नतानना चेत्।।६१।।

प्रसंगः—प्रतापः आत्मीयं कुन्तम् निन्दति।

अन्वयः—अहो यः अप्रधर्षः (मदीयःकुन्तः) पूर्वं समरे सहोदरवरस्य भ्रातुः वधाय अभ्युद्यतः अभवत् तस्य ते करुणया किमु नाम कार्यम् अस्ति चेत् शीघ्रं जनता न नतानना न कृता।

व्याख्याः—अहो इत्याश्चर्ये अप्रधर्षाः पराजेतुमशक्यो यः कुन्तः पूर्वपुरा काले सहोदरवरस्य सहोदरश्चासौ वरश्च सहोदरवरस्तस्य तथोक्तस्य सहोदर्यस्य भ्रातुरनुजस्य 'शक्तिसिंहस्य' वधाय हननाय अभ्युद्यतस्तत्परः अभवत् सञ्जातः तस्य-उक्तस्य ते तव कुन्तस्य करुणया किमु नाम कियत् कार्यं प्रयोजनम् अस्ति भवति। चेत् यर्हि शीघ्रं तत्क्षणे 'शीघ्रं सपदि तत्क्षणे इत्यमरः। जनता जनसमूहः। नता ना नतमाननं यस्याः सा नतानना अवनतवदना न नह्येव कृता विहिता।

भावार्थः—आश्चर्य है निरन्तर गतिशील यह मेरा भाला सगे छोटे भाई को मारने के लिए तत्पर हो गया था-ऐसे प्रभावी की दया से क्या लाभ? यदि तुम शीघ्र ही जनता को अपने कार्य से आदर पूर्वक झूके शिर वाली नहीं कर देते।।६१।।

शोकं विधेहि भारतभृङ्ग! नूनं,
यत्पारतन्त्र्य - रजनौगतपद्म - बद्धः।
भूयो भविष्यति चिराय सखेऽधुनैव,
स्वातन्त्र्यसूर्य-किरणारुण-सुप्रभापतम्।।६२।।

प्रसंगः—पद्येऽस्मिन् प्रतापसिंहः भारतभृङ्गमाश्वासयति।

अन्वयः—हे सखे! भारतभृङ्ग! चिराय पारतन्त्र्यरजनीगतपद्मबद्धः (त्वं) शोकं नहि विधेहि यत् भूयः अधुनैव स्वातन्त्र्य-सूर्यकिरणारुणसुप्रभातम् नूनं भविष्यति।

व्याख्या—हे सखे! हे मित्र। भारतभृङ्गभारतम् भृङ्ग इव भारतभृङ्गस्तत्सम्बुद्धौ हे भारतभृङ्ग भारतभ्रमर चिराय चिररात्राय पारतन्त्र्य-रजनीगतपद्मबद्धः परतन्त्रस्य भावः पारतन्त्रम् तद् एव रजनीं तद्गतं पद्मं पारतन्त्र्य-रजननीगतपद्मतस्मिन् बद्धः पारतन्त्र्यरजनीगतपद्मबद्धः पराधीनता-रात्रिकमलमध्यगः त्वं शोकं न हि सर्वथा (शुचें) विधेहि कुरु। यत् यस्मात् भूयः पुनः अधुना इदानीम् एवं स्वातन्त्र्यसूर्यकिरणोद्गमसुप्रभातम् स्वतन्त्रास्य भावः स्वातन्त्र्यम् स्वातन्त्र्यमेव सूर्यस्तस्य किरणास्तेभ्यो जातमरूपं सुप्रभातम् स्वातन्त्र्यसूर्यकिरणारूणसुप्रभातम्-स्वाधीनतारविमयूखरक्तप्रातःकालः नूनम् खलु भविष्यति निश्चयेन।

भावार्थ—हे मित्र भारतभ्रमर। तुम पराधीनता रूपरात्रितुल्य कमल कोश में बन्द होकर बहुत समय तक शोक न करो। क्योंकि अब शीघ्र ही स्वन्त्रतारूपी सूर्य की लाल किरणों से युक्त प्रातः काल अवश्य होगा।।६२।।

प्राणादपि प्रियतमा निज-पूर्वजानां,
मान्या पुनर्भवतु जन्म-धरा स्वतन्त्रा।

साऽऽभारतीरितगुणावलिरद्य भूयः,
सा भारती भवतु भारत-भू विभूत्यै।।६३।।

प्रसंगः—प्रतापसिंहः जन्मभूमेः स्वातन्त्र्यभिलषति।

अन्वयः—निजपूर्वजानां प्राणादपि प्रियतमा मान्या जन्मधरा पुनः स्वतन्त्रता भवतु। साऽऽभारतीरितगुणावलिः सा भारती अद्य भूयः भारत-भू-विभूत्यै भवतु।

व्याख्या—निजपूर्वजानाम् निजाश्चतेपूर्वजाश्च निजपूर्वजास्तेषां निजपूर्वजानाम् स्वपूर्वपुरुषाणां प्राणात् असुभ्यः अपि प्रियतमा अतिशयेन प्रिया प्रियतमा प्रेयसी मान्या आदणीया जन्मधरा जन्मनो धरा जन्मधरा-उत्पत्तिभूमिः, पुनः भूयः स्वतन्त्रा स्वाधीना भवतुं साभा आभया सहिता साभा प्रभावती रितगुणावलिः अनुरागप्रसिद्धगुणततिः सा भारती वाणी अथ-इदानीं भूयः पुनः भारतभूविभूत्यै भारतस्य भूः भारतभूः। तस्या भूतिर्भारतभूमिभूतिस्तस्यै भारतभूविभूत्यै भारतवर्ष-भूसमृद्धये जायताम्।

भावार्थ—अपने पूर्व पुरुष जिसे प्राणों से अधिक चाहते थे। ऐसी मान्य जन्मभूमि स्वतन्त्र हो। और प्रकाश युक्त अनेक प्रसिद्ध गुणों से परिपूर्ण वह वाणी भारतभूमि के ऐश्वर्य को बढ़ाये।।६३।।

मान-मान हानिः

विजित्य शोलापुर-गं महारणं स मानसिंहो जयमालिकाऽञ्चितः।
बभूव मानोन्नतऽभाल-भाक् पथि प्रतापसिंहस्य निकेतनेऽतिथिः।।६४।।

प्रसंगः—कविः मानसिंहस्य 'प्रतापसिंहस्य गृहे' प्राप्तिम्वर्णयति।

अन्वय—शोलापुरगं महारणं विजित्य जयमालिकाञ्चितः मानोन्नतभालभाक् स मानसिंहः पथि प्रतापसिंहस्य निकेतने अतिथिः बभूव।

व्याख्याः—शोलापुरगम्-शोलापुरं गतः शोलापुरगस्तं शोलापुरगं-शोलापुरस्थानज्ञातम् महारणं महांश्चासौ रणश्चमहारणस्तं महारणं बृहत्संग्रामं विजित्य जयं विधाय जयमालिकाञ्चितः जयस्य मालैव जयमालिका तया

अञ्चितः जयमालिकाञ्चितः विजयपुष्पहारशोभितः। मानोन्नतभालभाक्-मानेनोन्नतं भालम्भजत इति मानोन्नतभालभाक् चित्तसमुन्नतियुक्तशिरस्कः-अभिमानी इति यावत् स प्रसिद्धः मानसिंहः पथि मार्गे प्रतापसिंहस्य प्रतापाभिधस्य वीरवरस्य निकेतने गृहे अतिथिः आगन्तुःस्युरावेशिक आगन्तुरतिथिर्ना गृहागते-इत्यमरः बभूव अभवत्।

भावार्थः—शोलापुर के महासंग्राम में जयपाकर-जयमाला से विभूषित अभिमानी मानसिंह रास्ते में प्रतापसिंह के घर अतिथि होकर आयें।।६४।।

प्रतापजातोऽमरसिंहनामवान्,
तदीयमातिथ्यमलं तदाऽकरोत्।
स्वयम्प्रतापस्तु कदाप्यहो! सकृत्,
न चाह्वयत्तं न तदन्तिकङ्गतः।।६५।।

प्रसंगः—गृहमागतस्य अतिथ्यं कृतवान् अमरसिंहः।

अन्वयः—तदा अमरसिंहनामवन् प्रतापजातः तदीयम् आतिथ्यम् अलं अकरोत् अहो प्रतापस्तु स्वयं सकृत् तदन्तिकम् कदापि न गतः तम् च आह्वयत् (अपि) च।

व्याख्या—तदा अतिथावगते सति अमरसिंहनामवान् अमरसिंह इति नाम अमरसिंहनाम तदस्यास्तीति अमरसिंहनामवान् प्रतापजातः प्रतापात्जातः प्रतापजातः प्रतापात्मजः तदीयम् तस्येदन्तदीयम्-तत् तत्सन्धिद्धि। आतिथ्यं सत्कारम् अकरोत् कृतवान्। अहो-इत्याश्चर्ये प्रतापः प्रतापसिंहः तु स्वयम् आत्मना सकृत् एकदा तदन्तिकं तस्य अन्तिकं तदन्तिकं मानसिंहसमीपं कदापि क्वापि न गतः न अव्रजत्। तं मानसिहं च आह्वयत् अपि न आकारयत् अपि न।

भावार्थ—प्रतापसिंह के पुत्र अमरसिंह ने मानसिंह का यथोचित सत्कार किया। किन्तु प्रतापसिंह स्वयम् उनके पास एक बार भी नहीं गये। और न उनका नाम लिया।।६५।।

उदीरितो भो जन! भोजनाय वै, स मानसिंहोऽमरसिंहवर्म्मणा।
न वीक्ष्य तस्मिन्समयेऽपि तन्नृपं व्यभाषतैवं परितापतोऽपरम्।।६६।।

प्रसंगः—भोजनकालेऽनुपस्थितं प्रतापसिहं दृष्ट्वा तदनागमन- कारणं मानसिंहः पृच्छति।

अन्वयः—अमरसिंहवर्म्मणा भोजनाय सः मानसिंहः 'भो जन'!(इति) उदीरितः। (सः) तस्मिन् समयेऽपि तं नृपं न वीक्ष्य परितापतः अमरम् एवं व्यभाषत।

व्याख्या—अमरसिंहवर्म्मणा-प्रतापात्मजेन अमरसिंहनाम्ना क्षत्रियेण भोजनाय अभ्यवहाराय इति निश्चये सः प्रसिद्धः मानसिंहः भो जन-हे चर! अपि एवम् उदीरितः प्रोक्तः सन् तस्मिन् समये भोजनावसरेऽपि तं नृपं राजानम्प्रतापसिंहं न वीक्ष्य प्रदृष्ट्वा परितापतः खेदपूर्वकम् अमरम् अमरसिंहम् एवं वक्ष्यमाणप्रकारेण अभाषत प्रोक्तवान्।

भावार्थ—अमरसिंह ने मानसिंह को हे जन! ऐसा कहते हुए भोजन के लिए बुलाया। किन्तु उन्होंने भोजन समय में प्रतापसिंह को न देखकर कहा।।६६।।

पुराऽऽगतो नैव वरं स नागतः, प्रतापसिंहः कथमत्र नागतः।
अनागते हन्त ममाशनं कथं, तदत्र शीघ्रं वद किन्नु कारणम्? ।।६७।।

प्रसंगः—मानसिंहः प्रतापसिंहस्यानागमनकारणं जिज्ञासति।

अन्वयः—पुरा प्रतापसिंहः नैव आगतः वरं नागतः (परन्तु) सः अत्र कथं न आगतः। हन्त (तस्मिन्) अनागते मम अशनं कथम् (भवेत्)? तद् अत्र किं कारणं नु शीघ्रं वद?

व्याख्या—पुरा पूर्वं मदागमनसमये सः प्रतापसिहः न एव न ह्येव आगतः आगच्छत्। वरम् ईषत् प्रियम् न नहि आगतः समाययौ। किन्तु सः अत्र भोजन समये कथं कस्मात् कारणात् न न ह्येव आगतः आगतवान्। हन्त इति खेदेऽव्ययम् अनागतेऽनायाते 'तस्मिन्' मम मानसिंहस्य-अशनमभ्यवहरणम्

कथं केन प्रकारेण भवेत् स्यात्' इति शेषः। तत् तस्मात् अत्र किं वितर्के तु निश्चितं कारणम् हेतुः अस्तीति शेषः। शीघ्रं द्रुतं वद-अभिधेहि।

भावार्थ—प्रतापसिंह मेरे आने पर न आये थे। तो न सही। किन्तु वे अब क्यों नहीं आये उनके न आने पर मेरा भोजन कैसे हो सकता है। अतः शीघ्र उनके आने का कारण कहो।।६७।।

उवाच वाचं महितः स मत्पिता नितान्ततान्तोऽस्ति 'शिरोव्यथा'हतः।
ततोऽशनं वै भवता समं विभो!, न शक्यते तेन विधातुमन्ततः।।६८।।

प्रसंगः—अमरसिंहः पितुरनागमनकारणं वक्ति।

अन्वयः—सः वाचम् उवाच महितः मत्पिता शिरो-व्यथा- हतः, नितान्ततान्तः अस्ति। हे विभो! ततः वै तेन भवता समम् अन्ततः अशनं विधातुं न शक्यते।

व्याख्याः—सः अमरसिंहः वाचम्-वचः-भाषितवचनं वचः इत्यमरः। उवाच कथयामास। महितः पूजितः मत्पिता मम पिता मत्पिता मदीयो जनकः। शिरोव्यथाहतः शिरसो व्यथा शिरोव्यथा तया हृतः शिरोव्यथाहतः, मस्तकपीडाकुलः। नितान्ततान्तः, नितान्तं तान्तः नितान्ततान्तः, अत्यर्थं पीडितः अस्ति वर्तते। हे विभो हे प्रभावशालिन्! ततस्तस्मात् वै इति निश्चये तेन मत्पित्रा भवता अतिथिना त्वया समम् हर, अन्ततः सर्वथा अशनं भोजनं विधातुं कर्तुं न शक्यते-न-सम्भाव्यते।

भावार्थ—अमरसिंह ने कहा-पूज्य मेरे पिता शिर की पीड़ा से अत्यन्त व्याकुल हैं। हे ऐश्वर्यशालिन् इसलिए आपके साथ भोजन करने में सर्वथा असमर्थ है।।६८।।

निशम्य चैवं ह्यमरं निहारयन्, शिरस्तलेऽन्नस्य कणं प्रधारयन्।
समुत्थितो भोज्यमलं निवारयन्, ननाद वाक्यं च लसन्महारयम्।।६९।।

प्रसंगः—कविः भोजनं परित्यजतो मानसिंहस्य वर्णनं करोति।

अन्वयः—(सः मानसिंहः) एवं निशम्य च अमरं निहारयन् शिरस्तले अन्नस्य कर्ण प्रधारयन् भोज्यम् अलम् निवारयन् हि समुत्थितः लसन्महारयम् वाक्यं ननाद च।

व्याख्या—'सः मानसिंहः एवं प्रागुक्तं निशम्य श्रुत्वा च अमरं प्रतापसिंहात्मजं निहारयन् अवलोकयन्। शिरस्तले शिरसस्तलं शिरस्तलं तस्मिन् शिरस्तले मस्तके अन्तस्य भोज्यवस्तुनः कणं खण्डं प्रधारयन् स्थापयन् भोज्यं भक्ष्यं अलं पूर्णरूपेण निवारयन् दूरीकूर्वन् हि निश्चयेन समुत्थितः उत्तस्थौ। लसन्महारयं महान्रयोऽस्मिन् तत् शोभमानप्रभूतवेगवाक्यं वचनं ननाद जगर्ज।

भावार्थ—मानसिंह इस प्रकार के वचन को सुनकर अमरसिंह की ओर देखते हुए अन्न के कण को शिर से लगा भोजन साम्रगी को हटा कर खड़े हो गये और ऊँचे स्वर से गर्जकर बोले।।६९।।

वद प्रतापं तममानकारिणं, यदेव मानो भवता तिरस्कृतः।
इहाऽश्वथाऽऽयास्यति सौषधिर्यतः-शिरोव्यथा ते न पुनर्भवेद् भवे।।७०।।

प्रसंगः—कविः क्रुद्धस्य मानसिंहस्य प्रतापविषये क्रोधोक्तिम् प्रस्तौति।

अन्वयः—तम् अमानकारिणं प्रतापं वद एषः मानः भवंता तिरस्कृतः अथ इह आशु सा औषधिः आयास्यति यतः ते शिरोव्यथा भवें पुनर्न भवेत्।

व्याख्या—तम्-निजं तातम् अमानकरिणं न मानोऽमानस्तं करोति तच्छील इत्यमानं कारीतममानकारिणं तिरस्कारकारकम् प्रतापं प्रतापसिंहं वद कथय! यत् यस्मात् एषः वर्तमानः, मानः मानसिंहो भवता प्रतापसिंहेन तिरस्कृतोऽनादृतः। अथ अन्तरम्-इह-मेवाड़भूमौ आशु शीघ्रं सा तादृशी ओषधिः भेषजम् आयास्यति आगमिष्यति। यतः यस्माद्धेतोः तव प्रतापसिंहस्य शिरोव्यथा, शिरसो व्यथा मस्तकपीडाभवे-अस्मिन् जन्मनि पुनः भूयः न न ह्येष भवेत् स्यात्।

भावार्थ—तु अपमान करनेवाले पिता से कहो कि तुमने महावीर मानसिंह का अपमान किया है। इसलिए अब आगे मेवाड़ में ऐसी दवा आयेगी जिससे तुम्हें इस जीवन में फिर कभी सिर की पीड़ा न होगी।।७०।।

तदैव हर्षेण गृहाद् विनि:सरन् स साहसी तं सहसा जनं हसन्।
सहस्रनेत्र-प्रतिमो रिपुन्दमो महाद्युतिर्वाचमुवाच मानिनम्।।७१।।

प्रसंग:—कवि: पुरुषभाषिणं मानसिंहं प्रति प्रतापसिंहस्योक्तिं दर्शयति।

अन्वय:—तदैव सहसा सहस्रनेत्रप्रतिम: महाद्युति: रिपुन्दम: साहसी स: हर्षेण गृहाद् विनि:सरन् तं मानिनं जनं हसन् वाचम् उवाच।

व्याख्या—तदैव तस्मिन्नेव क्षणे सहस्रनेत्रप्रतिम: सहस्रं नेत्राणि प्रतिमा यस्य स: सहस्त्रनेत्रप्रमि: इन्द्रतुल्य:। महाद्युति: महती द्युति: यस्य स: महाद्युति: प्रभूतच्छवि: रिपुन्दम: रिपून्दमयति इति रिपुन्दम: शत्रुनाशक: साहसी उद्यमी स: प्रतापसिंह: हर्षेण प्रीत्यामुत्प्रीति: प्रमदो हर्ष: इत्यमर: गृहाद् भवनात् विनि:सरन् निर्गच्छन् तं मानिनं दर्पयुक्तं जनं हसन् उपहसन् वाचम् वचनम् उवाच कथयामास।

भावार्थ—उसी समय इन्द्रतुल्य अधिक तेजस्वी शत्रुजनों का दमन करने वाले उद्यमी महाराणा प्रताप प्रसन्नता से निकलते हुए मानसिंह का उपहास कर बोले।।७१।।

पितामहस्ते यवनाय कन्यकां, ददौ यत: किन्न कुलं कलङ्कितम्।
तथाऽपि सार्धं मयकैन भोजनं, न मान! एवं भज माननीयताम्।।७२।।

प्रसंग:—प्रतापसिंहो मानसिंहं तिरस्करोति।

अन्वय:—ते पितामह यवनाय कन्यकां ददौ किं तत: (तव) कुलं कलङ्कितम् न? तथापि मयकैष सार्द्धं भोजनम् (इच्छसि)। हे मान! एवं माननीयताम् न भज।

व्याख्या—ते तव पितामह: पितु: पिता यवनाय म्लेच्छाय कन्यकां बालां ददौ प्राप्तम्। तत: तस्मात् कारणात् किं कुलं वंश: न नहि कलङ्कितम् दूषितम् अभूदितिशेष: तथापि एवं स्थितेऽपि मयकैव-मया एव मयका एव प्रतापसिंहेन एव सार्धं साकं भोजनम् अशितम् (इच्छति) हे मान हे मानसिंह एवम् इत्थम् माननीयताम् मानयितुं योग्यो माननीयस्तस्य भाव: माननीयताम् सम्मान्यत्वं न नहि भज सेवस्व।

भावार्थ—अरे तुम्हारे बाबा ने म्लेच्छ के साथ अपनी कन्या व्याह दी। क्या इससे कुल दूषित नहीं हो गया। इतने पर भी तुम मेरे साथ भोजन करना चाहते हो। हे मान तुम अपने को इस प्रकार सत्कार के योग्य न समझो।।७२।।

वयं क्व वर्णाश्रमधर्ममर्मगा, सदा सदाचार-विचार-धारकाः।
स्वजाति-हीनाः कुलधर्मतश्च्युता क्व हन्त! यूयं कृमितुल्यजन्तवः।।७३।।

प्रसंगः—प्रतापसिंहो मानसिंहं तिरस्करोति।

अन्वयः—वर्णाश्रमधर्ममर्मगाः सदा सदाचार-विचारधारकाः वयं क्व? हन्त स्वजातिहीनाः कुलधर्मतश्च्युताः कृमितुल्यजन्तवः यूयं क्व?

व्याख्या—वर्णाश्रमधर्ममर्मगाः वर्णश्च आश्रमश्च धर्मश्च वर्णाश्रमधर्मास्तेषां मर्म गच्छन्तीति वर्णाश्रमधर्ममर्मज्ञाः क्षत्रियगृहस्थसुकृततत्त्वाचारिणः सदा सर्वदा सदाचारविचारधारकाः सदाचारश्च विचारश्च सदाचारविचारौ तौ धारयन्ति तच्छीला इति सदाचारविचारधारकाः सदाचारविवेकपालकाः वयं मादृशाः श्रेष्ठाः क्षत्रियाः क्व कुत्र। स्वजातिहीनाः स्वस्य जातिः स्वजातिस्तयाहीनाः स्वजातिहीनाः क्षत्रियजातिभ्रष्टाः कुलधर्मतः कुलधर्मस्तस्मात् कुलधर्मतः वंशसुकृतात् च्युता भ्रष्टाः कृमितुल्यजन्तवः कृमितुल्याः कृमितुल्याः कृमितुल्याजन्तवः कृमितुल्यजन्तवः कीटसदृशप्राणिनः यूयं त्वादृशः क्व कुत्र। यवनसम्पर्किभिर्युष्माभिरस्माकं अहदस्तरमितिभावः।

भावार्थ—वर्णाश्रम तथा धर्म के तत्व को जानकर उनका पालन करने वाले सदाचार और विचार को धारण करने वाले हमलोग कहाँ? और अपनी जाति तथा कुल धर्म से गिरे हुए कीट पतंगो के तुल्य तुम लोग कहाँ हो। इसलिए तुम लोग मेरे साथ भोजन की बात कैसे समझते हो।।७३।।

सह त्वया हन्त! कृतेऽनुरञ्जने
न किं विरुद्धं जगतीतले भवेत्।
क्व दन्तिनः स्याच्छशकेन मित्रता,
क्व जम्बुकः सिंह-सखः श्रुतस्त्वया।।७४।।

प्रसंगः—कविः प्रतापविहितं मानसिंहतिरस्कारं दर्शयति।

अन्वयः—हन्त! त्वया सह अनुरंजने कृते किं जगतीतले विरुद्धं न भवेत्? दन्तिनः मित्रता शशकेन (सह) स्यात्। त्वया जम्बुकः सिंहसखः इति क्व श्रुतः?

व्याख्या—हन्त हा विषादे त्वया मानसिंहेन सह साकम् अनुरञ्जने मैत्रीभावे कृते अनुष्ठिते सति जगतीतले जगत्यास्तलं जगतीतलं तस्मिन् जगतीतले भुवस्तले किं विरुद्धं न प्रतीपं न भवेत् न स्यात्। दन्तिनः हस्तिनः शशकेन-शशक-नाम्ना प्राणिविशेषेण मित्रता मैत्रीभावः क्व स्यात् क्व भवेत्। त्वया मानसिंहेन जम्बुकः श्रृगालः सिंहसखः सखेति सिंहसखः मृगेन्द्रमित्रं क्व श्रुतः कदा आकर्षितः।

भावार्थ—खेद है तुम्हारे साथ मित्रता करने पर संसार में बहुत बिगाड़ हो जायगा। हाथी की खरगोश के साथ मित्रता कहाँ होती है? क्या तुमने सियार को सिंह के मित्र के रूप में कहीं सुना है।।७४।।

अनल्प-रूक्षाक्षर-जल्पनाऽऽकुलः, तपँल्ललाटन्तपवन्मुखाऽरूणः।
जगाद शैघ्र्येण हयोपरि स्थितः, स मानसिंहोऽपि गिरङ्गरीयसीम्।।७५।।

प्रसंगः—प्रतापसिंहस्य वाक्यमाकर्ण्य क्रुद्धो मानसिंहः उत्तरं वक्ति इति दर्शयति कविः।

अन्वयः—अनल्परूक्षाक्षरजल्पनाऽऽकुलः तपँल्ललाटन्तपवन्मुखाऽरुणः शैघ्र्येण हयोपरिस्थितः स मानसिंहः अपि गरीयसीं गिरम् जगाद।

व्याख्याः—अनल्परूक्षाक्षरजल्पनाकुलः, न अल्पानि अनल्पानि अनल्पानि रूक्षाणि अक्षराणि यस्यां सा अनल्परूक्षाक्षरा तादृशी जल्पना तया आकुलः, अनल्परूक्षाक्षरजल्पनाकुलः बहुपरुषाक्षरकथनव्याकुलः। तपंल्ललाटन्तपवन्मुखारुणः, तपन्ललाटन्तपस्तपँल्लाटन्तपः, तद्वत् मुखम् अरुणं यस्य सः, तपँल्ललाटन्त-पवन्मुखारुणः। दीप्तसूर्यतुल्यवक्त्रारक्तः शैघ्र्येण वेगेन हयोपरि हयस्योपरि हयोपरि, अश्वोर्ध्वम् स्थितः आरूढः सः पूर्वोक्तः मानसिंहः मानसिंहनामा

क्षत्रियः अपि गरीयसीमतिशयेन गुर्वी गरीयसी ताम् गरीयसीं गौरवयुक्तां गिरं वाचं जगाद प्रोवाच।

भावार्थः—बहुत कटु वर्णो के कहने से व्याकुल उदित सूर्य के समान क्रोध से लाल मुख वाला मानसिंह शीघ्रता से घोड़े पर चढ़ता हुआ अत्यन्त गम्भीर वाणी में बोला।।७५।।

रणोन्मुखस्तिष्ठतु सज्जितो भवान् ध्रुवं मदीयाऽऽगमनं भविष्यति।
अथाऽऽवयोरेकजनश्च सङ्गरे यशोऽवशेषो भविता नु भूतले।।७६।।

प्रसंगः—तिरस्कृतः मानसिंहः प्रतापं रणायोद्योजयति।

अन्वयः—भवान् रणोन्मुखः सज्जितः तिष्ठतु मदीयागमनं ध्रुवं भविष्यति। अथ च सङ्गरे आवयोः एकजनः भूतले यशोऽवशेषो भविता नु।

व्याख्या—भवान् प्रतापसिंहः रणोन्मुखः रणाय उन्मुखः रणोन्मुखः संग्रामोद्यतः सज्जितः सेनायावृतः तिष्ठतुः अवस्थानं करोतु। मदीयागमनं मदीयं आगमनं मदीगमनं मामकीनम् आयातम् ध्रुवं निश्चितं भविष्यति। अथ च अनन्तरं संग्रामे युद्धे आवयोर्द्वयोर्मध्ये एकजनः कवलो जनः भूतले धरित्र्यां यशोऽवशेषो यशः अवशेषं यस्य सः यशोऽवशेषो केवलकीर्त्तिः भविता भविष्यति।

भावार्थ—अब आप युद्ध के लिए अवश्य ही उद्यत रहें। मैं सचमुच आऊँगा और संग्राम में अब हम दोनों में से एक ही पृथ्वी पर यश मात्र शेष बचेगा।।७६।।

विदारिताऽस्यः परितः स्फुरत्सटः, भयानकाऽऽकारधरोऽधिकाननम्।
प्रसुप्त-सिंहोऽद्य हठात्प्रबोधितः न मानसिंहो भवता तिरस्कृतः।।७७।।

प्रसंगः—कविः क्रुद्धस्य मानसिंहस्य प्रतापम्प्रति कथनमेव दर्शयति।

अन्वयः—भवता मानसिंहः न तिरस्कृतः (परं) अद्य विदारिताऽऽस्य परितः स्फुरत्सटः भयानकाऽऽकारधरः अधिकाननम् प्रसुप्तसिंहः हठात्प्रबोधितः।

व्याख्या—भवता प्रतापसिंहेन मानसिंहः मानसिंहनामजानः न तिरस्कृतः न अनाहृतः। 'किन्तु' अद्य इदानीम् अधिकाननम् कानने इति अधिकाननम् वने विदारितास्यः विदारितम् आस्यं यस्य सः विदारितास्यः विवृतमुखः परितः समन्तात् स्फुरत्सटः स्फुरन्ती जटा यस्य सः विकीर्णकेसरः। जटा जटाकेसरयो इत्यमरः। भयानकाकारधरः भयानकस्य आकरस्यधरः भयानककारधरः भीषणकृतिभाक् प्रसुप्तसिंहः प्रसुप्तःसिंहः निद्रांगतो मृगेन्द्रः हठात् बलात् प्रतिबोधितः जागरितः। अटव्यरण्यं विपिनं गहनं काननं वनम् इति कोशः।

भावार्थः—आज आपने मानसिंह का अनादर नहीं किया। किन्तु मूँह फैलाए हुए और चारों ओर बालों को विखेरे जंगल में सोये सिंह को हठ पूर्वक जगा दिया है।।७७।।

पदाहतः कोपमयो महाफणी मुहुर्मुहुर्न्यञ्चितभोगमण्डलः।
पुनर्हतः पादतलेन साम्प्रतं, न मानसिंहो भवता तिरस्कृतः।।७८।।

प्रसंगः—पुनः प्रतापसिंहम्प्रति मानसिंहस्य कथनम्प्रदर्यते।

अन्वयः—भवता मानसिंहः न तिरस्कृत-(प्रत्युत)-पदाहतः कोपमयः महुर्मुहुः न्यञ्चित-भोग-मण्डलः महाफणी साम्प्रतम् पुनः पादतलेन हतः।

व्याख्याः—भवता प्रतापसिंहेन मानसिहः एतन्नामापुरुषः न तिरस्कृतः न अपमानितः। 'किन्तु' पदाहतः पद्भ्याम् आहतः यदाहतः चरणताडितः कोपमयः क्रोधाक्रान्तः मुहुर्मुहः बारम्बारम् अनेकाश इत्यर्थः न्यञ्चितभोगमण्डलः, न्यञ्चितं भोगस्य मण्डलं येन सः तथाविधः नमितफटाटोपः महाफणी महान् फणोऽस्यास्तीति वृहद्भोगः साम्प्रतमिदानीं पादतलेन पादस्य तलम्पादतलन्तेन चरणाधोभागेन पुनर्भूयो हतस्ताडितः अस्तीति शेषः।

भावार्थः—आपने मुझ मानसिंह का अपमान नहीं किया है। किन्तु पैरों से मारे हुए अत्यन्त क्रोधी बार-बार अपनी फणों के नीचे झुकाये हुए महासर्प को फिर पैर से कुचल डाला है।।७८।।

य एकलो भारत-भूपते प्रियः, प्रसिद्धसेनापतिरस्ति वीरराट्।
रिपुत्वमङ्गीकरणं ततोऽभयं, विभावयेत् को नु भवन्तमन्तरा।।७९।।

प्रसंग:—पुनरपि कवि: क्रुद्धस्य मानसिंहस्य प्रतापम्प्रति कथनं दर्शयति।

अन्वय:—य: वीरराट् भारतभूपते: एकल: प्रिय: प्रसिद्धसेनापति: अस्ति, तत: अभयं रिपुत्वमङ्गीकरणं भवन्तम् अन्तरा क: नु विभावयेत्।

व्याख्या—य: प्रसिद्ध: वीरराट् वीरेषु राजत इति वीरराट् क्वापि शूराग्रणी: भारतभूपते: भारतस्य भूपतिर्भारतभूपतिस्तस्य भारतभूपते: भारतेश्वरस्य एकल: एकाकीप्रिय: तृप्तिकारक: प्रसिद्धसेनापति: प्रसिद्ध: सेनापति: प्रसिद्धसेनापति: प्रख्यातसेनाधीश्वर: अस्ति। तत: ईदृशात् अभयम् अविद्यमानम्भयं यस्मिन् तत् अभयम् भीतिरहितम् रिपुत्वं शत्रुत्वम् अङ्गीकरणं स्वीकरणम् भवन्तं त्वाम् अन्तराविन क: नु निश्चयेन विभावयेत् मनसि निश्चिनुयात्।

भावार्थ:—जो वीर पर मानसिंह भारत सम्राट् का अत्यन्त प्रिय और प्रसिद्ध सेनापति है। उससे निर्भय होकर 'शत्रुता करना' आपको छोड़कर कौन सोच सकता है।।७९।।

जगाद भूयस्तदनन्तरं क्रुधा, प्रतापसिंह: किल सिंहविक्रम:।
विधाय 'मानं' धृतमौनमन्तत: स वीरराजस्फुरितोत्तराधर:।।८०।।

प्रसंग:—मानसिंहस्योक्तिं निशम्य प्रतापसिंह: कथयति।

अन्वय:—तदनन्तरं अन्तत: 'मानं' धृतमौनं निधाय स्फुरितोत्तराधर: सिंहविक्रम: वीरराज: स: प्रतापसिंह: भूय: क्रुधा जगाद किल।

व्याख्या—तदनन्तरम् मानसिंहोक्त्यनन्तरम् अन्तत एकान्त: मानं मानसिंहं धृतमौनं धृतं मौनं येन स धृतमौनस्तं तथोक्तम् तूष्णीं स्थितम् विधाय निष्पाद्य स्फुरितोत्तराधर: स्फुरित उत्तरोऽधरो यस्य स: स्फुरितोत्तराधर: कम्पितोर्ध्वोष्ठभाग: सिंहविक्रम: सिहस्य विक्रम इव विक्रम: यस्य स: सिंहविक्रम: मृगेन्द्रपराक्रम: वीरराज: वीराणां राजेति वीरराज: महाशूर: स: प्रतापसिंह: भूय: पुन: क्रुद्धा रुपा जगाद प्रोवाच किल।।८०।।

भावार्थ:—मानसिह के विरत हो जाने पर अधरोष्ठ को फड़काते हुए सिंह तुल्य पराक्रमी वीरवर प्रतापसिंह क्रोध से बोले।।८०।।

अलर्कवत्केसरिणः पदान्तिके, वराक! अल्पस्यलमग्रतो मुधा।
तृणायतस्त्वद्बलत कदाप्यहो! ममाग्निरूपस्य कथम्भयम्भवत्।।८१।।

प्रसंगः—कविः मानं प्रति प्रतापस्य दुरुक्तिं दर्शयति।

अन्वयः—हे वराक! केसरिणः अग्रतः पदान्तिके अलर्कवत् मुधा अलं जल्पसि। अहो! तृणायतः त्वद्बलतः अग्निरूपस्य मम भयं कदापि कथम् भवेत्?

व्याख्या—हे वराक! दयनीय! केसरिणः सिंहस्य अग्रतः पुरस्तात् पदान्तिके मयोः अन्तिके चरणयोः समीपे अलर्कवत् उन्मत्तश्वकर अलमत्यन्तं जल्पसि अहो-आश्चर्ये तृणायतः तृणमिवाचरतः नितरां क्षुद्रात् त्वद्बलतः तव बलं त्वद्बलं तस्मात् मानसिंहपराक्रमात् अग्निरूपस्य अग्निः रूपं यस्य सः अग्निरूपस्तस्य पावकसमस्य मम प्रतापिसिंहस्य भयं भीतिः कदापि कस्मिंचित् क्षणे कथं केन प्रकारेण भवत् सम्भवत् न कदापीत्यर्थः।

भावार्थः—हे हीन, सिंह के सामने उसके पैरों के पास तुम व्यर्थ ही पागल कुते की भाँति भौंकत्ते हो। आश्चर्य है कि तुम्हारे तृण के समान पराक्रम से अग्नि तुल्य मुझे भय कैसे हो सकता है।।८१।।

न गर्वमेवं कुरु वीरताऽञ्चितं, प्रदर्शय स्वं बलमेव सैन्यगम्।
वदन्ति वीरा न कदापि किन्तु ते, स्वकर्म भीमं विदधत्यभीतितः।।८२।।

प्रसंगः—अस्मिन् पद्ये प्रतापसिंहो मानसिंहं युद्धाय प्रेरयति।

अन्वयः—एवं वीरताञ्चितं गर्व न कुरु। स्वं बलम् सैन्यगम् एव प्रदर्शय। वीराः कदापि वदन्ति न किन्तु अभीतितः भीमं स्वकर्म विदधति।

व्याख्या—एवम् ईदृशेन प्रकारेण वीरताञ्चितं वीरतायाअञ्चितं शौर्यपूर्णं गर्वदर्पं न कुरु न विधेहि स्वं नैजं सैन्यगम् सेनायाः समूहः सैन्यं तद्गच्छतीति सैन्यगं तत् सैनासम्बन्धि एव बलम्पराक्रमं प्रदर्शय-आविष्कुरु। वीराः शूराः कदापि कस्मिञ्चिदपिकाले न वदन्ति न कथयन्ति। किन्तु परन्तू ते शूराः अभीतितः न भीतिरभीतिस्ततः भयराहित्येन भीमं भयानकं स्वस्य कर्म स्वकर्म व्यापारं विदधत्यनुतिष्ठन्ति।

भावार्थः—इस प्रकार वीरतापूर्ण अहंकार न करो अपना सैनिक बल दिखाओ वीर कभी कहते नहीं। किन्तु निडर होकर अपना भयानक कर्म करते हैं।।८२।।

व्रज स्वगेहं निजसैन्यसज्जितः पुनः समागच्छ मदर्थमातुरः।
तदा तव स्वागतमत्र मानिनः स्वयं करिष्यामि कृपाणपणिना।।८३।।

प्रसंगः—प्रतापसिंहः मानसिंहं 'ससैन्यः' इहायातु-इति कथयति।

अन्वयः—स्वगेहं व्रज। निजसैन्यसज्जितः मदर्थम् आतुरः पुनः समागच्छ। तदा अत्र (अहं) स्वयं कृपाणपणिना तव मानिनः स्वागतं करिष्यामि।

व्याख्या—स्वस्य गेहं स्वगेहं स्वभवनम् व्रज गच्छ निजेन सैन्यसेनासज्जित आत्मसेनासमवेतः मदर्थम् अहम् अर्थः यस्मिन्-तत् प्रतापसिंहाय आतुरः व्याकुलः पुनः भूयः समागच्छ आयाहि। तदा तस्मिन् समये स्वयम् आत्मना कृपाणपाणिना कृपाणेन युक्तः कृपाणयुक्तः तथाविधः पाणिः कृपाणपाणिस्तेन अत्र मेवाड़भूमौमानिनः गर्वयुक्तस्य तव मानसिंहस्य स्वागतं सत्कारं करिष्यामि विधास्यामि।

भावार्थ—तुम अपने घर जाओ। फिर अपनी सेना के साथ हमारे लिए आतुर होकर अपना आना तब हम यहाँ तलवार हाथ में लेकर अभिमानी तुम्हारा स्वागत करेंगे।।८३।।

विधाय शीघ्रं समरेऽथ सर्वथा स-मान! ते दुर्मद-मानमर्दनम्।
तथा समुन्मूल्य कुलैककण्टकं ततः कृतार्थो भविताऽस्मि भूतले।।८४।।

प्रसंगः—प्रतापसिंह पुनः मानसिंहम् युद्धाय प्रेरयति।

अन्वयः—हे समान! अथ समरे सर्वथा ते दुर्मदमानमर्दनं शीघ्रं विध ाय तथा कुलैककण्टकं समुन्मूलय ततः भूतले कृतार्थः भविताऽस्मि।

व्याख्या—हे समान, मानेन सहितः समानस्तत्सम्बुद्धौ-मानयुक्त। अथ अनन्तरं समरं युद्धे सर्वथा सर्वप्रकारेण ते तव शीघ्रं द्रुतं दुर्मदमानमर्दनम्

दुष्टोमदं यस्य सः दुर्मदः, तथा विधीय मानः दुर्मदमानस्तस्य मर्दनं-दुष्टगर्वभञ्जनं विधाय कृत्वा तथा कुलैककण्टकं कुलस्यैकं कण्टकं क्षत्रिवंशस्यकण्टकं समुन्मूल्य-उत्पास्य ततः-तवोन्मूलनाद्धेतो भूतले क्षितौ कृतः अर्थो यस्य सः कृतार्थः कृतकृत्यभविताऽस्मि भविष्यामि।

भावार्थ—हे घमण्डी, फिर तुम्हारे आने पर युद्ध में सब प्रकार से तुम्हारे गर्व को चूर कर कुल के लिए काँटे के समान तुम्हें उखाड़कर इस पृथ्वी पर कृतकृत्य हो जाऊँगा।।८४।।

प्रताप-वाक्य क्रकचेन मानवान्, निकृत्तमर्मा गमनोद्यतो-भवत्।
सदैव, केनापि कटु-प्रलापिना, वचस्तदैवेत्थमभाणि दुःसहम्।।८५।।

प्रसंगः—गमनाय तत्परं मानसिंहं कश्चित् कटुवचनं जगाद-इति प्रस्तौति।

अन्वय—यदैव प्रतापवाक्यक्रकचेन निकृत्त-मर्मा (स) मानवान् गमनोद्यतः अभवत् तदैव केनापि कटु-प्रलापिना इत्थं दुःसहं वचः अभाणि।

व्याख्याः—यदा एवमस्मिन् एवसमये प्रतापस्य वाक्यम् एवक्रकचः प्रतापवाक्यक्रकचस्तेन प्रतापवाक्यक्रकचेन प्रतापसिंहवचनादारुभेदकयन्त्रविशेषेण लोके अरु इति प्रसिद्धेन निकृत्तानि मर्माणि यस्य स निकृत्तमर्मा भिन्नमर्मभागः मानवान् मानयुक्तः मानसिंहः गमनाय, उद्यतः, गमनोद्यतः प्रयाणाभिमुखः अभवत् जातः। तदैव तस्मिन्नेव काले केनापि अज्ञातनाम्ना जनेन कटुप्रलापिना कटु प्रलपति तच्छील इति कटुप्रलापी तेन अप्रियभाषिणं इत्थम् वक्ष्यमाणरूपेण दुःसहं दुःखेन सह्यत इति कष्टेन सोढुं योग्यम् वचः वचनम् अभाणि प्रोक्तम्।

भावार्थ—ज्यों ही प्रतापसिंह के आरे रूप वचन से मर्म स्थलों में विधा हुआ मानसिंह जाने को तैयार हुआ। उसी समय किसी कटुभाषी ने ऐसे दुःसह वचन कहे।।८५।।

अथाग्रहो मे भवते पुनः पुनः, सहैब नेयो भगिनीश्वरोऽपि सः।
रणे हि दृष्ट्वा भवतः पराक्रमं, प्रसन्नचेता स महान् भविष्यति।।८६।।

प्रसंगः—पुनरपि कविः केनचित्प्रोक्तां कटूक्तिं वर्णयति।

अन्वयः—अथ भवते पुनः पुनः मे आग्रह (यद्) स भगिनीश्वरः अपि सहैव नेयः। हि सः रणे भवतः पराक्रमं दृष्ट्वा महान् प्रसन्नचेता भविष्यति।

व्याख्याः—अथ अनन्तरम् भवते मानसिंहाय मे मम पुनः पुनः भूयो भूयः आग्रहः निर्नन्धः। यद् सः प्रसिद्धः भगिन्या ईश्वरः भगिनीश्वरः भगिनीपतिः अपि सहैव साकम् एव नेयः आनीतो भवेत्। हि यतः सः रणे युद्धे भवतः मानसिंहस्य पराक्रमं बलं दृष्ट्वा विलोक्य महान् श्रेष्ठः प्रसन्नं चेतो यस्य सः प्रसन्नचेता हृष्टचित्तः भविष्यति चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः इत्यमरः।

भावार्थ—अब आपसे मेरा यह बारम्बार आग्रह है कि लौटकर आते समय अपने साथ बहनोई अकबर को भी लेते आना। वे युद्ध स्थल में आपके पराक्रम को देखकर बहुत प्रसन्न होंगे।।८६।।

समन्ततः सन्ततःवाक्शरार्वितो, मुहुर्मुहुर्भोगिनिभो विनिःश्वसन्।
करेण सम्पीड्य करं व्यथाऽऽकुलः, ससर्प दिल्लीनगरं स 'मानवान्।।८७।।

प्रसंगः—कविः दुर्वचोव्यथितस्य मानसिंहस्य दिल्लीनगरम्प्रतिगमनं दर्शयति।

अन्वयः—समन्ततः सन्ततवाक्शरार्दितः भोगिनिभो मुहुर्मुहुः विनिःश्वसन् व्यथाकुलः मानवान् सः करेण करं सम्मीड्य दिल्लीनगरं ससर्प।

व्याख्याः—समन्ततः सर्वभागेभ्यः सन्ततं वाच एव शरास्तैरर्दितः सन्ततवाक्शरार्दितः निरन्तरवचनवाणपीडितः भोगिना निभो भोगिनिभः सर्पतुल्यः मुहुर्मुहुर्वारम्बारम् विनिः श्वसन् निःश्वासंगृहन् व्यथया आकुलः व्याथाकुलः व्यथित मानमस्यास्तीति मानवान् दर्पयुक्तः सः मानसिंहः करेण हस्तेन करं हस्तं सम्पीडयसम्मदर्य दिल्लीनगरं 'दिल्ली' इति प्रसिद्धं पुरं ससर्प जगाम।

भावार्थ—सभी ओर से लगातार वाणरूपी वचनों से विधा हुआ इसलिए साँ की भाँति बारम्बार श्वास लेता हुआ व्यथित घमण्डी मानसिंह दिल्ली चला गया।।८७।।

राणा-रणघोषणा

इतः परं मान-मतं विचार्य सः, युगान्तकालाग्निसमः समुज्ज्वलन्।
समस्त-सामन्तजने-जनेश्वरः समुज्ज्वलद्वह्नि-शिखोपमोऽब्रवीत्॥८८॥

प्रसंगः—प्रतापसिंहः सामन्तजनानाहूय कृत्यं वक्तुं प्रवर्तते इति कविः प्रदर्शयति।

अन्वयः—इतः परं मानमतं विचार्य युगान्तकालाग्निसमः समुज्ज्वलन् समुज्ज्वलद्वह्निशिखोपमः सः जनेश्वरः समस्त-सामन्तजने अब्रवीत्।

व्याख्या—इतःपरं मानसिंहगमनानन्तरम् मानस्य मतं मानमतं तत् मानसिंहाभिप्रायं विचार्य विचिन्त्य युगानाम् अन्तःयुगान्तः तस्मिन् यः कालः स एवाग्निः कालाग्निस्तेन युगान्तकालाग्निना समः प्रलयाग्नितुल्यः समुज्ज्वलन् दहन् यो वह्निस्तस्य शिखा एव उपमा यस्य सः समुज्ज्वलद्वह्निशिखोपमः प्रकाशमानपावकार्चिः सदृशः सः पूर्वोक्तः जनानामीश्वरः जनेश्वरः नृपतिः समस्तश्चासौ सामन्तानां जनः समस्तसामन्तजनस्तस्मिन् सम्पूर्णराज्याधिकारिवर्गे अब्रवीत् अगदत्।

भावार्थ—मानसिंह के चले जाने पर उनके अभिप्राय को विचार कर प्रलयकाल की अग्नि के समान तेजस्वी और जलती हुई अग्नि के सदृश महाराज प्रतापसिंह सभी सामन्तजनों से कहने लगे॥८८॥

अये! स्वदेशोन्नतये धृतासवोऽस्त्ययं जनो वक्तुमना मनागत।
हृदि स्वकीये विलिखन्तु मद्वचः, स्वशक्तिराद्या शुचिधर्मसाधिका॥८९॥

प्रसंगः—प्रतापसिंहः युद्धाय सामन्तान् प्रेरयति।

अन्वयः—अये! स्वदेशोन्नतये धृतासवः! अयं जनः मनाग् वक्तुमना अस्ति। अतः स्वकीये हृदि मद्वचः विलिखन्तु (यद् अस्माकं) स्वशक्तिः आद्या शुचिधर्मसाधिका (अस्ति)।

व्याख्या—अये भोः स्वस्य देशस्योन्नतिः स्वदेशोन्नतिस्तस्यै स्वदेशोन्नतये निजराष्ट्रोत्कर्षाय धृता असवो यैस्ते धृतासवो गृहीतप्राणाः, अयं जनः एष

पुरुषः मनाक् ईषत् वक्तुं मनो यस्य सः वक्तुमनाः विवक्षुः अस्ति वर्तते। अतोऽस्माद् कारणात् स्वकीये नैजे हृदि चेतसि मम वच इति मद्वचः प्रतापवचनम् विलिखन्तु अङ्कितयन्तु। स्वस्य शक्तिः स्वशक्तिः नैजं पौरुषम् आद्या प्राथमिकी शुचिश्चासौ धर्मश्च शुचिधर्मस्तस्यसाधिका शुचिधर्मसाधिका पवित्रधर्मनिर्मात्री अस्तीतिशेषः।

भावार्थ—हे अपने देश के लिए जीवन धारण करने वालों। हम आपसे कुछ कहना चाहते हैं। इसलिए हमारे वचनों को हृदय में बसाओ। अपनी शक्ति पहली पवित्र धर्म का साधक होती है।।८९।।

न किं नु भूयो भविता समुन्नतिर्न दासता नस्त्वरितं गमिष्यति।
यदन्तु शीघ्रं जननी च जन्मभूः, न किं पुन सौख्यमयी भविष्यति।।९०।।

प्रसंगः—प्रतापः स्वीयवीरान् युद्धाय प्रेरयति।

अन्वयः—किं नु भूयः समुन्नतिः न भविता? (किं) नः दासता त्वरितं न गमिष्यति? जननी जन्मभूः च पुनः शीघ्रं सौख्यमयी न भविष्यति किम्? (इति भवन्तः) वदन्तु।

व्याख्या—किमिति प्रश्ने नु-इति वितर्के भूयः पुनः समुन्नतिः सर्वथा उत्कर्षः न भविता न हि भविष्यति। किमिति प्रश्ने नः अस्माकं दासस्य भावो दासता पराधीनता त्वरितं शीघ्रं न गमिष्यति न दूरं भविष्यति। जननी उत्पादयित्री जन्मनो भूः जन्मभूः जन्मस्थानम् च पुनः भूयः शीघ्रं तत्क्षणे, 'शीघ्रं सपदितत्क्षणे' इत्यमरः। सौख्यमयी सुखस्य भावःसौख्यं तस्य विकारोऽस्ति, अस्याम् इति सौख्यमयी बहुलसुखा न नह्येव भविष्यति भविता इति वदन्तु कथयन्तु। भवन्त इति शेषः।

भावार्थ—क्या हमारे देश की उन्नति न होगी क्या हमारी पराधीनता शीघ्र दूर होगी। हम लोगों की जन्मभूमि मेवाड़ फिर से अधिक सुखवाली न होगी यह आपलाग बतायें।।९०।।

पपौ रणे यश्च किलोष्णशोणितं, नृमूर्तिधारी यम-लोक शासनः।
स भीमनामा रिपुरक्तरञ्जनः, न किं कुले नः प्रबभूव वीर-राट्।।९१।।

प्रसंगः—भीममुदाहरन् प्रतापः सामन्तानुत्साहयति।

अन्वयः—नृमूर्तिधारी यमलोकशासनः यः रणे उष्णशोणितं पपौ किल सः रिपुरक्तरञ्जनः भीमनामा वीरराट् नः कुले न प्रबभूव किम्।

व्याख्या—नरस्य मूर्तिं धरति तच्छील इति नृमूर्तिधारी मानवाकृतिमान् यमस्य लोके शासनं यस्यास्तीति यमलोकशासनः कृतान्तलोकाधिकारः 'कृतान्तो यमुनाभ्राता शमनो यमराज यमः' इत्यमरः। यः रणे संग्रामे उष्णं शोणितमुष्णशोणितम् तत् उष्णं रक्तं अपिबत् किल इति निश्चये। सः तथोक्तः रिपूणां रक्तेनरञ्जनं यस्य सः रिपुरक्तरञ्जनः शत्रुरुधिरविनोदी भीमनामा भीम इति नाम यस्य सः, भीमाभिधेयकः वीरेषु राजत इति वीरराट् वीरशिरोमणिः नः अस्माकं कुले वंशे न नहि प्रबभूव प्राजायत किम्।

भावार्थ—मानव देहधारी यमराज के समान जिन्होंने रणभूमि में गर्म खून को पिया। शत्रु के रक्त से अपने को प्रसन्न करने वाले भीम क्या हमारे वंश में नहीं उत्पन्न हुए।।९१।।

प्रशस्ततेजा अनघो दृढ़व्रतः, स राघवः किं न मदीय-वंशजः।
निहत्य युद्धे किल योऽत्र रावणं, महीतलं चारु चकार शीतलम्।।९२।।

प्रसंगः—राघवोदाहरणं प्रस्तूय महाराणा युद्धार्थम् स्वसामन्तवीरानुत्साध्यति।

अन्वयः—प्रशास्ततेजाः अनघः दृढ़ब्रतः सः राधवः किं मदीयवंशजः न वयः अत्र युद्धे रावणं निहत्य महीतलं चारु शीतलं चकार किल।

व्याख्या—प्रशस्तं तेजो यस्य सः प्रशस्ततेजाः विदितप्रतापः न विद्यते अघं यत्र सः अनघः निष्पापः, दृढंव्रतं यस्य सः दृढव्रतः सत्यप्रतिज्ञः सः प्रसिद्धः राघवः रघुवंशजो रामः किं मम अयं मदीयः तथोक्तः वंशो मदीयवंशस्तस्मिन् जातः मदीयवंशजः अस्य कुलोत्पन्नः न नह्येवासीत्। यः प्रसिद्धः रामः अत्र भारते युद्धसंग्रामे रावणं तन्नामानं रक्षोऽधियं निहत्य विनाश्य मह्यास्तलम् महीतलं तत् भूतलम् चारूशोभनं शीतलं तापरहितं चकार अकरोत् किल निश्चयेन।

भावार्थ—उत्तम कीर्त्ति वाले पाप रहित सत्य प्रतिज्ञ राम क्या हमारे वंशज नहीं हैं? जिन्होंने यहाँ पर रावण को मारकर भूतल की सुखी बना दिया था।।९२।।

मदीयदेशोऽस्म्यहमेव भूपति, प्रसिद्धमेतद्वसुधातलेऽस्त्यलम्।
कथं न लज्जाऽहह मां न बाधते, यदद्य देशो यवनैर्वशीकृतः।।९३।।

प्रसंगः—महाराणादेशदशां विलोक्यात्मानमुपालभते।

अन्वयः—(अयं) मदीयदेशः (अस्ति) अहम् एव भूपतिः अस्मि (इति) एतत् वसुधातले अलं प्रसिद्धम् अस्ति। अहह! कथं न मां लज्ला न बाधते यत् अद्य (अयं) देशः यवनैर्वशीकृतः।

व्याख्या—अयम् इति शेषः मम अयं मदीयः स चासौ देशश्च मदीयो देशः महाराणासम्बन्धिराष्ट्रम् अस्ति। अहम् प्रतापसिंह एव भूपतिर्नृपतिः अस्मि। एतत् इदम् सुधायास्तले वसुधातले क्षितितले अलम् अत्यर्थम् प्रसिद्धं विदितम् अस्ति। अहह-इति विषादेऽव्ययम् कथं केन प्रकारेण न नहि मां प्रतापसिंहं लज्जा त्रपा न न ह्येव वाधते सन्तप्तयति। यद् यस्मात् अद्यः साम्प्रतं देशः भारतारव्यं यवनैर्म्लेच्छैः वशीकृतः, न वशः अवशः वशः सम्पद्यमानः कृत इति वशीकृतः आत्माधीनतां नीतः अस्ति।

भावार्थ—यह मेरा ही देश है और मैं ही इसका स्वामी हूँ। ऐसा भूतल में प्रसिद्ध है किन्तु खेद है और मुझे लज्जा आती है कि मेरा देश यवनों के अधीन है।।९३।।

अधौधभाराज्जनता नताऽधुना वधू-जने चापि विलासिताऽसिता।
अहो दुरन्तः किल काल-चङ्क्रमः, यदद्य सर्वत्र विपत्त्युपक्रमः।।९४।।

प्रसंगः—महाराणा देशे दशां विलोक्य खेदमुपयानि।

अन्वयः—अघुना जनता अघौघभारात् नता वधूजने अपि विलासिता आसिता च। अहो कालचङ्क्रमः दुरन्तः किल यद् अद्य सर्वत्र विपत्त्युपक्रम अस्ति।

व्याख्या—अधुना साम्प्रतम् जनानां समूहो जनता प्रजा, अघानामोघ अघौघस्तस्य भारस्तस्मात् अघौघभारात् दुष्कृतसमूहभरात् नता नम्रा। वधूश्चासौजनश्च वधूजनस्तस्मिन् वधूजने नारीलोके अपि विलासिता भोगानुरक्तिः आसिता व्याप्ता चां अहो हन्त विषादेऽव्ययम्। कालस्य चक्रमः कालचक्रमः समयपरिभ्रमणम् दुष्टः अन्तः यस्य सदुरन्तः दुःखावसायी किल निश्चयेन। यत् यस्माद्धेतोः अद्य इदानीम् सर्वत्र चतुर्दिशम् विपत्तेः उपक्रमः विपत्त्युपक्रमः विपत्संचारः अस्ति।

भावार्थ—आज प्रजा पापों के भार पीड़ित हो दब गई है और स्त्रियों में भी भोग की इच्छा मर गई है। दुःख है समय की गति कठिन होती है। सभी जगह विपत्ति का आरम्भ दिखाई देता है।।९४।।

महोच्चलद्वारणवैरि-वारणाः!, कथं नु यूयं किल शान्त-मानसाः।
पतङ्गवद् वह्निमुखं विविक्षवो, न यावदेते यवना दहन्त्यलम्।।९५।।

प्रसंगः—महाराणाप्रतापः सामन्तान् सम्बोधयति।

अन्वयः—हे महोच्चलद्वारणवैरिवारणाः! यूयं कथं नु शान्तमानसाः किल। वह्निमुखं पतङ्गवद् विविक्षवो एते यवनाः यावत् अलं न दहन्ति।

व्याख्या—हे, महान्त उच्चलन्तश्च ये वारणा महोच्चलद्वारणाः ते इव वैरिणस्तेषां वारणाः महोच्चलद्वारणवैरिवारणाः विपुलप्रचलद्गजशत्रुनिषेद्धारः यूयं वास्तव्याः सामन्ताः कथं नु किमर्थं शान्तं मानसं येषान्ते शान्तमानसाः स्वस्थ चित्ताः किल निश्चयेन सन्ति। वन्हेर्मुखं तत् अग्निवक्त्रं पतङ्गवत् कीटवत् वेष्टुमिच्छवो विवक्षवः प्रवेष्टुमिच्छव एते यवनाम्लेच्छाः यावत् अलमत्यर्थं न दहन्ति न ज्वलन्ति।

भावार्थ—हे बड़े-बड़े मतवाले हाथियों के समान शत्रुओं के विनाशक आप लोग कैसे शान्त हो गये हो। जब तक अग्नि में जलने के लिए उन्मुख ये यवन जलकर नष्ट नहीं हो जाते।।९५।।

प्रियो यदि स्याद् भगवान् महामहाः, स एकलिङ्गोऽमर-वृन्द-वन्दितः।
प्रिया यदि स्याल्ललनापवित्रता, प्रियो यदि स्यात् भवतामयञ्जनः।।९६।।

प्रसंग:—प्रतापसिंह: सासन्तान् बोधयति।

अन्वय:—यदि अपरवृन्दवन्दित: महामहा: स: भगवान् एकलिङ्गप्रिय: स्यात् यदि ललनापवित्रता प्रिया स्यात् यदि अयं जन: भवताम् प्रिय: स्यात्।

व्याख्या—यदि चेत् अमराणां वृन्दैर्वन्दित: अमरवृन्दिवन्दित: देवसमूहार्चित: महन्महो यस्य स महामहा:, अधिकतेजस्वी स: प्रसिद्ध: भगवान् ऐश्वर्योपेत: एकलिङ्ग: एतन्नामक: महाकाल: प्रिय: प्रेमास्पदं स्यात् भवेत्। यदि चेत् ललनानाम्पवित्रता ललना पवित्रता कामिनीशुद्धि: प्रिया अभिमता स्यात्। यदि चेत् अयं जन: प्रतापसिंह: भवताम् पुरोवर्तिनाम् प्रिय: अभिमत: स्यात् भवेत्।

भावार्थ—यदि देवगणों से पूजित-ऐश्वर्यशाली भगवान् महाकाल आप लोगों को प्रिय हों और स्त्रियों की पवित्रता अच्छी लगती हो और स्वयं मैं आप लोगों का प्रिय हूँ।।९६।।

तदद्य सार्ध मयका रणाङ्गणे, प्रमत्तभावा: समरे धृतायुषा:।
विधाय मानङ्गतमान-मर्दनं, स्ववीरभूमिं कलयन्तु सर्वथा।।९७।।

प्रसंग:—प्रतापसिंहो देशरक्षार्थं सामन्तानुदयुङ्क्ते।

अन्वय:—तदद्य मयका साद्र्धरणाङ्गणे प्रमत्तभावा: धृतायुधा: (भवन्तु) समरे मानङ्गतमानमर्दनं विधाय सर्वथा स्ववीरभूमिं कलयन्तु।

व्याख्या—तत् तर्हि अद्य अस्मिन्काले मया एव मयका प्रतापसिंहेन सार्ध समम् रणस्य अङ्गणे रणाङ्गणे रणभूमौ प्रमत्त: भावो येषान्ते प्रमत्तभावा: जाग्रदात्मभावा: धृतायुधा: धृत आयुधो यैस्ते तथाविधा: गृहीतशस्त्रा 'भवन्तु' इति शेष: समरे युद्धे 'मानं मानसिंह' गतं मानस्य मर्दनं यस्य तं तथोक्तं सञ्जातदर्पभङ्गं विधाय कृत्वा सर्वथा सर्वतोभावेन स्वाया वीराणाम्भूमिं स्ववीरभूमिस्तां स्ववीरभूमिं निजशूराणां भुवम् कलयन्तु समादन्तु समादरार्थं परिचिन्वन्तु।

भावार्थ—तो आज मेरे साथ समरभूमि में युद्ध प्रेमी होकर शस्त्र धारण करें। और युद्ध में मानसिंह के मान को नष्ट कर अपनी मातृभूमि को पहचानें।।९७।।

धिग्ब्राह्मणं तमथ यः श्रुति-मन्त्र हीनः,
धिक् क्षत्रियं तमथ यः समरेऽतिदीनः।
धिग् वैश्यमर्थिजन शोषणमात्र-पीनं,
शूद्रं च धिक् सुजनसेवकताविहीनम्।।९८।

प्रसंगः—प्रतापः शूरान् समरायोद्योजयति।

अन्वयः—अथ तं ब्राह्मणं धिक् यः श्रुति-मन्त्रहीनः, अथ तं क्षत्रियं धिक् यः समरे अतिदीनः, अर्थिजनशोषणमात्रपीनं वैश्यं धिक्, सुजनसेवकताविहीनं शूद्रं च धिक् (अस्तु)।

व्याख्याः—अथ अनन्तरं तं तादृशं ब्राह्मणं विप्रं धिक् न्यक्कारः। यः विप्रः श्रुत्यामन्त्रेण हीनः श्रुतिमन्त्रहीनः वेदमन्त्ररहितः। अथ च तं तथोक्तं क्षत्रियं क्षत्रिजातिसमुत्पन्नं नरं धिक् न्यक्कारः यः समरे युद्धे हीनमतिक्रान्तः अतिदीनः नितरां दैन्योपेतः अस्ति। अर्थी चासौ जनश्च अर्थिजनः तस्य शोषणमात्रेण पीनस्तमर्थिजनशोषणमात्रपीनम् धनार्थिजनाः शोषणमात्रस्थूलम् वैश्यं वणिजं धिक्न्यक्कारः अस्ति। सुजनानाम्सेवकतासुजनसेवकता तया विहीनस्तं सुजनसेवकताविहीनम् शोभनमजं सेवकतारहितं शूद्रं चतुर्थवर्णं च तथा धिक्न्यक्कारः अस्तीतिशेषः।

भावार्थ—उस ब्राह्मण को जो वेदमन्त्रों के ज्ञान से रहित है धिक्कार है। और वह क्षत्रिय जो यद्ध से भीरू है धिक्कार योग्य है। वह वैश्य धिक्कार योग्य है जो धनकी कामना वाले लोगों के दोहन से मोटा हो गया है। शूद्र, सज्जनों की सेवा से विमुख धिक्कार योग्य है।।९८।।

तिष्ठन्तु ते निज-गृहे ललना-विलासाः,
ये वारुणी-विषय-वञ्चकतैकदासाः।
ये जन्मनैव खल-कर्म समर्थयन्ति,
प्रोच्चैर्बलं शुचि-कुलं च कदर्थयन्ति।।९९।

प्रसंगः—प्रतापः युद्धविमुखान् निन्दति।

अन्वयः—ललना-विलासाः ये वारुणीविषयवञ्चकतैकदासाः (सन्ति) तथ च ये जन्मना एवं खलकर्म समर्थयन्ति, प्रोच्चैर्बलं शुचिकुलं च कदर्थयन्ति (अधुना) ते निजगृहे तिष्ठन्तु।

व्याख्या—ललनासुविलासोऽस्ति येषान्ते ललनाविलासाः स्त्रीजनानुरागिणः ये युवानः वारुण्याविषयाणाम् वञ्चकता यश्च, एकेदासाः वारुणीविषय-वञ्चकतैकदासाः, मदिराभोगपरप्रतारणपराः सन्ति। तथा च ये जनाः जन्मना जात्या एव खलानां कर्म खलकर्म तत् दुष्टकृत्यं समर्थयन्ति अनुमोदयन्ते। प्रोच्चैरुन्नतत्वेन वलं पौरुषं शुचि पवित्रं च कुलंवंशं कदर्थयन्ति निन्दितं कुर्वन्ति ते तथाविधा निजं गृहं निजगृहं तस्मिन् स्वमन्दिरे तिष्ठन्तु।

भावार्थ—जो तरूणियों में अनुराग रखते हों मदिरा विषयसेवन और दूसरे को ठगने में तत्पर हैं। उत्पत्ति से ही दुष्ट कृत्य करते हैं। दृढ़ता से बल तथा पवित्र कुल की निन्दा करते हैं ऐसे लोग अपने घर में पड़े रहें।।९९।।

आयातु स प्रकटयम् बलमत्युदारं
कर्तुं समर्थ इह यो व्रतमासिधारम्।
क्रीडास्थलीव किल यः समरस्थली स्यात्,
किं वा विषाद इह यस्य कृते प्रसादः।।

प्रसंगः—प्रतापः स्वान् वीरान् उत्साहयति।

अन्वयः—यः इह आसिधारं व्रतं कर्तुं समर्थः (स्यात्) यं किल समरस्थली क्रीड़ास्थली इव स्यात् किं वा इह विषादः यस्य कृते प्रसादः (अस्ति) स अत्युदारं बलं प्रकटयन् आयातु।

व्याख्या—यः शूरः-इह अस्मिन् समरे असेः धारा इव इत्यसिधारा तस्या इदमासिधारम् तत् खड्गधारम् व्रतं नियमं कर्तुमनुष्ठातुं समर्थः प्रभुः। यं जनं किल निश्चयेन समरस्य स्थली समरस्थली युद्धभूमिः क्रीडायाः स्थली क्रीडास्थली विहारभूमिः इव स्याद् भवेत्। किं वा इह अस्मिन् युद्धे विषादः

खेदः यस्य कृते यस्मै जनाय प्रसादः प्रसन्नता अस्ति। सः तथाविधः जनः अत्युदारम् अत्यन्तमुत्कृष्टं बलम्पौरुषम् प्रकटयन् दर्शयन् आयातु आगच्छतु।

भावार्थ—जो इस युद्धभूमि में तलवार की धार पर चलने जैसा व्रत करने के लिए तत्पर हो। और जो विषाद में भी हर्ष मानता हो-ऐसा व्यक्ति अपने बल का प्रदर्शन करने के लिए आये।।१००।।

आयातु स प्रबलवानिह साऽभिमानं,
कृत्वा स्वदेश-चरणे मृदु-मौलि-दानम्।
वक्षः क्षताज्जनितशोणित-बिन्दुभिर्यः,
निश्शङ्कमङ्कयतु गौरव-गर्वगानम्।।१०१।।

प्रसंगः—अत्र अद्ये प्रतापः देशरक्षणे वीरान् प्रेरयति।

अन्वयः—यः प्रबलवान् स्वदेशचरणे मृदुमौलिदानं कृत्वा वक्षःक्षतात् जनितशोणितबिन्दुभिः निश्शङ्कम् गौरव-गर्वगानम् अङ्कयतु, सः इह साभिमानम् आयातु।

व्याख्या—यः जनः प्रकृष्टं बलमस्यास्तीति प्रबलवान् महाशक्तिः स्वस्य देशस्य चरणे स्वदेशचरणे-निजराष्ट्रपादे मृदु यथा भवति तथा मौलेः दानम् मृदुमौलिदानम् तत् नम्रशिरः समर्पणं कृत्वा विधाय वक्षसः क्षतात्-जनिताः शोणितस्य विन्दवः-तैः वक्षः क्षताज्जनितशोणितविन्दुभिः, उरोभ्रंशात्-उत्पन्नरक्त-पृषद्भिः निःशङ्कनिर्भयं गौरवं गर्वस्तस्य गानम् गौरवगर्वगानम् तत् गरिमाभिमानगीतिम् अङ्कयतु लक्षयतु। सः पूर्वोक्त इह रणभूमौ साभिमानम् अभिमानेन-सह गर्वितोभूत्वा आयातु-आगच्छतु।

भावार्थ—जो बली पुरुष अपने देश के पैरों पर सरलता से मस्तक समर्पित कर अपनी छाती से निकले खून की बूदों से निडर हो गौरव गान को लिखा सकें वह इस युद्धभूमि में अभिमान सहित आये।।१०१।।

सिन्दूरबिन्दुरिव भारत-भूमि-भालात्,
'मेवाड़' एव पवनैर्यवनैर्विलुप्तः।

भूयोऽपि तं किल तथा परिरञ्जयेद्यः,
आयातु तत्कृत इदं प्रणतं शिरो मे।।१०२।।

प्रसंगः—प्रतापकृतं सामन्तप्रोत्साहनम् वर्णयते।

अन्वयः—एषः मेवाड़ः सिन्दूरबिन्दुः इव भारतभूमिभालात् यवनैः विलुप्तः। यः किल भूयोऽपि तं तथा परिरञ्जयेत् (सः) आयातु। तत्कृते मे इदं शिरः प्रणतम् (अस्ति)।

व्याख्या—एषः अयं मेवाड़ः- मेवाड़ इति ख्यातो भागः सिन्दूरस्य बिन्दुः सिन्दूरबिन्दुः सिन्दूरकण इव भारतस्य भूमेः भालात् भारतम् मस्तकात् यवने-म्लेच्छैः पवनैर्वायुभिः विलुप्तः पृथकृतः। यः शूरः किल निश्चयेन भूयः पुनरपि तं पूर्वाभिहितं भारतभूमिभालं तथा पूर्वसदृशं परिरञ्जयेत् शोभितं कुर्यात्। स ईदृशः आयातु आगच्छतु। तत्कृते तदर्थम् मे मम प्रतापस्य इदं शिरः अयं मूर्धा, प्रणतम् प्रकर्षेण नम्रतां गतः अस्ति।

भावार्थ—इस मेवाड़भूमि को यवनों ने वायु द्वारा भारतभूमि के मस्तक से सिन्दूर की भाँति अलग कर दिया है। इसे फिर से जो पुरुष निश्चित ही सुशोभित कर सके वह आये। उसके लिए यह मेरा शिर झुका हुआ है।।१०२।।

धन्याऽस्ति तेन जननी जनकोऽप्यनन्यो,
वंशश्च तेन सुसमस्त-समस्त-तापः।
कीर्तिश्च तस्य भुवने भुवनैकभूषा,
प्राणान् समुत्सृजति यो निज-देश-हेतोः।।१०३।।

प्रसंगः—देशाय प्राणांस्त्यजतः प्रसंसति।

अन्वयः—तेन जननी धन्या अस्ति, जनकः अपि अनन्यः (अस्ति) वंशश्च तेन सुसमस्त-समस्त तापः (अस्ति), भुवने तस्य कीर्तिः भुवनैकभूषा च (अस्ति), यः निजदेशहेतोः प्राणान् समुत्सृजति।

व्याख्या—तेन प्रशंसनीयेन जननी माता धन्या श्रेष्ठा अस्ति। जनकः पिता अपि नास्त्यन्यो स्यात् सो जन्यः अद्वितीयः अस्ति। वंशोऽन्ववायश्च तेन महता सुष्ठु सं सम्यक् अस्ताः तापा यस्य स सुसमस्ततापः सर्वथा शान्तक्लेशः अस्ति। भुवने लोके च तस्य जनस्य भूष्यतेऽनयेति भूषा भुवनस्य एका भूषा भुवनैकभूषा लोकैकालं कृतिः कीर्तिः समज्ञा अस्ति 'यशः कीर्तिः समज्ञा च इत्यमरः। यः जनः निजस्य देशस्य हेतोः निजदेशहेतोः स्वदेशार्थम् प्राणानसूम् समुत्सृजति विजहाति।

भावार्थ—उससे माता और पिता धन्य होते हैं उसका कुल सभी कष्टों से रहित हो जाता है। उसकी कीर्ति भूषण के समान संसार में दीप्त होती है। जो स्वदेश के लिए प्राणों को न्यौछावर कर देता है।।१०३।।

स्वच्छन्द-मन्द-गमना यवनाः गजाऽऽभाः,
नन्दन्तु तावदिह नन्दन-कानने मे।
वक्षो-विदारणकरं निनदं विधाय
यावन्न सर्पति महामृगराज एषः।।१०४।।

प्रसंगः—प्रतापः सामन्तान् उत्साहयति।

अन्वयः—वक्षोविदारणकरं निनदं विधाय यावद् एषः महामृगराजः न सर्पति तावद् गजाऽऽभाः स्वच्छन्द-मन्द-गमनाः यवनाः मे इह नन्दनकानने नन्दन्तु।

व्याख्या—वक्षसो विदारणं करोति तच्छीलः वक्षो विदारणकरः कृञोहेतु ताच्छील्यानुलोम्येषु इतिटः। तम् उरोभेदजनकं निनदं ध्वनिं विधाय कृत्या यावत् यावत्कालपर्यन्तम् एषः अयम् मृगाणां राजा मृगराजः महाश्चासौ मृगराजः महामृगराजः हिंहो न सर्पति न प्रयाति। तावत् तत्कालपर्यन्तम् स्वच्छन्दं मन्दंमनं येषान्ते स्वच्छन्दगमनाः स्वैरं मन्थरगतयः, गजस्याभा इवाभा येषान्ते गजाभा हस्तिनिभाः यवनाम्लेच्छाः मे मदीये इह अस्मिन् नन्दनमेव काननं नन्दनकाननन्तस्मिन् नन्दनवननिभे देशे नन्दन्तु समृद्धिं प्रयान्तु।

भावार्थ—छाती को फाड़ देनेवाला गर्जन कर जब तक यह सिंह नहीं पहुँचता। तब तक मनमाने ढंग से धीरे धीरे चलने वाले हाथियों के तुल्य ये म्लेच्छ मेरे नन्दनवन तुल्य देश में आनन्द कर लें।१०४।।

अद्यापि पश्यतु जगद्रघुवंश-वीर्य,
ग्रन्थेषु मत्कृत इदं विलिखन्तु विज्ञाः।
एकोऽपि कोपिततमः कतमः परेण,
दिल्लीश्वरेण समरं समरीरचद्यत्।१०५।।

प्रसंगः—प्रतापसिंहः प्रकारान्तरेणयुद्धं घोषयति।

अन्वय—जगत् अद्यापि रघुवंशवीर्य पश्यतु। विज्ञाः ग्रन्थेषु मत्कृते इदं विलिखन्तु यत् कोपिततमः कतमः एकः अपि परेण दिल्लीश्वरेण समरं समरीरचत्।

व्याख्या—जगत् विश्वम्-अद्य वर्तमाने अपि रघूणां वंशस्य वीर्य रघुवंशवीर्यम् सूर्यवंशीयरघुकुल पराक्रमं पश्यन्तु विलोकयन्तु। विशेषेण जानन्तीति विज्ञाः विद्वांसः ग्रन्थेषु-वर्णनीयेषु पुस्तकेषु मम कृते इति मत्कृते मदर्थम् इदम्-भविष्यत्कालिकम् विलिखन्तु अङ्कयन्तु। यत्-परेण अन्येन केनचित् कोपिततमः बहुधा क्रोधं प्रापितः कतमः कश्चन एकोऽसहायः दिल्लीश्वरेण दिल्लीस्वामिना बहुधा-सम्राजा समरं युद्धं समरीरचत् स्वयामास।

भावार्थ—आज भी संसार रघुवंशियों का पराक्रम देखें। इतिहासकार इस बात को मेरे विषय में लिखें कि दूसरे से क्रोध को पहुँचाये गये किसी एक ने सम्राट् दिल्ली नरेश के साथ युद्ध किया था।१०५।।

तदैव सैन्ये सहसा समाविशत् तडित्प्रभः साहस एव मूर्तिमान्।
जयेति शब्देन सरोष-घोषणो, रवोऽभवच्छस्त्र-ततिप्रताडितः।१०६।।

प्रसंगः—प्रतापवचोभिः प्रेरिताः सामन्ताः साहसिका बभूवुरिति वर्णयते।

अन्वयः—तदा एव सैन्ये सहसा एव तडित्प्रभः मूर्तिमान् साहसः समाविशत् जयेति शब्देन सरोष-घोषणः शस्त्रततिप्रताड़ितः रवः अभवत्।

व्याख्या—तदाएव प्रतापवाक्प्रबन्धश्रवणसमकालमेव सैन्ये सेनासमुदाये सहसा शीघ्रमेव तडित् प्रभा यस्य स तडित्प्रभः विद्युत्कान्तिः मूर्तिमान् विग्रहधारी साहसः समुत्साहसः समाविशत् प्रविष्टः। जय-जयजय इति एवम्भूतेन-शब्देन स्वनेन, रोषेण सहिता सरोषा तादृशी घोषणा यत्र सः सरोषघोषणः सामर्षघोषणः शस्त्राणान्ततिभिः प्रताडितः शस्त्रततिप्रताडितः शस्त्रसमूहझंकृतः रवः शब्दः अभवत् सञ्जातः।

भावार्थ—प्रतापसिंह के इस प्रकार कहने पर ही सैनिकों में एक साथ ही विजली की चमक के समान सहसा मानों मूर्तिधारी साहस भर गया। और जय हो जय हो इस प्रकार क्रोधपूर्ण घोषणा में शस्त्रों की झंकार गूँज गयी।।१०६।।

स 'एकलिङ्गो' भगवाञ्जयत्वलम्, जयत्वलं भारत-मा महीयसी।
प्रतापसिंहो विजयी जयत्वलं, जयत्वलं तदबलवत्तरं बलम्।।१०७।।

प्रसंग:—पद्येऽस्मिन् प्रतापसिंहोत्कर्षमभिलषतिकविः।

अन्वय:—भगवान् एकलिङ्गः अलं जयतु महीयसी भार-मा अलं जयतु विजयी प्रतापसिंहः अलं जयतु तद्बलवत्तरं बलम् अलं जयतु।

व्याख्या—सः प्रसिद्धः भगवान् ऐश्वर्यविशिष्टः एकलिङ्गः-एतदभिधेयो महादेवः अलम् पर्याप्तम् जयतु विजयताम्। महीयसी अमितप्रभावाभारतम् मा इव इति भारत मा जननीव मान्या भारतभूमिः अलं पर्याप्तम् जयतु सर्वोत्कर्षेण वर्तताम्-विजयी- जययुक्तः प्रतापसिंहो मेवाड़शासकः अलमत्यर्थं जयतु विजयताम्। तस्य वलवत्तरं तद्बवन्तरम् अत्यर्थं बलोपेतं वलं सैन्यम् अलं सर्वथा जयतु विजयताम्।

भावार्थ—भगवान् एक लिंग की जय हो। पूजनीय भारत माँ की जय हो। जयनशील प्रतापसिंह की जय हो। और उनकी श्रेष्ठ सेना की जय हो।।१०७।।

रणाङ्गणे राणाप्रतापः

प्रतापसिंहस्य महोत्तमं यशः,
रिपूच्छलच्छोणित-शाणलेखनैः ।
शिलोच्चये भाति यदीयकेऽङ्कितं,
प्रिया न कं सा किल 'हल्दिघाटिका'।।१०८।।

प्रसंगः—कविः हल्दिघाटीं प्रशंसति।

अन्वयः—यदीयके शिलोच्चये रिपूच्छलच्छोणितशोणलेखनैः अङ्कितं प्रतापसिंहस्य महोत्तमं यशः भाति, सा किल हल्दिघाटिका कं न प्रिया?

व्याख्या—यस्याः अयं यदीयः स एव यदीयकस्तस्मिन् यदीयके यत्सम्बन्धिनि शिलोच्चये पर्वते रिपूणाम् उच्छलन्ति यानि शोणितानि रिपूच्छलच्छोणितानि तैः शोणानि यानि लेखनानि तैः रिपुच्छलच्छोणितशोणलेखनैः शत्रुस्रवद्रक्तारूणाङ्कनैः अङ्कितमुद्ङ्कितं प्रतापसिंहस्य मेवाड़शासकस्य महश्च तदुत्तमश्च महोत्तमं सर्वथा श्रेष्ठं यशः कीर्तिः भाति शोभते। सा ख्याता हल्दिघाटिका एतदभिदेहा समरभूमिः कं देशानुरागिणं न प्रिया प्रीतिकरी अस्तीति शेषः।

भावार्थ—जिसके पत्थर खण्ड शत्रुओं के गिरते हुए बुँदों से सकाम हो गये हैं-और वे प्रताप सिंह के श्रेष्ठ यश को गा रहे हैं। ऐसी हल्दीघाटी किस वीर को प्रिय नहीं है अर्थात् सभी को प्रिय है।।१०८।।

'अरावली' यां समवाप्य सुन्दरी, सुहल्दिघाटी प्रथिता रणस्थली।
परस्परं सा भुवि योद्धुकामतः, प्रवर्तमानोभय-पक्षतोऽभवत्।।१०९।।

प्रसंगः—कविः हल्दिघाटी दर्शयति।

अन्वय—यां समवाप्य सुहल्दिघाटी प्रथिता सुन्दरी सा रणस्थली अरावली भुवि उभयपक्षतः परस्परं योद्धुकामतः प्रवर्तमाना अभवत्।

व्याख्या—यां समवाप्य लब्ध्वा सुहल्दिघाटी प्रथिता 'हल्दीघाटी'

इति नाम्ना प्रसिद्धिमिता सुन्दरी मनोहरा सा रणस्थली युद्धभूमिः अरावली अरावली-इत्यभिधेया पर्वतश्रेणिः भुवि पृथिव्याम् उभयपक्षतः पक्षद्वयादपि परस्परं मिथः योद्धुकामयत इति योद्धुंकामस्तस्मात् योद्धुकामतः युद्धेच्छया प्रवर्तमाना प्रारब्धा अभवत् अभूत्।

भावार्थ—जिसे पाकर हल्दीघाटी इस नाम से विख्यात मनोहर वरण भूमि अरावली पर्वतमाला पृथ्वी पर दोनों ही ओर से युद्ध के अभिलाष में लग गई।।१०९।।

क्व लक्षशो भारतभाररूपिणः, प्रकामचाराः यवना मदोद्धताः।
क्व जन्मभू-भार-निवारणे रतः, जनाः कियन्तो धृत-सङ्गर-व्रताः।।११०।।

प्रसंगः—यवनसेनापेक्षया प्रतापसैनिकानां न्यूनत्वमाह कविः।

अन्वयः—मदोद्धताः प्रकामचाराः भारत-भार-रूपिणः लक्षशः यवनाः क्व? (तथा च) जन्म-भू-भार -निवारणे रतः धृतसङ्गर- व्रतः, कियन्तः जना क्व? (द्वौ क्वौ महदन्तरं सूचयतः)।

व्याख्या—मदेन उद्धता मदोद्धताः दर्पप्रगल्भाः प्रकामं चरन्तीति प्रकामचाराः स्वच्छन्दगामिनः भारतस्य भाररूपिणः भारतभाररूपिणः भारतभूवो भरभूताः लक्षशो लक्षसंख्यापरिमिताः यवनाः म्लेच्छाः। जन्मभूभार -निवारणे जन्मनो भुवः भारस्य निवारणं जन्मभूभारनिवारणन्तस्मिन् जानि- पृथिवीभरानयने रता लग्नाः धृतं सङ्गरस्य व्रतं यैस्ते धृतसङ्गरव्रताः गृहीत युद्धसंकल्पाः कियन्तः कतिपये जनाः पुरुषाः क्व = कुत्र। अर्थात् परस्परं महदन्तरमस्ति।

भावार्थ—कहाँ तो मद युक्त होने से उद्दण्ड और मनमाना आचरण करने वाले इस भारत भूमि के भाई रूप लाखों यवन और कहाँ अपनी जन्म- भूमि का भार उतारने में लगे युद्ध संकल्प को धारण किए हुए थोड़े से राजपूत वीर।।११०।।

तथापि जातं समरं तथाविधं, यदद्यकालेऽपि तदुल्वण-प्रभाम्।
विलिख्य मौनं स्वशिलातलेष्वलं, चिरादहो रौति 'अरावल' स्थली।।१११।।

प्रसंगः—एवं स्थितेऽपि जातं युद्धं महद्भीषणमिति दर्शयति कविः।

अन्वयः—तथापि यत् समरं तथाविधम् जातम् तद् अहो अद्य काले अपि अरावली स्थली स्वशिलातलेषु अलम् उल्वणप्रभां विलिख्य चिरात् मौनं रौति।

व्याख्या—तथापि- उभयोः सेनयोर्मध्येमहदरन्तरेऽपि यत् समरं युद्धं तथाविधेतादृशं जातम् अभूत्। यत् यतः अहो इत्याचर्ये अद्य कालेऽस्मिन् समयेऽपि अरावली- अरावली इति नाम्ना प्रसिद्धा स्थली भूमिः स्वशिलातलेषु- शिलायास्तलानि शिलातलानि स्वानि च तानि शिलातलानि स्वशिलातलानि तेषु निजप्रस्तरभागेषु अलम् अत्यन्तम् अल्वणं प्रभाम् उल्वणप्रभाम् दीप्तां कान्ति विलिख्यअङ्कितां कृत्वा चिरात् चिरकालाय मौनमस्पष्टं यथा स्या त्तथा रौति रोदिति।

भावार्थ—इतना होने पर भी दोनों सेनाओं में ऐसी भयंकर लड़ाई हुई-जिसे आज भी अरावली पर्वत की भूमि अपने शिलाखण्डों पर दीप्त प्रकाश के रूप में लिखकर चिरकाल से मौन को प्रकट कर रही है।११११॥

धनुःप्रदात्री जननी वसुन्धरा, जल-प्रवर्षा-मिषतो रणस्थले।
निरीक्ष्य सूनून् मरणाय तत्परान्, सुतान् परावर्त्तयितुं मनोऽकरोत्।११२॥

प्रसंगः—युद्धस्थले जलवृष्टिः समजनि-इत्याहकविः।

अन्वयः—जनुः प्रदात्री जननी वसुन्धरा रणस्थले (स्व) सूनून् मरणाय तत्परान् निरीक्ष्य जलप्रवर्षामिषतः (तान्) सुतान् परावर्त्तयितुं मनः अकरोत्।

व्याख्या—जनुः प्रदात्री जन्मप्रदा जननी माता धरती धरा वसुनो ध्रा वसुन्धरा- वसुधा, सर्वसहावसुमती वसुधोर्षी वसुन्धरा इत्यमरः मरणाय मृत्यवेतत्परान् उद्यतान् सूनून् पुत्रान् निरीक्ष्य विलोक्य जलस्य प्रवर्षा जलप्रवर्षा तस्यामिषतः जलप्रवर्षामिषतः तोयवृष्टिच्छलात् सुतान् आत्मजान् परावर्तयितुं निवर्त्तयितुं मनः चेतः अकरोत् कृतवती।

भावार्थ—जन्म देने वाली माँ पृथ्वी ने युद्धभूमि में मरने के लिए उद्यत सन्तानों को देखकर जलवर्षा के बहाने से उन्हें युद्ध से विरत होने को कहा।।११२।।

स-रक्तमांसाञ्चितसद्वसुन्धरा-निरीक्षणे हाऽक्षमतामुपागतः।
कुयुद्धतः पूर्वमहो महोनिधिः निमीलिताक्षः सहसाऽभवद्रविः।।११३।।

प्रसंग:—युद्धकालेसूर्योऽस्तमुपगत इति वर्णयतिकविः।

अन्वयः—हा महोनिधिः रविः सरक्तमांसाञ्चितसद्वसुन्धरानिरीक्षणे अक्षमताम् उपागतः। अहो (सः) कुयुद्धतः पूर्व सहसां निमीलिताक्षः अभवत्।

व्याख्या—हा इति खेदे महसां निधिर्महोनिधिः तेजसामाकरः रविः सूर्यः रक्तानि च मांसानि च रक्तमांसानि तैः स हि तानि सरक्तमांसानि तैः अञ्चिता या सती वसुन्धरा तस्या निरीक्षणे सरक्तमांसाञ्चितसद्वसुन्धरानिरीक्षणे शोणितमांसाक्तीर्णसद्भुम्यवलोकने अक्षमताम् असमर्थताम् उपागतः प्राप्तः अहो आश्चर्यें सः रविः कुयुद्धतः अनभिमत संगरात् पूर्व प्रागेव सहसा अकस्मात् निभीलितेऽक्षिणी येन स निमीलिताक्षः पिहितलोचनः अभवत् सञ्जातः।

भावार्थ—खेद है अत्यन्त कान्तिमान् सूर्य भी रक्तमांस से व्याप्त इस सुन्दर पृथ्वी को देखने में असमर्थ हो गया और आश्चर्य, पृथ्वी पर होने वाले इस अनिष्ट संग्राम के पहिले ही अस्त हो गया।।११३।।

तदैव युद्धोदयकाल-सूचकः, समुत्थितो दुर्धर-दुन्दुभि-ध्वनिः।
क्षणेन सा सुन्दर-हल्दिघाटिकाऽतिभीमहुङ्कारमयी तदाऽभवत्।।११४।।

प्रसंग:—हल्दिघाट्यां रणदृश्यं प्रदर्शयति कविः।

अन्वयः—तदैव युद्धोदयकालसूचकः दुर्धरदुन्दुभिध्वनिः समुत्थितः। तदा सुन्दरहल्दिघाटिका क्षणेन अतिभीमहुङ्कारमयी अभवत्।

व्याख्या:—तदैव तस्मिन्नेव क्षणे युद्धस्य उदयो युद्धोदयस्तस्य कालं सूचयतीति युद्धोदयकालसूचकः, संग्रामारम्भसमयसूचकः दुर्धरो यो

दुन्दुभेर्ध्वनिः सः दुर्धरदुन्दुभिध्वनिः, भयंकरभेरीशब्दः समुत्थितः समजायत। तदा तस्मिन् समये सा पूर्वोक्ता सुन्दरी हल्दिघाटी एव सुन्दरहल्दिघाटिका भव्या हल्दिघाटी नामधेयाभूमिः क्षणेन अल्पीयसैवकालेन अतिभीमो यो हुङ्कारः अतिभीमहुङ्कारः सः अस्ति अस्यामिति अतिभीमहुङ्कारमयी दारुणहुङ्कृतिरूपा अभवत् अभूत्।

भावार्थ—उसी समय युद्ध का आरम्भ होने वाला है, ऐसी सूचना देने वाला नगाड़ा बज उठा उसकी भयंकर ध्वनि फैल गयी। और उसी समय हल्दीघाटी क्षण भर में हुङ्कार से भर उठी।।११४।।

तदैव सैन्ये रण-राष-लक्षणो, विलक्षणो वैरिचमूनिषूदनः।
स वीरताया निकषोपलोऽमलो, ननाद वेगेन निसर्ग-निष्ठुरः।।११५।।

प्रसंगः—राजाप्रतापः समराङ्गणे ननाद- इति प्रस्तौति कविः।

अन्वयः—तदैव रण- रोष -लक्षणः वैरिचमूनिषूदनः, वीरतायाः निकषोपलो निसर्गनिष्ठुरः विलक्षणः अमलः स सैन्ये वेगेन ननाद।

व्याख्या—तदैव तस्मिन्नेव क्षणे रणजातो रोषो रणरोषः सः लक्ष्यतेऽनेनेतिरणरोषलक्षणः संग्रामोत्पन्नक्रोधान्वितः विलक्षणोऽद्भुतः वैरिणां चमूं निषूदयतीति वैरिचमूं -निषूदनः शत्रुसैन्यनाशकः वीरतायाः शौर्यस्य निकषस्य उपलो निकषोपलः कषप्रस्तरः शाणस्तुनिकषः कषः इत्यमरः, अमलो निर्मलः निसर्गान्निष्ठुरः निसर्गनिष्ठुरः स्वभावक्रूरः क्षत्रजातित्वात् सः प्रतापसिंहः समरे रणे वेगेनज वने ननादजगर्ज।

भावार्थ—उसी समय युद्ध सम्भावित क्रोध से युक्त शत्रुओं के विनाशक, वीरता की कसौटी की पत्थर तुल्य, असाधारण निर्मल हृदय राणा प्रताप सेना समूह में वेग से गर्जे।।११५।।

भुवं भृकुट्या भृशमाविभीषयन् भुजङ्गभीमोऽमितभूति-भूषितः।
विधातुकामः प्रलयं भयङ्करं, लयङ्करः किं भव एव भात्ययम्।।११६।।

प्रसंगः—युद्धार्थमुद्यतस्य प्रतापस्य विविधरूपाणि दर्शयति कविः।

अन्वयः—किम् अयं भृकुट्या भुवं भृशम् आविभीषयन्, भुजङ्गभीमः अमित भूति-भूषितः भयङ्करं प्रलयं विधातुकामः लयङ्करः भव एव भाति?

व्याख्या—किम् इति वितर्के अयम् एषः प्रतापः भ्रुकुट्या अपाङ्गचालनेन भुवं धरां भृशमत्यर्थमाविभीषयन् भीतिं नयन् भुजङ्गेन भीमो भुजङ्गभीमः सर्पैभयकरः अमितयाभूत्याभूषितः अमितभूतिभषितः विशालैश्वर्यः इति यावत् भयंकरं भीषणं प्रलयं जनसंहारं विधातुं कामो यस्य सः विधातुकामः चिकीर्षुः लयङ्करो लयं करोतीति लयङ्करः सृष्टिसंहर्त्ता भवः शिव एव भाति शोभते।

भावार्थ—क्या यह अपनी भौंहों के फेरने से पृथ्वी को अधिक भीत कर रहे, सर्पों से भयंकर अधिक ऐश्वर्य से युक्त प्रलय के अभिलाषी प्रलय करने वाले साक्षात् शिव ही हैं। जो इस प्रकार सुशोभित दीखते हैं।११६।।

सुरासुराणामथवाऽत्र सङ्गरे, स्ववर्गसम्पाद्यविधेः सहायकः।
समागतः किं सहसा स-सम्भ्रमः, सशस्त्र एषः सुर सैन्य-नायकः।।११७।।

प्रसंगः—युद्धोद्यतं प्रतापं कार्त्तिकेयरूपेणोत्प्रेक्षते-कविः।

अन्वयः—अथवा सुरासुराणां अत्र सङ्गरे सहसा स्ववर्ग सम्पाद्य-विधेः सहायकः ससम्भ्रमः सशस्त्र एषः सुरसैन्यनायकः समागतः किम्।

व्याख्या—अथवा यद्वा अत्र प्रस्तुते सुराश्चासुराश्चसुरासुरास्तेषां सुरासुराणां देवदैत्यानां तत्तुल्यानामिति यावत् संगरे युद्धे सहसा अकस्मात् स्वस्य वर्गः स्ववर्गस्तस्य सम्पाद्योविधिः स्ववर्गसम्पाद्यविधिस्तस्य-निजपक्षकरणीय-विधानस्य सहायकः सहानुष्ठाता ससम्भ्रमः सम्भ्रमेण सह ससाध्वसम् सशस्त्रः शस्त्रैः सह शस्त्रोपितः एषः पुरोवर्ती सुरसैन्यनायकः सुराणां सैन्यस्य नायकः, देवसेनाध्यक्षः एव समागतः समायातः किमिति वितर्के।

भावार्थ—अथ देवों और दैत्यों की होने वाली इस लड़ाई में अचानक अपने पक्ष की ओर से अनुष्ठेय कार्य में सहायक शस्त्रों सहित यह स्वामी कार्तिक ही आ गये।११७।।

प्रहर्त्तुकामोऽरि-बलं सुविह्वलं, स-विग्रहो एष साऽऽग्रहः।

स्ववज्र-निर्घोष-पुरस्सरोऽथवा, विराजते वज्र-धरं विडम्बयन्।।११८।।

प्रसंगः—पुनरप्यन्यथा प्रतापमुत्प्रेक्षते कविः।

अन्वयः—अथवा सुविह्वलं अरिवलम् प्रहर्तुकामः वज्रधरं विडम्बयन् स्ववज्रनिर्घोषपुरस्सरः साग्रहः विग्रहः एषः विग्रहः विराजते।

व्याख्या—अथवा यद्वा सुविह्वलं अत्यन्तं दैन्योपेतं अरेः बलमरिबलं शत्रुसैन्यं प्रहर्तुकामो यस्य सः प्रहर्तुकामः प्रहर्तुमिच्छुः वज्रस्य धरं वज्रधरम् इन्द्रम् विडम्बयन् अनुकुर्वन् स्वस्य वज्रवत् निर्घोषः सः पुरः सरो यस्य सः स्ववज्रनिर्घोषपुरस्सरः, निजकुलिशस्वनाग्रेसरः साग्रहो निर्वधं विग्रहेण सह इति स विग्रहः सशरीरः एषः अयं विग्रहः मूर्तिमान् संगर एव विराजते शोभते।

भावार्थः—अथवा अत्यन्त विकल शत्रु सेना में प्रहार करने की इच्छा से इन्द्र का अनुकरण कर रहा प्रताप वज्र तुल्य ध्वनि सहित साक्षात् युद्ध ही क्या उपस्थित हो गया है।११८।।

मदोत्कटो मानि-महत्त्व-मर्दनः, समुष्टिबन्धो जनमारण-व्रती।
मुहूर्तमात्रस्य कृते महीङ्गतो, महाङ्गधारी किमर्य महार्जुनः।११९।।

प्रसंगः—पुनरपि महाराणाप्रतापमुत्प्रेक्षते।

अन्वय—मदोत्कटः मानि-महत्त्व-मर्दनः जनमारण-व्रती समुष्टिबन्धः अयं (महाराणाप्रतापः) किम् मुहूर्त्तमात्रस्य कृते महीङ्गतः महाङ्गधारी महार्जुनः (अस्ति)।

व्याख्या—मदेन उत्कटो मदोत्कटो गर्वतीव्रः मानोऽस्ति येषान्ते मानिनस्तेषां महत्वं मर्दयति मानिग्रहत्त्वमर्दनः चित्तसमुन्नतिवैशिष्ट्यभ्रंशनः जनानांमारणं व्रतमस्यास्तीति जनमारणव्रती रिपुजनहननियमवान् मुष्टेः बन्धोमुष्टिबन्धस्तेन सहितः समुष्टिबन्धः मुष्टिबन्धयुक्तः अयम् प्रतापः किमिति वितर्के मुहूर्त्तमेव मुहूर्त्तमात्रन्तस्य क्षणमात्रस्य कृते अर्थम् महीं धरांगतः प्राप्तः महच्च तदङ्गं च महाङ्गं तद्धरति तच्छीलः माङ्गचारी विशालावयवः महांश्चासावर्जुनश्चमहार्जुनः कार्तवीर्यः अस्ति इति शेषः।

भावार्थः—मद की बहुलता से मतवाला मानियों के गर्व को दूर करने वाला शत्रुवर्ग को मार डालने का संकल्प किये, घूंसा बाँधे यह प्रताप थोड़ी देर के लिए पृथ्वी पर आया हुआ विशाल देहधारी क्या कार्तवीय है?।११९।।

मनस्वि-मानोन्नत-मौलि-खण्डकः, स्वदीप्ति-सम्भासित-सर्वदिङ्मुखः।
प्रतापहस्ते प्रतपन् प्रतापवान्, न कस्य कुन्तः कृतवान् प्रकम्पनम्।१२०।।

प्रसंगः—कविः युद्धे प्रतापकुन्तस्य पराक्रमं वर्णयति।

अन्वय—मनस्विमानोन्नतमौलि-खण्डकः, स्वदीप्तिसम्भासितसर्वदिङ्मुखः प्रतापहस्ते प्रतपन् प्रतापवान् कुन्तः कस्य प्रकम्पनम् न कृतवान्?

व्याख्या—प्रशस्तं मनो येषान्ते मनस्विनः उन्नतचेतस्कास्तेषां मानेन गर्वेण उन्नता उच्चैः स्थिता ये मौलयः शिरांसि तान् खण्डयति छिनत्तीति मनस्वितमानोन्नतमौलिखण्डकः, स्वस्य आत्मनः दीप्त्या भासा सम्भासितानि प्रकाशितानि सर्वासां निखिलानां दिशां काष्ठानां मुखानि भागा येन स स्वदीप्तिभासितसर्वदिङ्मुखः प्रतापस्य च मेवाड़शासितुः हस्ते करे प्रलयन् भासमानः प्रतापवान् सन्तापजनकः कुन्तः प्रासः कस्य जनविशेषस्य प्रकम्पनं वेदनं न कृतवान् न अकार्षीत्।।

भावार्थः—मनस्वी लोगों के भी मान से उठे शिरों को काट देने वाले और जिसकी चमक से सारी दिशायें प्रकाशित हो उठती थीं ऐसे प्रतापसिंह के हाथ में स्थित प्रभावी भाले से सभी काँप उठते थे।१२०।।

रणाङ्गणे कः खलु वीक्ष्य तं भयाज्जहावसून्नैव भटोद्भटोऽपि सन्।
न तेजसा तत्प्रभवेण केऽभवन् स्थिताः सुदूरेऽपि विदीर्णवक्षसः।१२१।।

प्रसंगः—पद्येऽस्मिन् प्रतापकुन्तस्य पराक्रमो वर्ण्यते।

अन्वयः—भटोद्भटोऽपि सन् रणाङ्गणे तम् वीक्ष्य भयात् कः खलु असून् न जहौ। सुदूरेऽपि स्थिताः तत्प्रभवेण तेजसा के विदीर्णवक्षसः न अभवन्?

व्याख्या—भटेषु वीरेसु उद्कटः नितरां श्रेष्ठः भटोद्कटः अपि सन् कः पुरुषः खलु निश्चयेन रणाङ्गणे रणस्य युद्धस्याङ्गणेऽजिरे तं कुन्तं वीक्ष्य विलोक्य भयात् भीतेः असून् प्राणान् न जहौ न तत्याज। सुदूरेऽतिदूरे स्थिता वर्तमानाः तस्मात्प्रभवतीतितत्प्रभवन्तेन तत्प्रभवेण कुन्तोत्पन्नेन तेजसा भासा के रिपवः विदीर्णभिन्नं वक्ष उरो येषान्ते विदीर्णवक्षसो न नह्येव अभवन् जाताः।

भावार्थः—वीरों में भी, श्रेष्ठ गिना जाने वाला कौन ऐसा था जो युद्धभूमि में भाले को देख भय से प्राण नहीं छोड़ देता था। जो दूर रहते थे उनकी भी छाती इससे उत्पन्न तेज के बल से फट जाती थी।।१२१।।

तृणीकृतास्त्रः स तडित्ततिप्रभः तुरुष्कजान् तुच्छतमान्प्रताडयन्।
त्विषामधीशस्तरसाऽथ ताण्डवे, त्रिलोचनस्याऽनुचराम आबभौ।।१२२।।

अन्वय—अथ तृणीकृतास्त्रः तडित्ततिप्रभः, तुच्छतमान् तुरुष्कजान् प्रताडयन् त्विषामधीशः सः तरसा ताण्डवे त्रिलोचनस्य अनुचराभः आबभौ।

व्याख्या—अथ अनन्तरं न अतृणानि अतृणानि तृणानी कृतानि तृणीकृतानि हीनतां नीतानि अस्त्राणि आयुधानि येन सः तृणीकृतास्त्रः। तडितां विद्युतां ततिः समूहः तथाविधा प्रभाकान्तिर्यस्य सः तडित्ततिप्रभः, अतिशयेन तुच्छास्तुच्छतमास्तान्-तुच्छतमान् नितरां हीनान् तुरुष्केजातान्-तुरुष्कजान् यवनान् प्रताडयन् निध्नन् त्विषां रुचामधीशः स्वामी सः कुन्तः तरसा जवेन ताण्डवे शैवे नृत्ये त्रिलोचनस्य शिवस्य अनुचरस्य आभेवाभा यस्य सः तथाविधः अनुचराभः सेवकसदृश आवभौ दिदीपे।

भावार्थ—अनन्तर अस्त्रों को तुच्छ कर बिजली सी चमक फैलाये अत्यन्त हीन यवनों को मारता हुआ सूर्य सा प्रकाशित वह भाला अपने वेग से ताण्डव नृत्य में शिव जी के अनुचर की भाँति शोभित होता था।।१२२।।

निमेषमात्रेऽगणितान् विनाशयन्, निशाचराऽऽभान् यवनान् निरन्तरम्।
निभालयन् नाकनिकेतनाऽतिथीन्, ननर्त्त नासीर-गतो नटेन्द्रवत्।।१२३।।

प्रसंगः—युद्धभूमौ प्रतापकुन्तस्य पराक्रमं वर्णयति कविः।

अन्वयः—निमेषमात्रे अगणितान् निशाचराभान् यवनान् निरन्तरम् विनाशयन् नाकनिकेतनाऽतिथीन् निभालयन् नासीर-गतः नटेन्द्रवत् ननर्त्त।

व्याख्या—निमेषमात्रे-निमेष एव निमेषमात्रन्तस्मिन् क्षणमात्र एव अगणितान् असंख्यान्। निशाचराभान्-निशायां चरन्तीति निशाचराः क्षपाचरास्तेषामा-भेवाकानितभार्येषान्ते निशाचराभास्तान्-यवनान् म्लेच्छान् निरन्तरमव्यवधानेनविनाशयन् विनिद्दयनन् नाक एव निकेतनं नाकनिकेतनं स्वर्गस्थानन्तस्यअतिथीन् प्राघुणिकान् निभालयन् कुर्वन् नासीरं गतो नासीगतः सेनाग्रस्थितः, नटानां नर्तकानामिन्द्रः श्रेष्ठो नरेन्द्रः स इव शिव ननर्त नर्तनं कृतवान्।

भावार्थ—पलक मारते ही असंख्य निशाचर समान यवनों को मारकर उन्हें स्वर्गलोक का अतिथि बनाता हुआ प्रताप का भाला सेना के आगे स्थित हो शिवजी की भाँति नाचने लगा।।१२३।।

सुधामधाम्नां रणधीर-घर्षणो, धुतारि-पक्षो द्विजधर्मपक्षपाः।
ध्रुवं धरा-धेनुक-धीमतां कृते, कृतेश एष श्रित-वेश-पेशलः।।१२४।।

प्रसंगः—युद्धभूमौ प्रतापकुन्तस्य पराक्रमं वर्णयति कविः।

अन्वय—धाम्नां सुधामरणधीर-घर्षणः, धुतारिपक्षः, द्विजधर्मपक्षपाः, एषः घरा-धेनुक धीमतां कृते श्रितवेषपेशलः ध्रुवं कृतेशः (एव)।

व्याख्या—धाम्नां तेजसां सुधाम आश्रयः, रणधीरधर्मणः रणेधीरारण-धीरास्तेषां धर्षणः युद्धधैर्यवञ्जनहानिकरः धुतारिपक्षः धुतः नाशितः अरीणां रिपूणां वक्षोवलं येन सः तथाविधः द्विजधर्मपक्षपाः द्विजानां ब्राह्मणक्षत्रियविशां धर्मस्य सुकृतस्य च पक्षं भागं पाति रक्षतीति। द्विजधर्मपक्षयाः एषः कुन्तः। धराधेनुकधीमतां-धेनुरेव धेनुकः धीरस्ति येषां ते धीमन्तः धरामेदिनी, च धेनुकः गौश्च धीमन्तः सुधियश्च तेषां कृते विषये श्रितवेषपेशलः श्रितो गृहीतः वेषपेशलः मनोहराकृतिर्येन सः तादृशः ध्रुवमिति निश्चये कृतेशः कृतान्त एव आसीत् अभवत्।

भावार्थ—तेजो का आधार रण में धीरता वालों को भी तिरस्कृत करदेने वाला शत्रु पक्षनाशक ब्राह्मण क्षत्रिय वैश्य इनके धर्म का रक्षक यह

प्रतापसिंह का भाला पृथिवी गौ ब्राह्मणों की रक्षा के लिए उत्तम रूप धारण किये सचमुच यमराज ही था।१२४।।

सुरक्त-सत्केशर-रङ्गरञ्जितः, सुधामरश्चञ्चल-चन्द्रहासमः।
सुधीर-हस्त-व्यजितः सहस्रधा, जहार हंहो! हृदयं न कस्य सः।१२५।।

प्रसंगः—युद्धभूमौ प्रतापकुन्तस्य पराक्रमं दर्शयति कविः।

अन्वयः—सुरक्त-सत्केशररङ्गरञ्चितः सुचामरः चञ्चलचन्द्रहासमः सुधीरः-हस्त-व्यजितः सः हंहो कस्य हृदयं सहस्रधा न जहार?

व्याख्या—सुरक्तं सुष्ठु रक्तवर्णं यत् सत्केशरं -केशरं इति नाम्ना ख्यातो वस्तुविशेषः तस्य रङ्गेण वर्णेन रञ्जितः लिप्तः सुरक्तसत्केशररङ्गरञ्जितः सुष्ठु चामर इवेति सुचामरः शोभनो व्यजनः इव चञ्चलस्यास्थिरस्य चन्द्रहासस्य करवालस्य भा दीप्ति रिषमा यस्य सः तथोक्तः सुधीरहस्तव्यजितः सुष्ठु धारस्य धैर्यान्वितस्य हस्तेन करेण व्यजितः प्रयुक्तः सः पूर्ववर्णितः कुन्तः हं हो इत्याश्चर्ये-कस्य शत्रुवर्गस्य हृदयं मानसं सहस्रधा सहस्रप्रकारैः भिन्नं न नह्येव जहार-हृतवान्।

भावार्थ—रक्त से सना होने कारण केशर के समान रंग वाला सुन्दर चामर जैसी चञ्चल तलवार की तरह चमकता घोर राणा प्रताप के हाथ से प्रयुक्त भाले ने किसके हृदय को हजारों बार नहीं दहलाया।१२५।।

प्रभञ्जनस्याऽपि जवं विभञ्जयन्, प्रदर्शयन् भीममसीमसाहसम्।
प्रताप-कुन्तः कुटिलान् प्रकर्तयन्, न कं समातङ्कितवानशङ्कितः।१२६।।

प्रसंगः—कविः प्रतापकुन्तस्य बलं वर्णयति।

अन्वयः—प्रतापकुन्तः प्रभञ्जनस्यापि जवं विभञ्जयन् भीमम् असीमसाहसम् प्रदर्शयन् कुटिलान् प्रकर्त्तयन् अशङ्कितः (सन्) कं न समातङ्कितवान्?

व्याख्या—प्रभञ्जनस्य वायोः नभस्वद्वातपवनपवमानप्रभञ्जनाः इत्यमरः

अपि जवं वेगं विभञ्जयन् मर्दयन् भीमं भयानकम् असीम निर्मर्यादम् साहसं पराक्रमं प्रदर्शयन् दृष्टिगोचरतां नयन् कुटिलान् वक्रान् कर्तयन् छिन्दन् अशङ्कितः निर्भयः प्रतापस्य कुन्तः प्रतापकुन्तः प्रतापप्रासः कं जनविशेषम् न समातङ्कितवान् भयग्रस्तम् अकरोत्।।

भावार्थ—वायु के भी वेग को न गिनते हुए-और मर्यादा से अधिक साहस दिखाकर दुर्जनों को काटते रहकर प्रतापसिंह के भाले ने प्रायः सभी लोगों को भयभीत कर दिया।१२६।।

अलक्षि विद्युत्फलकोपमः परैरतर्कि तर्कैकधनैर्यमोऽपरैः।
अमानि कैश्चिच्च पलायनेपरैः सुदर्शनो दर्शनमात्र-कातरैः।।१२७।।

प्रसंगः—कविना प्रतापकुन्तस्य बलं वर्णयते।

अन्वयः—(सः प्रतापकुन्तः रणे) परैः विद्युत्फलकोपमः अलक्षि अपरैः तर्कैकधनैः यमः अतर्कि दर्शनमात्रकातरैः पलायनपरैः कैश्चित् सुदर्शनः (चक्रः) अमानि च।

व्याख्या—परैः-शत्रुभिः 'प्रतापकुन्तः' विद्युतः फलकम् उपमा यस्य सः विद्युत्फलकोपमः तडित्-धारासमः अलक्षिदृष्टः। अपरैः अन्यैः शत्रुभिः तर्क एवैकं धनं येषान्ते तर्कैकधनास्तैस्तथाविधैः ऊहापोहमात्रवित्तैः यमः कृतान्तः अतर्कि तर्क विषयतां नीतः। दर्शनमेव दर्शनमात्रन्तेन कातरा दर्शनमात्रकातरास्तैः दर्शनमात्रकातरैः अवलोकमात्रभीतैः पलायने अपसरणे परैः तत्परैः कैश्चित् बहुभिश्च 'सुदर्शनः' इत्यभिधो विष्णोरायुधविशेषः अमानि अवगतः।

भावार्थ—प्रताप के भाले को रणभूमि मे शत्रुओं ने बिजली की धारा समझा। और बहुत से विचारशोलों ने यमराज जाना। इसी तरह देखने से डरकर भागने वाले बहुत लोगों ने विष्णु का सुदर्शन चक्र माना।१२७।।

समुज्ज्वलोऽप्यप्रिय-रक्त-रञ्जनो, विलम्बिदेहोऽप्यविलम्ब घातकः।
अर्थकलः सन्नपि पञ्चतामयन्नयं जयं कस्य न चेतसोऽकरोत्।।१२८।।

प्रसंगः—महाराणाप्रतापकुन्तस्य शौर्यं वर्णयति कविः।

अन्वयः—समुज्ज्वलः (सन्) अपि अप्रियरक्तरञ्जनः विलम्बिदेहः (सन्) अपि अविलम्बघातकः, अथ एकलः सन् अपि पञ्चताम् अयन् अयम् (सः प्रतापकुन्तः) कस्य चेतसः जयं न अकरोत्।

व्याख्या—समुज्ज्वलः श्वेतवर्णः सन् अप्रियान् शत्रुन् रक्तैः शोणितैः रञ्जयतिरक्तान् करोतीति अप्रियरक्तरञ्जनः विलम्बिदेहो, विलम्बी देहो यस्य सः दीर्घकायः अपि अविलम्बघातकः अविलम्बं क्षिप्रं घातयति नाशयति इति-अविलम्बघातकः, अथ एकलः सन् अपि पञ्चताम् अयन् अयम् (सः प्रतापकुन्तः) कस्य चेतसः जयं न अकरोत्।

भावार्थः—जो वर्ण से सफेद होकर भी शत्रुओं को उनके रक्त से लाल कर देता था। और लम्बा होने पर भी शीघ्र ही घात करता था तथा अकेला होने पर भी शत्रुओं को मृत्युग्रास में पहुँचाता था ऐसे प्रताप के भाले ने सभी के हृदयों को जीत लिया।।१२८।।

व्यलोकि सीमातिग एष यैरलं,
पुनर्न तैरेतददर्शि भूतलम्।
स्वयम्प्रतापोऽपि चमच्चकार तां,
विलोक्य कुन्तार्जित-सिद्ध-वीरताम्।।१२९।।

प्रसंगः—प्रतापकुन्तस्य वैचित्र्यं दर्शयति कविः।

अन्वयः—यैः एषः अलं सीमातिगः व्यलोकि तैः एतत् भतलं पुनः न अदर्शि। प्रतापः अपि तां कुन्तार्जितसिद्धवीरतां विलोक्य स्वयं चमच्चकार।

व्याख्या—यैः शत्रुभिः एषः कुन्तः सीमानमतिक्रम्य गच्छन्तीति

सीमातिगां मर्यादामतिक्रम्य वर्तमानः व्यलोकि दृष्टः। तैः शत्रुजनैः एतद्भूतलं धरापृष्टं पुनः भूयः अदर्शि दृष्टम्। प्रतापः मेवाड़ाधिपतिः अपि तां पूर्व दर्शिताम्। कुन्तार्जितसिद्धवीरताम् कुन्तेः अर्जितासिद्धवीरतां कुन्तार्जित-सिद्धवीरताम् प्रासोपार्जितख्यातशैर्यं विलोक्य दृष्ट्वा स्वयम् आत्मना चमच्चकार आश्चर्याविष्टो वभूव।

भावार्थः—जिन शत्रुओं ने प्रताप के भाले को सीमापार करते देखा उन्होंने फिर पृथ्वी नहीं देखी। अर्थात् वे मृत्यु को प्राप्त हो गये। स्वयम् प्रतापसिंह अपने भाले की स्वभाव प्राप्त वीरता को देखकर चकित हो जाते थे।।१२९।।

चेतक चङ्क्रमणम्

निशम्य राणा-कृतऽकुन्तटङ्कृतिं, स चेतकश्चारु चकार हुङ्कृतिम्।
उदग्रवेगोच्छलदच्छ-केशरः, चचाल युद्धेऽप्यचलां प्रचालयन्।।१३०।।

प्रसंगः—रणे महाराणाप्रतापस्याश्वस्य पराक्रमं वर्णयति कविः।

अन्वयः—स चेतकः राणाकृतकुन्तटङ्कृर्तिं निशम्य चारु हुङ्कृर्तिं चकार। (तथा च) उदग्रवेगोच्छलदच्छकेशरः (सः) युद्धे अचलाम् अपि प्रचालयन् चचाल।

व्याख्या—सः प्रसिद्धः चेतकः चेतकनामाप्रतापाश्वः राणाकृतां राणाप्रतापानुष्ठितां कुन्तस्य प्रासस्य टङ्कृतिं टङ्कारं राणाकृतकुन्तटङ्कृर्तिं निशस्य श्रुत्वा चारूमनोहरं यथा स्यात् तथा हुङ्कृर्तिं ह्रेषाशब्दं चकार अकार्षीत्। उदग्रवेगोच्छलदच्छकेसरः उद्गतमग्रं यस्मिन् स उदग्रः उदग्रश्चासौवेगश्च उदग्रवेगः तेन उच्छन् अच्छः केसरो यस्य सः तथाविधः-उद्धतजवोद्गच्छन्नि-र्मलग्रीवाकेशः युद्धेरणाङ्गणे अचलाम्-पृथ्वीम् अपि चालयन् कम्पयन् च चाल-अचलत्।

भावार्थः—प्रसिद्ध महाराणा का घोड़ा चेतक स्वामी के भाले को टंकार को सुनकर हिनहिनाने लगा-और अधिक वेग के कारण इसकी ग्रीवा के बाल लहराने लगे-इसकी चाल से पृथ्वी भी हिल उठी।१३०।।

प्रमत्त आशीविषवत् समन्ध्यन् निबन्धयँश्चापि महामतङ्गजान्।
प्रतापसिंहाश्रित-पृष्ठभीषणः, रणाङ्गणे रिङ्गणमाततताम सः।१३१।।

प्रसंगः—युद्धस्थले प्रतापस्याश्ववंवर्णयति कविः।

अन्वयः—प्रतापसिंहाश्चितपृष्ठभीषणः प्रमत्तः सः आशीविषवत् समन्धयन्, महामतङ्गजान् अपि निबन्धयन् राणाङ्गणे रिङ्गणम् आततान।

व्याख्या—प्रतापसिंहाश्रितपृष्ठभीषणः प्रतापसिंहेन, प्रतापनाम्नामेवाड़ाधिपतिना आश्रितम् अध्यासितम्-पृष्ठं पृष्ठभागस्तेन भीषणो भयानकः, प्रमत्त-उन्मत्तः स चेतकः आशीविषवत् आशीविषेण विषधरेण-आशीविषो-विषधरश्चक्रोव्यालः सरीसृपः इत्यमरः तेन तुल्यं सदृशं व्यालवदितिभावः समन्धयन् फूत्कारं कुर्वन् महान् गजान् महान्तो विशालाश्ञ्चते मतङ्गजाः करिणः, मतंगजो गजो नागः कुञ्जरो वारणः करी इत्यमरः तान् अपि निवन्धयन् घर्षयन् रणाङ्गणे रणस्य युद्धस्य अङ्गणे भूमौ रिङ्गणम् संचलनम् आततान विस्तारयाम्वभूव।

भावार्थ—अपनी पीठ पर प्रतापसिंह को बिठा लेने से भयंकर तथा उन्मत्त चेतक ने सर्प की भाँति फुफकारते हुए और बड़े-बड़े हाथियों को रौंदते-रौंदते युद्धभूमि में अपनी गती बढ़ायी।१३१।।

खुराग्रभागेण विदारयन् भुवं,
निशामयँश्चाप्रियभैरवं स्वम्।
क्षणप्रभोत्पात-निपात-चञ्चलः,
न कं चकाराऽऽर्ततरं स चेतकः।१३२।।

प्रसंगः-युद्धभूमौ चेतकपराक्रमं वर्णयति कविः।

अन्वयः—खुराग्रभागेन भुवं विदारयन् अप्रियभैरवं रवं निशामयन् च क्षणप्रभोत्पातनिपातचञ्चलः सः चेतकः कम् आर्ततरं न चकार।

व्याख्या—खुराग्रभागेन-खुरस्य शफस्य-अग्रभागेनाग्रदेशेन भुवं क्षितिं विदारयन् भिन्दन् अप्रियभैरवं अप्रियमरुचिकरं च तत् भैरवं भयानकं च खं ह्रेषाशब्दं निशामयन् श्रावयन् क्षणप्राभौत्पातनिपातचञ्चलः क्षणं निमेषमात्रं प्रभाकान्तिर्यस्य सः क्षणप्रभः ईदृशो य उत्पात उल्का तस्य निपातवत् पतनवत् चञ्चलोऽस्थिरः सः पूर्वोक्तश्चेतकः प्रतापाश्वः कं वैरिणम् आर्ततरं-पीडिततरं न, चकार अकरोत्।

भावार्थ—युद्धभूमि में अपनी टाप से पृथ्वी को विदीर्ण कर रहा और भयंकर रूप से हिनहिनाता यह चेतक क्षण भर के लिए चमक गये उत्पात की भाँति चञ्चल गति से सभी मुगलों को अधिक से अधिक पीड़ित कर गया।१३२।।

अलक्षिताऽशान्त-गतागतिः सदा,
रणाग्निमध्ये तृण-पुञ्ज-दायकः।
ननर्त वैरि-व्रज-मौलि-मण्डले,
स मूर्तिधारी रणचक्रवक्रिमा।१३३।।

प्रसंगः—चेतकस्यशौर्यम्प्रस्तौतिकविः।

अन्वयः—अलक्षिताऽशान्तगतागतिः रणाग्निमध्ये तृणपुञ्जदायकः मूर्तिधारी रणचक्रवक्रिमा सः सदा वैरिव्रजमौलिमण्डले ननर्त्त।

व्याख्या—अलक्षिताशान्तगतागतिः न लक्षिते न दृष्टे, अशान्तेऽस्थिरेगता-गतीयाताया यास्ते तेयस्य सः तथाविधा रणाग्निमध्ये-रणं समरएवाग्निर्वह्निस्तस्य मध्ये तृणपुञ्जदायकः तृणानाम्पुञ्जः समूहस्तं ददाति यच्छतीति मूर्तिधारी विग्रहयुक्तः रणचक्रवक्रिमा रणे युद्धे चक्रम् इव वक्रिमा कौटिल्यं यस्य स

तथाविधः सः विदितश्चेतकः सदा सन्ततं वैरिव्रजमौलिमण्डले-वैरिणां रिपूणां व्रजः समूहः वैरिव्रजस्तस्य मौलीनां मूर्ध्नां मण्डलं चक्रं तस्मिन् ननर्त-अनर्तीत्।

भावार्थ—वेग युक्त गति होने से जिसका आना-जाना नहीं प्रतीत होता-ऐसा युद्धभूमि में तृणपुञ्ज सा डाल रहा, युद्ध को चक्र के समान कर चेतक शत्रुओं के सिरों पर नाचने लगा।१३३।।

चमूः समस्ता जडताङ्गता सकृत्,
निवात निष्कम्पमभूद्रणाङ्गणम्।
नमः स्थलाच्चङ्क्रमणं विधाय गां,
यदा तरस्वी स जगर्ज वाजि-राट्।१३४।।

प्रसंगः—युद्धभूमौ प्रतापाश्वस्यभीषणताम्प्रस्तौति।

अन्वयः—यदा स तरस्वी वाजिराट् स्थलात् नभः (पुनः) गां चंक्रमणं विधाय जगर्ज (तदा) समस्त चमूः सकृत् जडतां गता रणाङ्गणनिवात-निष्कम्पम् अभूत्।

व्याख्या—यदा यस्मिन् काले तरस्वी तरः अस्यास्तीति तरस्वी वेगवान् सः प्रसिद्धश्चेतकः वाजिराट्-वाजिषु राजते इति वाजिराट् अश्वश्रेष्ठः स्थलात् भूमेः, जयेन उत्प्लुत्य नभः आकाशं पुनः गांधरां चङ्क्रणं कूर्दनं विधाय कृत्वा जगर्ज-अगर्जत्। 'तदा' समस्ता निखिलाचमूः सेना सकृत्-एकवारम्-जडतां गता कर्तव्यविमूढतामगमत्। रणाङ्गगणम्-रणस्य युद्धस्य अङ्गणम् अजिरम् निवातनिष्कम्यं निवातं च निष्कम्पं निवातनिष्कम्पं स्पन्दनरहितम् अभूत्-अजायत।

भावार्थः—जब यह तीव्र गामी अश्वश्रेष्ठ चेतक भूतल से आकाश की ओर उछल कर फिर से भूमि पर आकर गर्जता था तो सारी सेना एक

बार किंकर्तव्य विमूढ़ हो जाती थी, और युद्धभूमि किसी प्रकार की हलचल से रहित हो जाती थी।।१३४।।

य एव उद्गीर्ण—जनो रणेऽभवत् क्षणेऽभवद्धूलिमयो धरा—धृतः।
विदार्य वक्षश्च तदीयमत्यहो! ययौ स मृत्योः समरेऽग्रदूतताम्।।१३५।।

प्रसंगः—सद्धभूमौ चेतकः शत्रुषु प्राहरदिति वर्णयति कविः।

अन्वयः—रणे यः एव उद्ग्रीवजनः अभवत् (सः) क्षणे धराधृतः धूलिमयः अभवत्। अत्यहो सः (चेतकः) समरे तदीयं वक्षः विदार्य मृत्योः अग्रदूतताम् च ययौ।

व्याख्या—रणे समरे यः एव या कश्चित् उद्ग्रीवजनः उद् ऊर्ध्वं प्राप्ता ग्रीवा कन्धरा यस्य स उद्गीवः स चासौ जनः पुरुषश्च अभवत्-अभूत्। सः प्रागुक्तः पुरुषः क्षणे अल्पीयस्येवकाले धरा भूमिर्धृता आश्रिता येन सः धराधृतः आश्रितभूमिः धूलिमयः प्रचुररजः अभवत् जातः अत्यहो आश्चर्ये सः चेतकः समरे युद्धस्थले तदीयं शत्रुसम्बन्धितवक्षः-उरोभागं विदार्य निर्भिद्य मृत्योः मरणस्य अग्रदूतताम्-अग्रो यः दूतः अग्रदूतस्तस्य भावोऽग्रदूतत्ताम् प्रथमदूतताम् च ययौ प्राप्तवान्।

भावार्थः—युद्धभूमि में जिसने भी गर्दन उठाई वही क्षणमात्र में भूमि पर गिरकर धूलि से सन गया। फिर आश्चर्य है कि उसकी छाती को फाड़कर चेतक मृत्यु का अग्रदूत हो जाता था।।१३५।।

स्फुरच्छटोऽनभ्र-तडित्प्रगर्जनः, महामद-भ्रान्त-विलोचनाञ्चलः।
प्रचण्ड-कण्डूतिमलं रणङ्गतां, विनाशयामास सहाय-चीत्कृतैः।।१३६।।

प्रसंगः—प्रतापाश्वस्य यवनसेनाप्रहारं वर्णयति कविरीशदत्तः।

अन्वयः—स्फुरच्छटः अनभ्रतडित्प्रगर्जनः महामदभ्रान्तविलोचनाञ्चलः, (सः चेतकः) रणङ्गतां प्रचण्डकण्डूतिं सहासचीत्कृतैः अलं विनाशयामास।

व्याख्या—स्फुरच्छटः स्फुरन्ती चलन्ती छटा शोभा यस्य सः अनभ्रे मेघरहिते तडितोविद्युत इव प्रगजनं ध्वनने यस्य सः अनभ्रूतडित्प्रगर्जनः महामदप्रान्तविलोचनाञ्चलः, महानधिकः, मदो गर्वस्तेन भ्रान्ते चकिते विलोचनयोञ्चक्षुषोः, अञ्जले प्रान्तस्थले यस्य सः रणङ्गतां युद्धजातां प्रचण्डकण्डूतिं प्रचण्डामुग्रा कण्डूतिं कण्डू सहासचीत्कृतैः हासेन सहिताः चीत्कृतास्तैः सहासचीत्कारैः अलं सर्वथा विनाशयामास अनाशयत्।

भावार्थः—चञ्चल शोभायुक्त, बादल हीन आकाश में बिजली की कड़क की भाँति गर्जता, युद्धोन्माद से व्याप्त नेत्रों वाला यह चेतक रणक्षेत्र में फैली खुजली को हँसते-हँसते चीत्कारों से सर्वथा नष्ट कर देता था।।१३६।।

धुरन्धरेण ध्वनिनाऽऽप्रघर्षिणा, चञ्चच्चलेनाऽऽचलनेन चारुणा।
विपक्ष-पक्ष-क्षतिकारिणाऽङ्घ्रिणा, स चेतकोभूद्युधि चेतकोपमः।।१३७।।

प्रसंगः—युद्धभूमौ चेतकस्य पराक्रममाह कविः।

अन्वयः—धुरन्धरेण अप्रघर्षिणा ध्वनिना चारुणा चञ्चच्चलेन आचलनेन विपक्ष-पक्षक्षतिकारिणा अङ्घ्रिणा सः चेतकः युधि चेतकोपमः अभूत्।।१३७।।

व्याख्याः—धुरन्धरेण धुरं धरती धुरन्धरस्तेन अत्यन्ततीव्रेण अप्रघर्षिणा अनभिघर्षणीयेन ध्वनिना हेषणेन चारुणामनोहरेण चञ्चलनेन चञ्चलधुपलं मञ्चलनं गमनन्तेन चञ्चलयां गत्येतियावत् आचलनेन युद्धभूमौ सर्वत्र गमनेन विपक्ष-पक्षक्षतिकारिणणा-विपक्षस्यशत्रोः पक्षोबले, तस्य क्षतिंनाशेकरोतीति विपक्षपक्षक्षतिकारी तेन, अङ्घ्रिणा चरणेन सः प्रसिद्धः चेतकः प्रतापाश्वः युधि रणे चेतक उपमा यस्य स चेतकोपमः असदृशः अभूत् अभवम्।

भावार्थ—अधिक तीव्र, दवायी न जाने वाली ध्वनि से युक्त चञ्चल गति से सारे युद्ध क्षेत्र में धूमता हुआ चेतक शत्रु पक्ष को हानि पहुँचाने वाले पैर से युद्धभूमि में निराला ही हो गया था।।१३७।।

कथं न मन्ये किल तं मनोजवं, मनो-जवं म्लेच्छ-रणे समागतम्।
अधो न चोच्चैर्न पुरो न पृष्ठतः ददर्श कोऽपि नरो न रोषिणम्।।१३८।।

प्रसंगः—युद्धभूमिगतं प्रतापाश्वं वर्णयति कविः।

अन्वय—(अहो) किल म्लेच्छरणे समागतं तं मनोजवं कथं न मन्ये? (किं यत्) कोऽपि नरः यं रोषिणम् अधः न, उच्चैः न पुरः पृष्ठतः च न ददर्श।

व्याख्या—किल-इति निश्चये म्लेच्छरणे म्लेच्छानां यवनानां रणे संग्रामें समागतम् उपस्थितम् मनोजव मन इव जवो वेगो यस्य सः मनोजवस्तं वायुवेगं तमश्वं मनोजवं हनुमन्तं कथं कस्मात् न मन्येऽवगच्छामि। यतो यस्मात् कोऽपि कश्चन अपि नरः पुरुषः चेतकम् रोषिणम् क्रूद्धम् अधो नीचैः न उच्चैः ऊर्ध्वं न पुरः अग्रतः पृष्ठतः पृष्ठभागे च न ददर्श नाद्राक्षीत्।

भावार्थः—निश्चित रुप से म्लेच्छों के युद्ध में आये हुये, मन की भाँति गति वाले चेतक को हनुमान ही क्यों न मान लें। क्योंकि कोई भी व्यक्ति क्रोध से भरे घोड़े को नीचे ऊपर आगे और पीछे कहीं भी न देख सका।।१३८।।

अहो! मदीया जड-लौह-लेखनी, कथा तदीया कथमत्र कथ्यताम्।
क्षणेन सा यच्छटया 'अरावली'-ददी दरीदृश्यत एकदाऽरुणा।।१३९।।

प्रसंगः—कविः प्रतापाश्वकृत्यवर्णनीयमिति दर्शयति।

अन्वयः—अहो! मदीया जडलौहलेखनी (अस्ति) अत्र तदीया कथा (तया) कथं कथ्यताम्। यच्छटया अरावली दरी क्षणेन एकदा अरुणा दरी-दृश्यते (स्म)।

व्याख्या—अहो-इत्याश्चर्ये मदीया-ममेयं कविसम्बन्धिनी जडलौहलेखनी जडा अचेतना लौहस्य लेखनी लौहनिर्मिता अस्ति। अत्र काले तदीया

तस्येयं तदीया चेतकसम्बन्धिनीकथा-प्रबन्धवर्णना तथा लेखन्या कथं केन प्रकारेण कथ्यताम् उच्यताम्। यच्छटया यस्य चेतकस्य छटया कान्त्या पूर्वोक्ता अरावली-इति नाम्ना विदिता पर्वतश्रेणिः दरी गुहा क्षणेन अल्पेन कालेन एकदा एकस्मिन् समये अरुणा रक्तवर्णा दरीदृश्यते स्म अवलोक्यते स्म।

भावार्थः—अहो मेरी यह लौहमयी जड़ लेखनी है-यह चेतक की उदात्त कथा को कहाँ तक कह सकने में असमर्थ है। जिस चेतक की कानित से अरावली घाटी युद्ध समय में एकबार लाल लाल दिखाई देने लगी थी।।१३९।।

प्रताप-विजयः

त्वं छिन्धि भिन्धि परिदारय ताडय त्वं,
त्वं खण्डय ज्वलय कर्तय पातय त्वम्।
आदेशयन्ननुपदं विपदङ्कमूर्तिः,
युद्धे प्रतापनृपतिर्द्रढिमोत्कटोऽभूत्।।१४०।।

प्रसंगः—प्रतापसिंहो हि युद्धभूमिगतान् वीरानुत्साहयति।

अन्वयः—त्वं छिन्धि, (त्वं) भिन्धि (त्वं) परिदारय एवं ताडय, त्वं खण्डय, त्वं ज्वलय, (त्वं) कर्तय, त्वं पातय, (इति) अनुपदम् आदेशयन् विषदङ्कमूर्तिः प्रतापनृपतिः युद्धे द्रढिमोत्कटोऽभूत्।

व्याख्या—त्वं छिन्धि छेदनं कुरु, त्वं भिन्धि भेदनं कुरु त्वं परिदारय त्वं ताडय पातय त्वं खण्डय-खण्डशः कुरु, त्वं ज्वलय दीपय, त्वम् कर्तय-छित्त्वा-छित्वा निपातय त्वं पातय निपातय-इति एवम्प्रकारेण अनुपदम्-पदम्पदम् इत्यनु-पदम् पदेन आदेशयन् आज्ञापयन् विपदङ्कमूर्तिः विपदः अङ्कगता मूर्तयो यस्य सः, आपत्क्रोडीकृतस्वरूपः प्रतापनृपतिः-प्रतापश्चासौ

नृपतिश्च प्रतापाभिधो मेवाड़शासकः युद्धं संगरे द्रढ़िमोत्कटः द्रढिम्ना दाढ़र्येन उत्कटोमत्तः, 'उत्कटस्तीव्रमत्तयोः' इति हैमः अभूत्-अभवत्।

भावार्थ—महाराणा प्रताप युद्धस्थल में अपने राजपूतों को तुम शत्रुओं को छेद डालो फाड़ डालो मार डालो खण्ड-खण्ड कर दो कतर डालो गिरा दो जला दो-इस प्रकार का आदेश देते हुए निडर और दृढथे।

अश्वः क्वचित्पतति मदिंत-मुग्ध-मुण्डः,
दन्ती क्वचिन्नदति कर्तित-दीर्घ-शुण्डः।
एवं रिपून् स पशुमारममारयद्द्यः,
द्धाकृति - प्रकट - सङ्गर - सङ्गचण्डः।।१४१।।

प्रसंगः—युद्धभूमिरगम्याऽभूदिति वर्णयतिकविः।

अन्वयः—क्वचित् मदिंत-मुग्ध-मुण्डः अश्वः पतति क्वचित् कर्तितदीर्घशुण्डः दन्ती नदति। हा, बद्धाकृतिप्रकटसङ्गरसङ्गचण्डः सः एवं रिपून् पशुमारम् अमारयत्।

व्याख्या—क्वचित्-स्थानविशेषे मुग्धः मर्दित-मुग्ध-मुण्डः मर्दितः विनाशितः शोभनः मुण्डः शिरः प्रदेशो यस्य सः तथाविधः अश्वो घोटकः पतति। क्वचित्-कस्मिश्चित् स्थाने कर्तितदीर्घशुण्डः-कर्तितः छिन्नः दीर्घ आयतः शुण्डः करो यस्य सः तथोक्तः दन्ती करी नदति चीत्कारं कुरुते। हा इति विषादे बद्धाकृतिः प्रकट-संगरसङ्गचण्डः बद्ध धृता आकृतिः स्वरूपं यस्य सः अतः प्रकट उपस्थित इव संगरः संग्रामस्तस्य सङ्गेन चण्ड उग्रः इति वद्धकृति प्रकट संगरसङ्गचण्डः सः प्रतापसिंहः एवम् उक्तप्रकारेण रिपून् शत्रून् पशुमारम् पशून् मारयति यथेति पशुमारम् क्षुद्रजन्तुहननमिव अमारयत्-अहन्।

भावार्थः—प्रतापसिंह का यवनों के साथ युद्ध आरम्भ हो जाने पर कहीं घोड़ा शिर कट जाने से गिर पड़ता था, कही शूँड़ के कट जाने से हाथी

चिग्घाड़ने लगता था। इस प्रकार प्रत्यक्ष रूप से उपस्थित युद्ध के साथ से भीषण महाराजा ने पशुओं की भाँति मार-मार कर शत्रुओं को निष्प्राण कर दिया।।१४१।।

खड्गेन खण्डयति कोऽपि विपक्षि-पक्षं,
कश्चित्करोति कुटिलच्छुरिका-प्रहारम्।
कश्चिद् भिनत्ति किल सिंहनखेन कञ्चित्,
कश्चित् कृपाणफलकेन खलं छिनत्ति।।१४२।।

प्रसंगः—समरे शत्रुहननप्रकारमाहकविः।

अन्वयः—कोऽपि खड्गेन विपक्षिपक्षं खण्डयति, कश्चित् कुटिलच्छुरिकाप्रहारं करोति, कश्चित् सिंहनखेन कञ्चित् भिनत्ति, कश्चित् कृपाण-फलकेन खलं छिनत्ति किल।

व्याख्या—कोऽपि शूरोजनः विपक्षिपक्षं विपक्षिणो शत्रुजनानां पक्षं समूहं खड्गेन कृपाणेन खण्डयति कर्त्तयति। कश्चिद् वीरः कुटिलच्छुरिकाप्रहारं कुटिला वक्राया छुरिका असि पुत्रिका तस्याः प्रहारं घातं करोति विधत्ते। कश्चित् वीरः सिंहनखेन-सिंहस्य मृगेन्द्रस्य नखेन करणेन बघनखा-इति प्रसिद्धेन कश्चित् यवनं भिनत्ति विदारयति। कश्चित् कश्चन वीरः कृपाणफलकेन कृपाणस्य करवालस्य फलकेन धरेण खलं दुष्टं यवनं छिनत्ति द्वैधीकरोति किल निश्चयेन।

भावार्थ—कोई क्षत्रिय वीर तलवार से शत्रु सैनिक को काटता है- तो कोई टेढ़ी छुरी से ही किसी को मार डालता है। कोई बन्धन से हो किसी को फाड़ता है-कोई तलवार की धार से ही शत्रु को खण्ड-खण्ड किये देता है।।१४२।।

एवं महासमर-कर्म्मणि जायमाने,
मानेरितं युधि सलीममलं स वीक्ष्य।

सद्यः सचेतक गतिः सविधे तदीये,
सैन्यावलीं नृपतिरुल्ललयाञ्चकार।१४३।।

प्रसंगः—सलीमं प्रति प्रतापाक्रमणम्प्रस्तौति कविः।

अन्वयः—एवं महासमर-कर्मणि जायमाने युधि मानेरितं सलीमम् अलं वीक्ष्य सचेतकगतिः सः नृपतिः सद्यः तदीयसविधे सैन्यावलीम् उल्ललयाञ्चकार।

व्याख्या—एवं प्रागभिहितक्रमेण महासमरकर्मणि-महांश्चासौ समरश्च महासमरः स एव कर्म महासमरकर्म तस्मिन् बृहद्‌युद्धकार्ये जायमाने प्रवृत्ते सति युद्धे-रणे मानेरितं-मानेन मानसिंहेन-ईरितम्प्रेरितम्-इति मानेरितं सलीमम्-तन्नामानं यवनपुत्रम् अलम् पर्याप्तरूपेण वीक्ष्य अवलोक्य सचेतकगतिः चेतकस्य चेतकनाम्नो अश्वस्य गत्या गमनेन सह सचेतकगतिः सः सिद्धः नृपतिः मेवाड़ाधीश्वरः प्रतापः सद्यः शीघ्रमेव तदीये सलीमसम्बन्धिनि सविधे निकटे सैन्यावलीं सैन्यस्य सेनासंघस्य अवली श्रेणिम् उल्ललयाश्चकार प्रेरयामास।

भावार्थ—इस प्रकार महाभयंकर संग्राम के छिड़ने पर युद्धभूमि में मानसिंह से प्रेरित अकबर पुत्र सलीम को देखकर चेतक की तीव्र गति के साथ राजा प्रतापसिंह ने अपनी सेनाओं को उधर ही प्रेरित कर दिया।१४३।।

आयाहि रे! मुगलवंशकलङ्किसूनो!
पूर्णोऽद्य मे भगवतः कृपयाऽभिलाषः।
दग्धो भव, प्रतप कोवकुशानुमध्ये,
श्वासं गृहाण, नु सलीम! भुवि क्षणार्धम्।१४४।।

प्रसंगः—युद्धभूमि स्थितं सलीमं प्रतापः आक्षिपति।१४४।।

अन्वयः—रे मुगलवंशकलङ्किसूनो! आयाहि भगवतः कृपया मे

अभिलाषः अद्य पूर्णः। (मम) कोपकृशानुमध्ये प्रतप, दग्धो भव। हे सलीम! भुवि क्षणार्धम् श्वासं गृहाण नु।

व्याख्या—रे-इति सम्बोधने मुगलवंशकलङ्कि सूनो-मुगलानां यवनानां वंशः कुलं तं कलङ्कयति मलिनयति मुगलवंशकलंकी स चासौ सूनुः सुतश्चेति तत्सम्बुद्धौ आयाहि आगच्छ। अद्य इदानीम् भगवत ईश्वरस्यैकलिङ्गस्य कृपयानुकम्पया मे मम अभिलाषः मनोरथः पूर्णः सफलतां गतः अस्ति। मम प्रतापस्य कोप कृशानुमध्ये कोपः क्रोध एव कृशानुर्वह्निस्तन्मध्ये तदभ्यन्तरे प्रतप सन्तप्तो भव दग्धो भव ज्वल। हे सलीम यवनपुत्र-भुविपृथिव्यां क्षणार्धमर्ध क्षणस्येति क्षणार्ध-स्वल्पकालं यावत् श्वासं प्राणवायुं गृहाण धर नु निश्चयेन।

भावार्थ—हे मुगलवंश के पुत्र आओ-आज भगवान् की कृपा से मेरी इच्छा पूरी हो गयी-हमारी क्रोधाग्नि में तपो जल जाओ। हे सलीम इस पृथ्वी पर थोड़ी देर और जी लो।।१४४।।

यस्याः कृते न गणिता विकटाऽटवी सा
सन्धाविताश्च शतशो बत शैल-खण्डाः।
स्वाधीनतामयि सुकुन्त! गृहाण तां त्वं,
सद्योऽद्य नृत्तरत! कृत्तसलीम-मौलिः।।१४५।।

प्रसंगः—प्रतापः युद्धभूमौ सलीमं प्रहरति।

अन्वयः—यस्याः कृते सा विकटा अटवी न गणिता च (यस्या कृत्ते) शतशः शैलखण्डाः सन्धाविताः। बत अयि नृत्तरत सुकुन्त! अद्य सद्यः कृत्तसलीममौलिः त्वं तां स्वाधीनतां गृहाण।

व्याख्या—यस्याः स्वाधीनतायाः कृते अर्थं सा वर्णयितुमशक्या विकटा भयावहा अटवी-वनम् अटवी-अरण्यानि विपिनं गहनं काननं वनमिति

कोशः न गणिता नापेक्षिता। यस्याः कृते शतशः शताधिकाः शैलखण्डाः शैलानां गिरीणां खण्डाभागाः सन्धाविताः भ्रमणेन प्राप्ताः वत्त इति सम्बोधने अयि हे नृत्तरत नर्त्तनशील सुकुन्त शोभनप्रास। अद्य इदानीं सद्यः शीघ्रमेव कृत्तसलीममौलिः कृत्तः, छिन्नः सलीमस्यार्कवरपुत्रस्य मौलिः शिरो येन सः कृत्तसलीममौलिः त्वं सुकुन्त तां यवनाधीनां स्वाधीनतां स्वतन्त्रतां गृहाण प्राप्नुहि।

भावार्थ—जिसके लिए भयानक जंगलों को नहीं गिना और सैकड़ों पर्वतों में मारे-मारे फिरते रहे। हे नर्तनपरायण, सुन्दर भाले आज शीघ्र ही उस स्वतन्त्रता को सलीम का शिर काटकर प्राप्त करलो।।१४५।।

चक्राऽऽभ-वक्र वदनः स विशालभालः,
दोर्दण्ड-चण्ड-परिचालित-शस्त्रजालः।
निक्षिप्तवान् प्रहत-मोगल-सैन्य मल्लं,
भल्लं नृपाऽर्कवर-सूनु-सलीम-मौलौ।।१४६।।

प्रसंगः—प्रतापः सलीमशिरसि कुन्तं न्यक्षिपदिति वर्णयति कविः।

अन्वयः—चक्राऽऽभ-वक्र-वदनः विशालभालः दोर्दण्डचण्डपरिचालितशस्त्रजालः सः प्रहतमोगलसैन्यमल्लं भल्लं नृपार्कवरसूनु-सलीममौली निक्षिप्तवान्।

व्याख्या—चक्राभवक्रवदनः चक्रस्याभेवाभा यस्य स चक्राभः स इव वक्रं कुटिलं वदनम्मुखं यस्य सः, चक्रकान्तितुल्यकुटिलमुख इति यावत् विशालभालः- विशालो विस्तृतो भालो ललाटो यस्य सः तथोक्तः- दोर्दण्डचण्डपरिचालितशस्त्रजालः दोर्दण्डेन भुजदण्डेन चण्डं भयं करं परिचालितम्प्रयुक्तं शस्त्रजालं शस्त्रसमूहो येन सः तथोक्तः स प्रतापसिंहः प्रहतमोगलसैन्यमल्लं प्रहतो विनाशितो-मोगलसैन्यस्य यवनसेनासमूहस्य मल्लो वीरो येन सः तम् तथाविधं मल्लं कुन्तं नृपार्कवरसूनुसलीममौलौ-नृपः सम्राट्

योऽर्कवर: तस्य सूनु: पुत्र: सलीमस्तस्यमौलि: शिरस्तस्मिन् निक्षिप्तवान् न्यक्षिपत्।

भावार्थ—चक्र की भाँति दीप्त एवं वक्रमुख, विशाल मस्तक, भुजाओं से तीक्षा शास्त्रों के प्रयोग करने वाले महाराज प्रतापसिंह ने मुगल सेना के बड़े-बड़े वीरों का नाश करने वाले अपने भाले को सम्राट् अकबर के पुत्र सलीम के शिर पर मारा।१४६।।

जात: प्रतापविहितो न हि कुन्तघात:
युद्धेऽशने, समभवन्नु निरभ्र-पात:।
आमेडितं सकल-दिग्वलये तदाऽभूत्
हा हा सलीम! नर-भीम! कुलैक-तात।१४७।।

प्रसंग:—प्रतापप्रहृतं सलीमं यवनसेना शुशोच-इति प्रस्तौति कवि:।

अन्वय:—प्रतापविहित: कुन्घात: नहि जात: परन्तु युद्धे अशने: निरभ्रपात: समभवत् नु। तदा सकलदिग्वलये-हा हा सलीम! नरभीम! कुलैकतात! इति आम्रेडितम् अभूत्।

व्याख्या—प्रतापेन-मेवाड़ाधिपतिना विहत: कृत: कुन्तघात: कुन्तस्य प्रासस्य घात: प्रहार: न नहि जात: सम्मभवत्। 'परन्तु' युद्धे समरे अशनेर्वज्रस्य निरभ्रपात:-निरभ्रे पयोदरहिते पात: प्रहार: समभवत् सञ्जात: नु निश्चयेन। तदा तस्मिन् काले सकलदिग्वलये-सर्वेषु दिग्भागेषु 'हा हा' हन्त सलीम-नृप पुत्र, नरभीमनरेषु जनेषु भीम: श्रेष्ठो बलित्वात् नरभीमस्तत्सम्बुद्धौ कुलैकतातकुलस्य मुगलवंशस्य एक एव तातप्रियस्तत्सम्बुद्धौ-इति-इत्थम् आम्रेडितम्-असकृत् उच्चरितम् अभूत् अजनिष्ट।

भावार्थ—प्रतापसिंह द्वारा भाले का प्रहार नहीं हुआ-किनतु बिना बादल के ही वज्रपात हो गया-उस समय चारों ओर हा, हा सलीम मनुष्यों में भीम से बलशाली-मुगलवंश के अकेले पुत्र-यह ध्वनि होने लगी।१४७।।

स्तब्धं बभूव गगनं, चकिता धरित्री,
यच्चेतकेन कटितः स सलीम-हस्ती।
दिष्ट्या करीन्द्र-कृतपूर्ण-पलायनेन
प्राणानहो! यवनराड् न जहौ स्व-भाग्यात्।।१४८।।

प्रसंगः—प्रतापप्रहारात्सलीमो भाग्यवशान्न मृत इति वर्णयति कविः।

अन्वयः—यत् चेतकेन सः सलीमहस्ती कटितः। (ततः) गगनं स्तब्धं धरित्रो च चकिता बभूव। अहो दिष्ट्या यवनराट् स्वभाग्यात् करीन्द्रकृत-पूर्णपलायनेन प्राणान् न जहौ।

व्याख्या—यत् यस्मात् कारणात् चेतकेन प्रतापाश्वेन सः प्रसिद्धः सलीमहस्ती सलीमस्य-अर्कबरसूनोः हस्ती गजः कटितः आच्छादितः। अत एव गगनं नभः स्तब्धं चेष्टारहितं धरित्री पृथ्वी च चकिता आश्चर्यान्वितोबभूव-समजायत। अहो इत्याश्चर्ये दिष्ट्या दैववशात् यवनराड् मुगलेश्वरः स्वभाग्यात्-निजप्रारब्धवशात्-करीन्द्रकृतपूर्णपलायनेन करिणां गजानाम्-इन्द्रः श्रेष्ठः तेन कृतं विहितं यत् पूर्णं सर्वतोऽधिकं पलायनमपसरणम् तेन प्राणान् असून् न जहौ न तत्याज।

भावार्थ—प्रहार के समय चेतक ने सलीम के हाथी को ढक लिया। इससे आकाश स्तब्ध और पृथ्वी भी चकित हो गयी। भाग्यवश सलीम का हाथी जोर से भागा और सलीम प्रहार द्वारा मरने से बच गया।।१४८।।

तावत्स-शस्त्र-यवनाः परितः प्रचेलुः,
राणाऽपनोदमकृते युगपत्समस्ताः।
सोऽपि क्षणाय विनिमीलित-लोचनोऽभूत्,
सूर्यो यथा सजलसज्जलदप्रपञ्चे।।१४९।।

प्रसंगः—प्रतापो यवनसेनयाऽवृत इति वर्णयति कविः।

अन्वयः—तावत् राणाऽपनोदनकृते परितः समस्ताः सशस्त्रयवनाः

युगपत् प्रचेलुः। सजलसज्जलदप्रपञ्चे सूर्यः यथा सोऽपि क्षणाय विनिमीलित-लोचनः अभूत्।

व्याख्या—तावत् सलीमप्रहारानन्तरं राणा-इति संज्ञकस्य अपनोदनं नाशस्तस्यकृते राणाघातार्थमितियावत् परितः सर्वतः समस्ताः सर्वाः सशस्त्रा यवनाः शस्त्रेण सह सशस्त्राः सशस्त्राश्च ते यवनाश्च सशस्त्रयवनाः प्रहरणोपेत-तुरुष्काः युगपत् एकदैव प्रचेलुः वव्रजुः। सजलसज्जलदप्रपञ्चे जलेन वारिणा सह संयुक्ताः सजलाः सज्जलदाः शोभना मेघास्तेषां प्रपञ्चे समूहे सजलसज्जलदप्रपञ्चे सूर्यो रविर्यथा 'अदर्शनं गच्छति'। सोऽपि प्रतापसिंहोऽपि क्षणाय क्षणपर्यन्तं विनिमीलितलोचनः विनिमीलिते पिहिते लोचने नेत्रे येन सः तथोक्तः अभूत् अभवत्।

भावार्थ—तब राणा को मार डालने के लिए चारों ओर से सशस्त्र-यवन सेना चली उस समय जल से भरे बादलों के बीच सूर्य की भाँति महाराणा ने भी क्षण भर के लिए आँखें मूँद लीं।।१४९।।

एवं प्रतापमपि वीक्ष्य रणे स-तापं,
टङ्कारितं प्रतिविधाय महोग्र-चापम्।
राणा शिरो-मुकुटमात्म-गतं च 'झाला
माना' विधाय यवनाऽऽहनने प्रसक्तः।।१५०।।

प्रसंगः—रणे सङ्कटग्रस्तं प्रतापं झालामाना, नामा वीरो ररक्ष इति कविः वर्णयति।

अन्वयः—रणे प्रतापमपि एवं सतापं वीक्ष्य, महोग्रचापं टङ्कारितं प्रतिविधाय राणाशिरोमुकुटम् आत्मगतं च विधाय झालामाना यवनाऽऽहनने प्रसक्तः (अभवत्)।

व्याख्या—रणे संग्रामे प्रतापं प्रतापाभिधं मेवाड़ाधिपम् अपि एवं शत्रुसेनावृतं सतापं तापेन सह सतापं कष्टयुक्तं वीक्ष्य दृष्ट्वा महोग्रचापं

महत्-विशालमुग्रं भीमश्च तत् चापं धनुश्च तत् टङ्कारितमाध्यायितं प्रतिविधाय कृत्वा राणाशिरोमुकुटम् राणानाम्नः पुरुषस्य शिरसोमूर्ध्नो मुकुटं किरीटम् आत्मगतम्-स्वशिरोनिहितम् विधाय कृत्वा झालामाना-इति नामा सामन्तः, यवनाहनने यवनानामाहननं तस्मिन् यवनाहनने मोगलानां सर्वतो विनाशे प्रवृत्तः अभूत् अभवत्।

भावार्थ—इस प्रकार महाराणा को विपत्ति में फँसा देखकर, अपने भयंकर धनुष की टंकार कर झालामाना ने महाराणा के मुकुट को उतार कर अपने शिर में रख लिया और शात्रुओं के मारने में लग गया।१५०।।

राणाऽऽकृतिञ्च तमवेक्ष्य सलीम-सेना,
रोषोत्कटा कृतवती कठिनं प्रहारम्।
यस्माच्चतुर्दशसहस्र रघुप्रवीरा
जग्मुः-'स्वदेश'-ममतोचित-दिव्यलोकान्।१५१।।

प्रसंगः—मेवाड़सैनिका वीरोचितपराक्रमं विधाय स्वर्जग्मुरितिकविर्दर्शयति।

अन्वयः—रोषोत्कटा सलीमसेना राणाद्धऽऽकृर्ति तम् अवेक्ष्य कठिनं प्रहारम् कृतवती यस्मात् चतुर्दशसहस्र-रघुप्रवीराः स्वदेशममतोचितदिव्य-लोकान् जग्मुः।

व्याख्या—रोषोत्कटा रोषः क्रोधउत्कटोऽधिकोयस्याः सा तथोक्तासलीम-सेना सलीमस्यार्कवरपुत्रस्य सेना चमूः, राणाकृतिम् राणाभिधस्य आकृतिराकार इवाकृतिर्यस्य स राणा कृतिस्तम् तथाविधम् तं झालामाना नामानं पुरुषं वीक्ष्य दृष्ट्वा कठिनमुत्कटम् प्रहारं घातं कृतवती अकरोत्। यस्मात् प्रहारात् चतुर्दशसहस्ररघुप्रवीराः चतुर्दशसहस्त्राणि रघवो रघुवंशीयाः प्रवीराः शूरवीराश्च स्वदेशममतोचितदिव्यलोकान् स्वस्य निजस्य देशे राष्ट्रं-तस्य ममता-आत्मीयत्वं तस्ये उचिता योग्या ये दिव्यलोकाः सुरसदनानि तान् जग्मुःअगमन्।

भावार्थ—अधिक क्रोध से भरी सलीम की सेना ने राणा के समान देखकर उसे राणा ही समझकर कठिन प्रहार किया-जिससे झालामाना के साथ अन्य भी १४ हजार रघुवंशी वीर क्षत्रिय, अपने देश की ममतावश लड़ते हुए स्वर्गलोक को चले गये।।१५१।।

त्यक्त्वा रणं नृपवरो न जगाम यावत्
काञ्चिद्दशां कविमतिः स्वगिता नु तावत्।
वृत्तं कथङ्कथमपि प्रकटं प्रवक्तुं,
नाऽग्रे क्षमा हत-बला वत लेखनीयम्।।१५२।।

प्रसंगः—सैन्यनाशानन्तरं कथां लिखितुमक्षमः कविः जातः।

अन्वयः—यावत् नृपवरः रणं त्यक्त्वा काञ्चिद् दशां न जगाम, तावत् कविमतिः स्थगिता नु। बत, हतबला इयं लेखनी अग्रे कथङ्कथमपि वृत्तं प्रकटं प्रवक्तुं न क्षमा।

व्याख्या—यावत् यदवधि नृपवरः नृपाणां-राज्ञां वरः श्रेष्ठः रणं संग्रामं त्यक्त्वा विहाय काञ्चित् दशां विशेषां स्थितिं न जगाम न प्राप्तः। तावत् तदवधि कवेः प्रकृतस्य काव्यस्य निर्मातुरीशदत्तस्य मतिः बुद्धि स्थगिता कुण्ठिता नु- इति निश्चये। बत इति खेदे हतवला हतं नष्टं बलं सामर्थ्यं यस्याः सा, इयं लेखनी लिख्यतेऽनयेति लेखनी अग्रे पश्चात् कथं, कथं केन प्रकारेण अपि च वृत्तं व्यवस्थितिं प्रकटं स्पष्टं प्रवक्तुं निगदितुं न क्षमा असमर्थाऽस्ति इति शेषः।

भावार्थ—जब तक राजाओं में श्रेष्ठ प्रतापसिंह युद्धभूमि को छोड़कर किसी विशेष स्थिति को नहीं पहुँच गये, तब तक कवि की प्रतिभा भी कुण्ठित सी रही। अधिक क्या, बल के नष्ट हो जाने से अग्रिम चरित को कहने मे सर्वथा असमर्थ हो गयी।।१५२।।

हल्दीघाटी-परिचयः

स्वाधीनताऽऽर्यभुवि मूर्तिमती स-माना,
राणाप्रताप - बलवीर्यविभासमाना।
आटीकते समुपमा नहि यां सुशोचिः,
शाटीव सा जयति काचन हल्दिघाटी।।१५३।।

प्रसंगः—सर्वोत्कर्षशालिनीं हल्दिघाटीम्प्रस्तौति।

अन्वयः—आर्यभुवि यां समुपमा सुशोचिः नहि आटीकते, स-माना शाटीव राणाप्रताप-बलवीर्यविभासमाना, मूर्तिमती स्वाधीनता सा काचन हल्दिघाटी जयति।

व्याख्या—आर्यभुवि-आर्याणां हिन्दूनां भूर्भूमिस्तस्यां हल्दिघाटीं समुपमा समानं सादृश्यं सुशोचिः सुष्ठ शोच्यते या सा सुशोचिः सुविचारिता नहि आटीकते न प्राप्यते। समाना मानेन सहिता मानयुक्ता शाटी परिधानवस्त्रमिव राणाप्रताप बलवीर्यविभासमाना-राणाप्रतापस्य मेवाड़ाधिपस्य बलेनशक्त्या वीर्येण पराक्रमेण च विभासते द्योतत इति मूर्तिमती सविग्रहा स्वाधीनता स्वातन्त्र्यम् सा प्रसिद्धा काचन हल्दिघाटी एतन्नाम्नाप्रसिद्धा युद्धभूमिः जयति विजयिनी भवतु।

भावार्थ—आर्यभूमि में जिसकी उपमा बहुत विचारने पर भी नहीं मिलती। ऐसी मानपूर्ण साड़ी के समान महाराणा प्रताप के शैर्य तथा पराक्रम से प्रकाशित स्वाधीनता स्वरूप हल्दीघाटी उत्कर्ष को प्राप्त हो।।१५३।।

प्राची यदा हसति हे प्रिय! मन्दमन्दं,
वायुर्यदा वहति नन्दनजं मरन्दम्।
या प्रत्यहं किल तदा मतिमाननीयां
शोभां दधात्युषसि काञ्चन काञ्चनीयाम्।।१५४।।

प्रसंग:—कवि: हल्दिघाटीं स्मरति।

अन्वय:—हे प्रिय! प्राची यदा मन्दमन्दं हसति वायु: यदा नन्दनजं मरन्दं वहति, तदा या प्रत्यहम् उषसि मतिमाननीयां काञ्चनीयां काञ्चन शोभां दधाति किल।

व्याख्या—हे प्रिय इष्ट प्राची पूर्वादिक् यदा यस्मिन् काले मन्दमन्दं, मन्दं मन्दम् इति शनै: शनै: हसति-अरुणतां लभते वायु: समीर: यदा यस्मिन् काले नन्दजं नन्दजात् जातं नन्दनाख्यदेववनात् मरन्दंम्पुष्परज: वहति नयति। तदा तस्मिन् काले या हल्दिघाटी प्रत्यहम् अहन्यहनि इति प्रत्यहं प्रतिदिनम् उषसि अरुणोदये काले मतिमाननीयां मत्या बुद्धया माननीयां समदरणीयाम् काञ्चनीयाम् काञ्चनीया तां स्वर्णमयीं काञ्चन अपूर्वां शोभां द्युतिं धत्ते धारयति किल निश्चयेन।

भावार्थ—हे मित्र जब पूर्व दिशा धीरे-धीरे हँसती है। और हवा नन्दन बन का पराग लेकर चलती है। उस समय यह हल्दीघाटी प्रतिदिन बुद्धि से माननीय सुनहरो अनोखी सुन्दरता धारण करती है।।१५४।।

'हाहा' कृतां पुनरलं हननैर्मृतानां,
यूनां महाबलवतां नु परश्शतानाम्।
संस्मृत्य शैर्य-भरितं चरितं पुराणं,
मूकाऽस्त्यसौ किमिति विज्ञ-जन-प्रमाणम्।।१५५।।

प्रसंग:—कवि: स्मरणीयां हल्दिघाटीं स्मरति।

अन्वय:—असौ (हल्दीघाटी) पुन: अलं हननै: 'हा हा' कृतां मृतानां परश्शतानां महाबलवतां यूनां शौर्यभरितं पुराणं चरितं संस्मृत्य मूका अस्ति किम्, इति (अत्र) विज्ञजन: प्रमाणं नु।

व्याख्या—असौ एषा हल्दिघाटी पुन: भूय: अलम् पर्याप्तं हननै:

बहुशः प्रहारैः हा हा कृतां हा हा इति कृतवन्त इति हाहाकृतस्तेषां हाहाकृतां मृत्यनाम्-निधनमुपगतानाम् परश्शतानाम्-शतात् परा अधिक्तः इति परश्शतास्तेषां महाबलवतां महान्तः अधिकाश्च बलवन्तो वलिष्ठाश्चतेषां शूराणाम् यूनां युवपुरुषाणां शौर्यभरितं शौर्येण भरितं शौर्यभरितं पराक्रमपूर्णं पुराणं पुरातनं चरितं वृत्तं संस्मृत्य स्मृत्वा मूकाशब्दरहिता अस्ति वर्तते किम्-कारणम्-इति अत्र अस्मिन् विषये विज्ञजनाः विज्ञाः सुधियोजनाः लोकाः प्रमाणम् यथार्थ-निश्चयकरम् नु इति निश्चये।

भावार्थ--और यह हल्दीघाटी पुनः गहरे आघातों से हाहा-ऐसा शब्द करके मरे हुए हजारों बलिष्ठ जवानों के वीरता पूर्ण प्राचीन चरितों का स्मरण कर आज भी मौन हो रही है क्यों-इस विषय में जानकार इतिहासकार ही प्रमाण हैं।१५५।।

आस्ते प्रताप इह भारत-भूमि-वीरः
हे पान्थ! हिन्दुरसि चेत्सकृदानतः स्याः।
सम्प्रत्यपि प्रतिवदन्निव किन्नु धीरं,
धीरं ह्यधीरयति धीर-जनं समीरः।१५६।।

प्रसंगः—कविः हल्दिघाटीं स्मरति।

अन्वयः—हे पान्थ! इह भारतभूमिवीरः प्रतापः आस्ते, (त्वं) हिन्दुः असि चेत् सकृत् आनतः स्याः। किन्नु सम्प्रत्यपि समीरः धीरं प्रतिवदन्निव धीरजनं धीरं अधीरयति हि।

व्याख्या—हे पान्थ हे पथिक, इह हल्दिघाट्यां भारतस्य भारतवर्षस्य भूमिः धरा तस्या वीरः शूरः प्रतापाः राणाप्रतापः आस्ते यशसा वर्तते। त्वमिति शेषः हिन्दुः आर्यः असिचेत् यदि, सकृत् एकवारमपि आनतः प्रणतः स्याः भवेः। किमिति वितर्के नु-इति वाक्यालङ्कारे सम्प्रति, इदानीम् अपि समीरः वातः धीरं गभीरं प्रतिवदन् अनुगुञ्जन् इव धीरजनं धीरोगभीरश्चासौ जनश्च

धीरजनजनस्तं धीरमितिक्रियाविशेषणम् दृढ़तापूर्वकम् अधीरयति अधीरं धैर्यविहीनमिति यावत् करोति हि इति निश्चये।

भावार्थ—हे पथिक, इस हल्दीघाटी में भारतभूमि के वीर राणाप्रताप आज भी यश शरीर से रहते हैं। यदि तुम हिन्दू हो तो एक बार उनके सामने सिर झुकाओ। क्या निश्चित रूप से इस समय भी वायु धीमी गति से इसी का गुन्जन करता हुआ धीर जनों को भी दृढ़ता से अधीर बना देता है।१५६।।

मा कातरा:! स्पृशत मां प्रियपारतन्त्र्या:!
अद्यापि यन्न विहिता जननी स्वतन्त्रा।
यत्रेदमेव गदतीव ततिस्तरूणां,
शाखाकदम्ब-कृत-मर्मरमातनोति।१५७।।

प्रसंगः—हल्दीघार्टी स्मरति कविः।

अन्वयः—हे कातराः हे प्रियपरतन्त्र्याः मां मा स्पृशत। यत् (युष्माभिः) अद्यापि जननी स्वतन्त्रा न विहिता। यत्र तरूणां ततिः इदमेव गदति इव शाखाकदम्बकृतमर्मरम् आतनोति।

व्याख्या—हे कातराः भीरवः! हे प्रिय पारतन्त्र्याः प्रियमभीष्टं पारतन्त्र्यं पराधीनत्वं येषान्ते, तथोक्तास्तत्सम्बुद्धौ, मां हल्दीघाटी मा न स्पृशत स्पर्शं कुरुत यत् यस्मात् युष्माभिः अद्यापि इदानीमपि जननी जन्मप्रदा जन्मभूमिः स्वातन्त्र्यम् स्वायत्ता न विहिता कृता। यत्र स्थले तरूणां वृक्षाणां ततिः समूहः इदम् पूर्वोक्तम् एव गदति इव कथयति इव। शाखाकदम्बकृतमर्मरम्। शाखानां प्रकाण्डानां कदम्बैः समूहैः कृतुं विहितं 'मर्मर' 'मर्मर' इति ध्वनिम् आतनोति विस्तारयति।

भावार्थ—हे कायरों, पराधीनता के प्रेमियों मुझे न छुओ। जो आज भी तुम लोग मुझे स्वतन्त्र नहीं कर सके। जहाँ वृक्षों की पंक्तियाँ आज भी

ऐसा कहती है। और शाखाओं के समूहों द्वारा मर्म ध्वनि को फैलाती रहती हैं।।१५७।।

वीराग्रणीरभत-युद्ध-कलाकलापी,
क्वाऽऽस्तेऽद्य हा! स तनयः समयः प्रतापी।
अत्रत्य-निर्जनवनेऽथ यदा कदाचिद्
मातेव रोदिति सखे! कुररी नु काचित्।।१५८।।

प्रसंगः—हल्दिघाटीं स्मरति कविः।

अन्वयः—हे सखे! अत्रत्यनिर्जनवने यदा कदाचित् काचित् कुररी माता इव रोदिति नु (यत्) हा! वीराग्रणीः अभययुद्धकलाकलापी सनयः प्रतापी सः तनयः अद्य क्व आस्ते।

व्याख्या—हे सखे, हे मित्र अत्रत्यनिर्जनवने-अत्रभवमत्रत्यं तच्च तद् निर्जनं वनं अत्रत्यनिर्जनवनम् इहत्यं जनशून्यकाननम्-तस्मिन् यदा कदाचित्-यस्मिन् कस्मिन् काले काचित् काचन कुररी क्रौञ्ची माता जननी इव रोदिति अश्रूणि मुञ्चति नु निश्चयेन। यदिति शेषः हा-इति विषादे वीराग्रणी-वीराणां शूराणाम् अग्रणीः अग्रगामी अभययुद्ध- कलाकलापी युद्धस्य संग्रामस्य कलाया विद्यायाः कलापो नैपुण्यं, तदस्यास्तीति युद्धकला कलापी अभयोनिर्भयश्चासौ युद्धक्रियाकलापी तथाविधः निर्भयो युद्धकलाविशारद इति भावः सनयः-नयेन नीत्या सह सनयः नीतिमुक्तः प्रतापी प्रताप ऐश्वर्यमस्यास्तीति तनयः पुत्रः अद्य इदानीं क्व कुत्र आस्ते विद्यते।

भावार्थ—हे मित्र यहाँ के जनशून्य वन में जब कभी कोई कुररी माता की भाँति रोती है। कि हा-वीरों में श्रेष्ठ भय रहित युद्ध कला में निपुण नीतिमान्-एश्वर्यशाली पुत्र प्रताप आज कहाँ हैं।।१५८।।

अद्यापि यत्र जननी मम हन्त 'राणा'
'राणा' विरौति विकला नु 'कुहू' च्छलेन।

अद्यापि धारयति नैव कदापि शोभां
नूनञ्च तद्विरहिणी प्रकृतिर्वधूटी।।१५९।।

प्रसंगः—कविः हल्दिघाटीं स्मरति।

अन्वयः—हन्त, यत्र अद्यापि मम विकला जननी कुहूच्छलेन 'राणा'- 'राणा' विरौति नु। नूनं तद्विरहिणीं वधूटी प्रकृति कदापि शोभां नैव धारयति च।

व्याख्याः—हन्त इति खेदे-यत्र हल्दिघाट्याम् अद्यापि-अधुनापि मम मे विकला शोभाविहीना जननी प्रसूः कुहूच्छलेन कोकिलरुतव्याजेन राणा राणा इति शेषः विरौति विलपति। नु निश्चयेन। नूनं खलु तद्विरहिणी-तस्य राणाप्रतापस्य विरहः अस्यास्तीति प्रतापविहीना वधूटी तरुणी प्रकृतिः स्वाभाविकी-स्थितिः कदापि कस्मिंश्चिदपि काले शोभा छविं शोभाकान्तिर्द्युतिश्छविः इत्यमरः नैव नहि धारयति गृह्णाति।

भावार्थ—हायआज जहाँ भी मातृभूमि, कुहू के बहाने से ध्वनि में राणा राणा कहकर रोती है निश्चय ही उसके विरह में दुःखित प्रकृति रूपी तरूणी भी प्राकृतिक सौन्दर्य धारण नहीं करती है।।१५९।।

अद्यापि यत्र सुमधुव्रत-झङ्कृतानि,
लोलाक्षखञ्जनजनाञ्चित-नर्तनानि।
सत्कूजितान्यनुदिनं शुक-शावकानां
तौयत्रिकं जयति किञ्चन देवतानाम्।।१६०।।

प्रसंगः—कविः हल्दिघाटी स्मरति।

अन्वयः—यत्र अद्यापि सुमधुव्रतझङ्कृतानि, लोलाक्षखञ्जनऽजनाञ्चितनर्त्तनानि शुकशावकानां सत्कूजितानि अनुदिनं देवतानां किञ्चन तौर्यत्रिकं जयति।

व्याख्या—यत्र हल्दिघाट्याम् अद्यापि अस्मिन् कालेऽपि सुमधुव्रतझङ्कृतानि-सुष्ठशोभनं यथा स्मात्तथा मधुव्रतानां भ्रमराणां झङ्कृतानि गुञ्जितानि लोलाक्षखञ्जनजनाञ्चितनर्तनानि लोले चञ्चले अक्षिणी नेत्रे येषान्ते लोलाक्षाः। ते च ते खञ्जनजनाः पक्षिविशेषास्तेषामञ्चितानि शोभनानि नर्तनानि नृत्यानि, शुकस्य कीरस्य शावकानामर्भकाणां सत्कूजितानि शोभनशब्दितानि अनुदिनम् प्रतिदिनं देवतानां निर्जराणां किञ्चन विशिष्टं तौर्यत्रिकं वाद्यध्वनिः जयति उत्कर्षेण शोभते।

भावार्थ—आज भी जिस हल्दीघाटी में भौंरों का मधुर गुन्जन, चञ्चल आँखों वाले खञ्जन पक्षियों का सुन्दर नाचना, और तोतों के बच्चों का कलरव स्वरूप देवताओं का विशिष्ट वाद्य स्वर शोभित होता है।१६०॥

पुष्पं फलं तदनु गन्धवहः समीरः,
खद्योत-पंक्तिरमला च पिकालि-गीतिः।
अद्यापि यत्र सरल-प्रकृति-प्रणीतं,
पञ्चोपचारमिव पूजनमस्ति मातुः।१६१॥

प्रसंगः—कविः जन्मभूमिं स्मारयति।

अन्वयः—यत्र अद्यापि सरलप्रकृतिप्रणीतं-पुष्पं फलं गन्धवहः समीरः अमला खद्योतपंक्तिः तदनु पिकालिगीतिः मातुः च पञ्चोपचारं पूजनमिव अस्ति।

व्याख्या—यत्र हल्दिघाट्याम् अद्यापि सम्प्रत्यपि सरला-सुष्ठुस्वभावाया प्रकृतिस्तया प्रणीतं निर्मितं पुष्पं कुसुमं फलं गन्धवहः-गन्धं सुरभिं वहतीति-गन्धवहः सुगन्धिः समीरः वातः अमला निर्मला खद्योपतङ्क्तिः खद्योतानां निशिप्रकाशमानानां पङ्क्तिः लेखा तदनु तत्पश्चात् पिकालिगीतिः पिकानां कोकिलानाम् आलिः पङ्क्तिः-तस्यागीतिः गानम्

मातुः जनमभूमेः पञ्चोपचारम् पञ्चपञ्चसंख्याका उपचारा विषयो यस्मिंस्तत् पूजनम् अर्चनम् इव अस्ति भवति।

भावार्थ—जिस हल्दीघाटी में आज भी सरल प्रकृति द्वारा प्रस्तुत फल, फूल सुगन्ध को धारण कर बहता वायु-खद्योतों की पक्ति कोकिलों का गान माता के पंचोपचार पूजन की तरह है।१६१।।

नीलेन पक्ष-निवहेन खमाहसन्तः,
चञ्च्वा फलानि विमलानि समञ्चयन्तः।
'श्रीराम' नाम मधुरं मधुरं क्वणन्तः,
अद्यापि यत्र सुशुका विलसन्ति सन्तः।१५२।।

प्रसंगः—कविः हल्दिघाटीं स्मरति।

अन्वयः—यत्र नीलेन पक्षनिवहेन खम् आहसन्तः चञ्च्वा विमलानि फलानि समञ्चयन्तः श्रीराम-नाममधुरं मधुरं क्वणन्तः सन्तः सुशुकाः अद्यापि विलसन्ति।

व्याख्या—यत्र हल्दिघाट्यां नीलेन नीलवर्णेन पक्षनिवहेन पक्षाणाम्पुङ्खानां निवहेन समूहेन सम् आकाशम् आहसन्तः विकासयन्तः चञ्च्वाचञ्चुपुटेन विमलानि निर्मलानि फलानि समञ्चयन्तः धारयन्तः श्रीरामनाम, श्रीराम-इति संज्ञकं नाम मधुरं मधुरमत्यन्तं मधुरस्वरेण कूजन्तः कूजन्तः सन्तः सुशुकाः शोभनाः कीराः अद्यापि अस्मिन् कालेऽपि विलसन्ति शोभन्ते।

भावार्थ—जिस हल्दीघाटी में नीले पंखों से आकाश को भी तिरस्कृत कर रहे, चोंचों से मीठे फलों को धारण करते श्रीराम का नाम मधुर स्वर से गान करते सन्त समान सुन्दर शुक आज भी सुशोभित हो रहे हैं।१६२।।

वीक्ष्य प्रभा-हसित-चारु पुरन्दराणां,
सङ्गं स नृत्यममलं शिखिसुन्दराणाम्।
सम्भासते वनभुवः सुषमात्युदारः,
हर्षाङ्कितो हरितऽहीरक-कण्ठहारः।।१६३।।

प्रसंगः—कविः हल्दिघाट्याः शोभाम् वर्णयति।

अन्वयः—वनभुवः सुषमात्युदारः हर्षाङ्कितः स हरितहीरककण्ठहारः प्रभाहसितचारुपुरन्दराणां शिखिसुन्दराणां अमलं नृत्यं सङ्गं (च) वीक्ष्य सम्भासते।

व्याख्या—वनभुवः वनस्य काननस्य भूर्भूमिस्तस्याः सुषमात्युदारः सुषमा परमा शोभा तया अत्युदारः विकसितः हर्षाङ्कितः हर्षेण प्रीत्या अङ्कितः पूर्णः सः हल्दिघाटीभागः हरितहीरककण्ठहारः, हरितोहरिद्वर्णः हीरकः हीरकरूपः एव कण्ठहारः कण्ठाभरणम् प्रभाहसिततारुपुरन्दराणाम्-पुरं दारयतीति पुरन्दरः, इन्द्रः, प्रभया कान्त्या हसितः तिरस्कृतः चारुः मनोहरः पुरन्दर इन्द्रो यैस्तेषाम् शिखिसुन्दराणां शिखिनः मयूराश्च ते सुन्दराश्च तेषाम् अमलं निर्मलं नृत्यं नर्तनं सङ्गं सहवर्तित्वं च वीक्ष्यावलोक्य सम्भाषते अतिशये न शोभते।

भावार्थ—वनभूमि की अधिक शोभा से युक्त, हर्ष से भरा वृक्षावली रूप हरा-हरा हीरक का कण्ठ हार धारण कर रहा हल्दीघाटी का प्रदेश अपनी कान्ति से इन्द्र को भी तिरस्कृत कर रहे चमकीले मयूरों के नृत्य और संगति को पाकर अत्यधिक सुशोभित होता है।।१६३।।

चूडामणिः सकलभारत-भामिनीनां,
पत्नी प्रतापनृपतेरमलाऽत्र शैले।
प्राण-प्रदानमकरोत् पतिपादपद्मे
किन्त्वेकवारमपि हा! नहि हाऽकरोत्सा।।१६४।।

प्रसंगः—कविः महाराणाभार्याः उत्कर्षम् प्रस्तौति।

अन्वयः—अत्र शैले सकलभारतभामिनीनां चूड़ामणिः प्रतापनृपतेः अमला पत्नी पतिपादपद्मे प्राण-प्रदानम् अकरोत्। किन्तु हा! सा एकवारम् अपि हा नहि अकरोत्।

व्याख्या—अत्र अस्मिन् शैले-अरावली पर्वतभागे सकलभारतभामिनीनां सकलाः समस्तायाभारतस्य भारतवर्षस्य भामिन्यो योषितस्तासां चूड़ामणिः शिरोभूषणभूता प्रतापनृपतेः -प्रतापः-प्रतापाभिधानो यो मेवाडशासकः स चासौ नृपतिर्राजः च तस्य अमला अतिपवित्रा पत्नी महिषीपतिपादपद्मे-पत्युःस्वामिनः पादौ चरणौ एव पद्मं कमलं तत्र प्राणप्रदानम् प्राणानाम् असूनाम् प्रदानं समर्पणम् अकरोत् कृतवती। किन्तु-हा इति विषादे सा प्रतापभार्या एकवारम् सकृत् अपि हा शोकशब्दं नहि नो अकरोत् चकार।

भावार्थ—इसी अरावली पर्वत पर भारत की स्त्रियों में शिरोमणि और पवित्रतम प्रताप की पत्नी ने पति के चरणकमलों में प्राण छोड़ दिये। किन्तु उन्होंने एक बार भी अपने मुँह से हाय ऐसा शब्द नहीं कहा।१६४।।

अत्र प्रतापनृपतेः प्रकट-प्रतापा,
एकाऽपि हन्त! शतधाऽभवदस्त्र-धारा।
युद्धेऽधिकोशमपि शत्रुवधे क्रमेण,
ज्योत्स्ना तमःसहचरी चपलेति चित्रम्।१६५।।

प्रसंगः—कविः हल्दिघाटीयुद्धे स्मरन्नाह।

अन्वयः—हन्त! अत्र प्रतापनृपतेः प्रकटप्रतापा एका अपि अस्त्रधारा शतधा अभवत्। युद्धे अधिकोशम् अपि ज्योत्स्ना क्रमेण शत्रुवधे तमः सहचरी चपला (अभवत्) इति चित्रम्।

व्याख्या—हन्त हर्षेऽव्ययम् अत्र हल्दिघाट्यां प्रतापनृपतेः-प्रतापः प्रतापनामा चासौ नृपतिः राणा च मेवाड़धिपतिस्तस्य प्रकटप्रतापा प्रकटः दृष्टः प्रतापः शौर्यं यस्याः सा एका अन्यतमा अपि च अस्त्रधारा अस्त्रस्य रक्तस्य

रूधिरेऽसृक् लोहितास्रक्तक्षतजशोणितम्-इत्यमरः धारा प्रवाहः शतधः शतप्रकारा अभवत् अभूत्। युद्धे रणे अधिकोशम्-कोशे इत्यधिकोशम् कोशमध्यङ्गतम् अपि च ज्योत्स्ना ज्योतिष्मत् अस्त्रधारा-इतिभावः क्रमेण क्रमशः शत्रुवधे शत्रुणां वधो नाशस्तस्मिन् तमः सहचरी तमसोऽन्धकारस्य सहचरी सहवर्तिनी चपलाविद्युत् 'अभवत्' इति शेषः।

भावार्थ—हर्ष है इस हल्दीघाटी में प्रताप के मौर्य को दिखा रही एक भी रक्त धारा सैकड़ों धाराओं में बदल गई थी। युद्धकाल में म्यान में पड़ी ज्योत्स्ना रूपी शास्त्रधारा शत्रु वध के समय अन्धकार की सहचारिणी विद्युत् हो गयी थी-यह आश्चर्य है।१६५॥

अत्रैव वीरजनमौलिमहार्हरत्नं,
धीराग्रणीरगणितव्रणवान् स 'झाला'।
राणाऽर्थमेव हहहा! समरेऽसहायः
प्राणाञ्जहौ न तु पलायनतत्परोऽभूत्।१६६॥

प्रसंगः—हल्दिघाट्यां वीरोचितकर्तव्यमनुतिष्ठन् झालाभिधः सामन्तो वीरगतिमुपगत इति वर्णयति कविः।

अन्वयः—हहहा! अत्रैव समरे असहायः वीरजनमौलिमहार्हरत्नं धीराग्रणीः अगणितव्रणवान् स 'झाला' राणार्थम् प्राणान् जहौ एव, (परं) तु पलायतत्परः न अभूत्।

व्याख्या—हहहा अतिखेदे अत्र हल्दिघाट्याम् एव समरे युद्धे असहायः नास्ति न वर्तते सहायः सहायको यस्य सः। वीरजनमौलिमहार्हरत्नम्। वीराः शूराश्चतेजनाः पुरुषाश्च वीरजनास्तेषां। मौलावुत्तमाङ्गे महार्हं बहुमूल्यं रत्नं मणिर्यथा-धीराग्रणीः धरेष धैर्य युक्तेष्वग्रणीरग्रयामी-अगणितव्रणवान् न नहि गणितः संख्यातः व्रणः शस्त्रजातेक्षते येनस तथोक्तशरीरस्थबहुव्रणोपेक्षक इति भावः सः प्रसिद्धः झाला-झाला नामा सामन्तः राणर्थम्-महाराणानिमित्तम्

एवं प्राणाम् असून् जहौ मुमोच एव। परं किन्तु-पलायने-युद्धादात्सरणे तत्पर आसक्तो न नहि अभूत् अभवत्।

भावार्थः—हा! शोक का विषय है कि इसी हल्दिघाटी में असहाय वीर जन शिरोमणि परमर्धर्यशाली झालामाना सामन्त ने महाराणा के लिए, अपने शरीर के बहुतेरे घावों को न गिनते हुए प्राण छोड़ दिये। किन्तु युद्धभूमि में पीठ नहीं दिखायी।१६६॥

लोकत्रयेऽतिविदिता बलिवेदिकेयं,
यत्र प्रतापनृपतेरनुयायिवर्गः।
सङ्क्रीतवान् किल परश्शतमौलिदानात्
स्वातन्त्र्यमार्यवर-वीर-वसुन्धरायाः॥१६७॥

प्रसंगः—कविः हल्दिघाट्यां महत्त्वं वर्णयति।

अन्वयः—इयं बलिवेदिका लोकत्रये अतिविदिता यत्र प्रतापनृपतेः अनुयायिवर्गः परश्शतमौलिदानात् आर्यवरवीरवसुन्धरायाः स्वातन्त्र्यं सङ्क्रीतवान् किल।

व्याख्या—इयं हल्दिघाटी वलिवेदिका बलेर्वलिदानस्य वेदिका चतुरस्त्राभूमिः लोकनाये लोकानां भुवनानां त्रयं त्रिसंख्याकन्तस्मिन् अतिविदिता विशेषेण प्रसिद्धा अस्तीति शेषः। यत्र वेदिकायाम् प्रतापनृपतेः प्रतापश्चासौनृपतिश्च प्रतापनृपतिस्तस्य प्रतापाभिधनृपतेः अनुयायिवर्गः-अनु पृष्ठे यान्ति गच्छन्तीत्यनुयायिनस्तेषां वर्गः समूहः परश्शत मौलिदानात् शतात् पराः परश्शताः शताधिकास्तस्य विधायेमौलयाशिरांसि तेषां दानात् समर्पणात् आर्यवरवीरवसुन्धरायाः आर्येषु आर्यजातिजनेषु वराः श्रेष्ठाः ये वीराः शूरास्तेषां वसुन्धरा धरित्री तस्याः स्वान्त्र्यं सङ्कृतवान् क्रयणं कृतवान् किल इति निश्चये।

भावार्थः—यह हल्दीघाटी एक बलिबेदी है जो तीनों लोकों में प्रसिद्ध है। जहाँ राणाप्रताप के अनुयायियों ने सैकड़ों शिरों के दान से आर्यों के श्रेष्ठ वीरों की भूमि की स्वाधीनता को खरीदा था।१६७।।

वीराश्चतुर्दशसहस्रमिता इहैव,
मृत्युं यथा शयन्-तूलमथाऽलिलिङ्ग।
किन्तु प्रशक्यतमधस्य महीयसीं स्वां
सन्मातरं न हि मनाग् विजहुर्धरित्रीम्।१६८।।

प्रसंगः—कविः राजपूतवीराणां जन्मभूमावासक्तिं निरूपयति।

अन्वयः—अथ चतुर्दशसहस्त्रमिताः वीराः इहैव शयनतूलं यथा मृत्युम् आलिलिङ्गुः किन्तु प्रशस्यतमशस्यमहीयसीं स्वां सन्मातरं धरित्रीं मनाग् (अपि) नहि विजहुः।

व्याख्या—अथेति वाक्यालङ्कारे चतुर्दशसहस्रमिताः चत्वारश्च दश चेति चतुर्दश तेषां सहस्त्राणि तान्येवेति चतुर्दशसहस्रमिता-वीराः शूराः इह हल्दिघाट्याम् एव शयनतूलं शयनस्य स्वापस्य 'निद्रातुशयनं' स्वप्नः संवेश इत्यपि इत्यमरः तूलं तल्पं यथा इव मृत्युम् मरणम् आलिलिङ्गुः, आलिङ्गितवतः। किन्तु परन्तु प्रशस्यतमशस्यमहीयतीम् अतिशयेन प्रशस्यानि प्रशस्ततमानि तथोक्तानि च तानि शस्यानितैः महीयसीं प्रभूतधान्यपूज्यतमां स्वकीयां सन्मातरं सती साध्वी चासौ माता जननी च ताम् धरित्रीम् पृथिवीम् मनाक् ईषद् अपि न विजहुः तत्यजुः।

भावार्थ—और चौदह हजार वीरों ने इसी स्थान पर सोने के लिए उपयोगी गद्दे की भाँति मृत्यु का वरण कर लिया। किन्तु धनधन्य से भरपूर अत्यन्त श्रेष्ठ जन्मभूमि को पूजनीय माता के समान थोड़ा भी नहीं त्यागा।१६८।।

अत्रैव वीरजन-शोणित-शोण-गङ्गा, भूत्वा सहस्रपथगा गतिमाततान।
यद्दर्शनेन रसनेन च मज्जनेन, देवैः सहैव ऋषयः पितरोऽपि तृप्ताः।।१६९।।

प्रसंगः—कविरीशदत्तः हल्दिघाट्याः सर्वत्राक्षुण्णे महत्वे दर्शयति।

अन्वयः—अत्रैव वीरजनशोणितशोणगङ्गा सहस्रपथगा भूत्वा गतिम् आततान यद् दर्शनेन, रसनेन मज्जनेन देवैः सह ऋषयः पितरः अपि तृप्ता एव।

व्याख्या—अत्र हल्दिघाटयाम् एव वीरजनशोणितशोणगंगा वीराः शूराश्चजनाः पुरूषश्च तेषां शोणितं रुधिरम् एव शोणगंगारक्तभागीरथी सहस्राणि असंख्यानि पन्थानः मार्गास्तैर्गच्छन्ति व्रजन्ति यस्या सा तथोक्ता भूत्वा गतिम् गमनम् आतताननविस्तारयाञ्चकार। यद्दर्शनेन यस्यादर्शनेन अवलोकनेन रसनेन पानेन श्रवणेनेति यावत् मञ्जननेन अभिषेकेनदेवैः सुरैः सहसार्धम् ऋषयो मन्त्रद्रष्टारः पितरः पितृसमूहाः अपि तृप्ताः तुष्टा भवन्ति।

भावार्थइसी हल्दीघाटी में वीरजनों की रुधिररूपी गङ्गा सैकड़ों धाराओं में होकर वही थी-जिसका दर्शन करने और आस्वाद लेने से (श्रवण) द्वारा आनन्द लेने से स्नान करने से देवजनों के साथ ही ऋषि और पितर भी तृप्त हो जाते हैं।।१६९।।

सैषा स्थली चकित-चेतक चङ्क्रमाणां,
सैषा स्थली कुटिल-कुन्त-पराक्रमाणां।
सैषा स्थली प्रियतमाप्यसुतोऽमराणां
सैषा स्थली भयकरी नर-वामराणाम्।।१७०।।

प्रसंगः—पौनःपुन्येन हल्दिघाटीं स्मरति कविः।

अन्वयः—सा एषा चकित-चेतक-चङक्रमाणां स्थली, सा एषा कुटिलकुन्तपराक्रमाणां स्थली, सा एषा स्थली अमराणाम् असुतः अपि प्रियतमा, सा एषा स्थली नरपामराणां भयकरी।

व्याख्या—सा पूर्वोक्ता-एषा हल्दिघाटी चकितचेतकचङक्रमाणां चकितो भ्रमितो यः चेतकः प्रतापस्याश्वः तस्य चङ्क्रमाणानि कूर्दतानि तेषां स्थली भूमिः अस्तीति शेषः सा एषा कुटिलकुन्तक्रमाणां कुटिलो वक्रो यः कुन्तः प्रतापस्य प्रासस्तस्य पराक्रमाणां शौर्याणां स्थली भूमि रस्तीतिचेषः। सा एषा स्थली भूमिः अमराणां देवानाम् असुतः प्राणेभ्योऽपि प्रियतकानितरामिष्ठा। सा एषा स्थली हल्दिघाटीभूमिः नरपामराणां नरेषु पामराः कातरास्तेषां भयकरी त्रासदा अस्तीतिशेषः।

भावार्थ—यह वह भूमि है जहाँ चेतक ने उछल कूद की थी। जहाँ प्रताप ने अपने प्रचण्ड भाले का पराक्रम दिखाया था। यह भूमि देवताओं के लिए प्राणों से भी अधिक प्रिय है। और कायर जनों को भयभीत करने वाली है।१७०॥

श्रीगणेशसहस्रनामस्तोत्रम् - प्रो.वटुकनाथ शास्त्री खिस्ते	१२.५०
प्रथमा परीक्षा -	
लघुसिद्धान्तकौमुदी - पं.माताप्रसाद उपाध्याय	६०.००
शब्दधातुरूपच्छन्दसां तालिका - डॉ.विनोदराव पाठक	२०.००
नीतिसंग्रहस्य मित्रलाभः- पं.गौरीनाथ पाठक	२५.००
रघुवंश-महाकाव्यम् (द्वितीय सर्ग) -डॉ. भुवनेश उपाध्याय	२५.५०
तर्कसंग्रह (मात्र हिन्दी टीका)	१०.००
अवकहडाचक्रम् - डॉ.कमलाकान्त पाण्डेय	२५.००
लघ्वष्टाध्यायी (हिन्दी टीका सहित) - डॉ.धर्मराज पाण्डेय	३५.००
पूर्वमध्यमा प्रथम वर्ष -	
रघुवंश महाकाव्यम् - (प्रत्येक सर्ग) - डॉ.रामविलास पाण्डेय	२५.००
प्रतापविजय (सं.हि.व्याख्या) - श्री विशुद्धानन्द त्रिवेदी	३५.००
मध्यसिद्धान्त कौमुदी (प्रथम भाग) सं.हि.व्याख्या	५०.००
कुमारसम्भवम् (१-२ सर्ग) - डॉ.नर्मदेश्वर त्रिपाठी	३५.००
रघुवंश-महाकाव्यम् (६-७ सर्ग) - डॉ.रामविलास पाण्डेय	३५.००
अष्टाध्यायी सूत्रपाठ - डॉ.अजय कुमार झा	२०.००
मूलरामायणम् (सं.हि.व्याख्या)- पं.गौरीनाथ पाठक	२०.००
काव्यांग विमर्श (रस-छन्द-अलंकारादि हेतु उपयोगी पुस्तक)	२५.००
पूर्वमध्यमा द्वितीय वर्ष-	
मध्यसिद्धान्त कौमुदी (द्वितीय भाग) सं.हि.व्याख्या	५०.००
चन्द्रालोक- पं.गौरीनाथ पाठक	५५.००
किरातार्जुनीयम् - (१-२ सर्ग) - डॉ.नरेश चन्द्र द्विवेदी	३५.००
हिन्दी साहित्य का इतिहास (परीक्षोपयोगी)	४०.००
उत्तरमध्यमा प्रथम वर्ष -	
अलंकारसार मंजरी - डॉ. शान्तिप्रिय द्विवेदी	१५.००
तर्कसंग्रह-न्याय-पद-हिन्दी टीका (गुटका) - डॉ.गणेशदत्त शास्त्री	२०.००
दशकुमारचरितम् (पूर्वपीठिका) (सं.हि.व्याख्या)	४०.००
रघुवंश-महाकाव्यम् (१३-१४ सर्ग) - डॉ.नर्मदेश्वर त्रिपाठी	३५.००
संस्कृत निबन्धनिधिः - डॉ.यमुनेश त्रिपाठी "चातक"	५०.००
कारिकावली (प्रत्यक्षखण्ड) डॉ.गणेशदत्त शास्त्री	४०.००
उत्तरमध्यमा द्वितीय वर्ष -	
स्वप्नवासवदत्तम् (सं.हि.व्याख्या)	५०.००
काव्यमीमांसा (१-५) डॉ.यमुनेश त्रिपाठी "चातक"	३५.००
वृत्तरत्नाकर - डॉ.सकठादेव पाण्डेय	४०.००
किरातार्जुनीयम् - (३-६ सर्ग) - डॉ.नर्मदेश्वर त्रिपाठी	४०.००
आंचलिक कहानियाँ - डॉ.द्विजेन्द्रनाथ मिश्र "निर्गुण"	३५.००
अर्थसंग्रह - डॉ.गणेशदत्तशास्त्री	२५.००
शास्त्री प्रथम वर्ष -	
सिन्धुवादवृत्तम् - प्रो.वटुकानाथ शास्त्री खिस्ते	४५.००
अभिज्ञान शाकुन्तलम् - पं.गौरीनाथ पाठक	१५०.००
मेघदूतम् (पूर्वमेघः) डॉ.विनोदराव पाठक	३०.००
भारतीय संस्कृतिः - श्रीनिवास शर्मा	३०.००
शिशुपालवध महाकाव्यम् (१-४) - डॉ.गणेशदत्तशास्त्री	८०.००
गोलपरिभाषा - डॉ.कमलाकान्त ... डेय	१०.००
समरसार - डॉ.कमलाकान्त पाण्डेय	६०.००
सरलत्रिकोणमिति (हिन्दी व्याख्या) - डॉ.कमलाकान्त पाण्डेय	१७५.००
षटपंचाशिका - डॉ. कमलाकान्त पाण्डेय	४०.००
तर्कामृतम्- डॉ.गणेशदत्त शास्त्रीय	२५.००
मीमांसापरिभाषा (सं.हि.व्याख्या) - पं.चन्दीकृष्ण त्रिपाठी	३०.००
रसलोक - डॉ.श्रीप्रसाद	२५.००
शास्त्री द्वितीय वर्ष -	
सांख्यकारिका - डॉ.यमुनेश त्रिपाठी "चातक"	४५.००
तर्कभाषा - डॉ.गणेशदत्त शास्त्री	३५.००
वेदान्तसार (सं.हि.व्याख्या) - डॉ.यमुनाराम त्रिपाठी	४०.००
सनत्सुजातीयम् (सं.हि.व्याख्या) डॉ.यमुनाराम त्रिपाठी	५०.००
वेणीसंहार नाटक - पं.गौरीनाथ पाठक	१००.००
कारिकावली (अनुमानादि समाप्तिपर्यन्त) - डॉ.गणेशदत्तशास्त्री	६०.००
जातकालंकार (सं.हि.व्याख्या) - डॉ.कमलाकान्त पाण्डेय	३५.००
ज्योतिषवेदाङ्गम् - डॉ.कमलाकान्त पाण्डेय	६
रेखागणित - (पंचम-षष्ठाध्याय) - डॉ.कमलाकान्त पाण्डेय	२५.०
रेखागणित - (एकादश-द्वादशाध्याय) - डॉ.कमलाकान्त पाण्डेय	२५.००
ज्योतिषशास्त्रीयप्रबन्धाः-डॉ.कमलाकान्त पाण्डेय	५०.००
गोलीयरेखागणितं चापीयत्रिकोणमितिश्च -डॉ.कमलाकान्त पाण्डेय	४०.००